पितृपक्षात् पितृतः पितृबन्धुतश्च, मातृपक्षात् मातामहतो मातृबन्धुतश्च[2]। सप्तमीं पञ्चमीं परिहृत्येति शेषः। अत एव एकपितृकस्यापि पित्रपेक्षया सप्तमीवर्जनाय मनुवचने पितुरिति सार्थकं न वरापेक्षयेति।

शूलपाणिभिस्तु[3] क्षेत्रिमात्रगोत्रस्य द्विपितृकस्य क्षेत्रजादेर्बीजिसगोत्रावर्जनाय पितुरित्युक्तम्[4]। उद्वहेत द्विजो भार्यामित्यादौ भाविनि भूतवदुपचार[5]ः। विवाहानन्तरमेव भार्यात्वनिष्पत्ते[6]ः। न सगोत्रां न समानप्रवरां भार्यां विन्देत[7] (विः सूत्रः २४।९), मातृतस्त्वापञ्चमात् पितृतस्त्वासप्तमात् (विः सूः २४।१०) इति विष्णुसूत्रे सप्तमीनिषेधाच्च। अत्र मातृपदेन मातामहोलक्षणीय[8]ः।६॥

'अथात्मीयांस्त्रीन् पितृतस्त्रीन् मातृतस्तत्पत्नीश्चेति पितृतर्पण[9]' मिति (गोभिलीयस्नानसूत्रपाठः ३।९) गोभिलसूत्रे त्रीणिति पुंलिङ्गनिर्देशेन तत्पत्नीश्चेति पृथगुपादानेन मातृत इति मातामहपरत्ववत्। अन्यथा

अप्रत्तानां तथा स्त्रीणां सापिण्ड्यं साप्तपौरुषम्।
प्रत्तानां भर्तृसापिण्ड्यं प्राह देवः पितामहः[10]॥ इति

रत्नाकरधृतकूर्मपुराणवचनात् मातुर्विवाहेन तत्पितृकुले सापिण्ड्यनिवृत्तेः भर्तृसापिण्ड्येन सापिण्ड्यसिद्धेः, विवाहेन च तस्याः पितृगोत्रत्वनिवृत्तेः पितृसपिण्डापितृसगोत्रावर्जनादेव तत्सिद्धेः 'असपिण्डा

---

[1]The printed text reads like:

पञ्चमीं मातृपक्षाच्च पितृपक्षाच्च सप्तमीम्।
गृहस्थस्तूद्वहेत् कन्यां न्यायेन विधिना नृप॥

[2]A मातामहबन्धुतश्च।

[3]A.B.C & D. शूलपाणिमहामहोपाध्यायैस्तु–

[4]*Vide* Sambandha-viveka. (p. 7) Ed. by. J. B. Choudhury.

[5]C reads यतो

[6]This line exactly in the same form is supposed to be taken from Vivāha-tattvārṇava of Śrīnāthācāryacūḍāmaṇi. *Vide* Manuscript (p. 2) preserved in the Library of Vaṅgīya Sāhitya Pariṣat.

[7]'न सगोत्रां न समानार्षप्रवरां भार्यां विन्देत' in printed text (24/9).

[8]A. B. & D. लक्षणीयः। The idea is taken from Sambandha-viveka. *Vide* p. 6 (Choudhury edn.) where it is stated: 'असपिण्डा······इत्यत्र मातृपदेन माहामहलक्षणा।'

[9]'अथात्मीयांस्त्रीन् पितृतस्त्रीन् मातृतो मातामहांश्च तत्पत्नीश्चेति पितृतर्पणम्' in printed text. (3/9).

[10]C. प्रजापतिः

च या मातु'रित्यत्र मातुरित्युपादानं[1] व्यर्थं स्यात्। एवमेव विवेककृतः

मातामहपक्षे तु सापिण्ड्यं पाञ्चपौरुषम्।
पञ्चमात् सप्तमादूर्ध्वं मातृतः पितृतः क्रमात्।
सपिण्डता निवर्तेत सर्ववर्णेष्वयं विधिः॥

इति हरिनाथधृतवचनात्[2]। 'पिण्डनिवृत्तिः सप्तमे पञ्चमे वे'ति हारलताधृतगौतमसूत्रे (२।५।१२-गौः धः शाः) पञ्चमे इत्येतस्यापि मातामहपक्षविषयत्वाच्च। पिण्डनिवृत्तिरित्यत्र सापिण्ड्य-निवृत्तिरित्याचारमाधवीये पाठः, तदा व्यक्त एवार्थः।७॥

एवञ्चादत्तकन्यानां पितृपक्षे साप्तपौरुषं सापिण्ड्यं मातामहपक्षे पाञ्चपौरुषं सापिण्ड्यञ्च विवाहमात्रे उक्त[3]विष्णुपुराणविष्णुसूत्राभ्याम्। 'असमानार्षेयीं कन्यां वरयेत् पञ्च मातृतः परिहरेत् सप्त पितृतः त्रीन् मातृतः पञ्च पितृतो वा इति पैठीनस्युक्त[4]वचनैकवाक्यत्वात्। त्रीन् पञ्च इत्यासुरादिविवाह-विषयं क्षत्रियादिविवाहपरं[5] वेति विवेककृतः[6]। असमानजातीयविवाहे त्रीन् इत्यादि व्यवस्थितविकल्प इति रत्नाकरादयः (गृहस्थरत्नाकरः-पृः १०)। असमानजातीया च मूर्धाभिषिक्तादेः। वस्तुतस्तु त्रीनित्याद्यधिकदोषार्थम्। अन्यथा मातृष्वसृपितृष्वसृदुहितरो मातुलसुताश्च धर्मतस्ता भगिन्यो भवन्ति इति ताः वर्जयेदिति पैठीनसिवचनान्तरस्य[6a] का गतिः। एवञ्च त्रीन् मातृत इति प्रमातामहवृद्धप्रमातामहमातृबन्ध्वपेक्षया सन्ताने[7] बोध्यम्। मातामहापेक्षया मातृष्वसृदुहितृमातुल-दुहित्रोस्त्रितयान्तर्गतत्वेऽपि[8] पृथक्निषेधः प्रमातामहवृद्धप्रमातामहमातृबन्धुसन्तानत्रि[9]तयेभ्योऽप्यधिक-दोषाय। एवं[10] पितृपक्षेऽपि।८॥

---

[1]इति omitted in C & D.

[2]A, B & D. हरिनाथोपाध्यायधृतयमवचनात्
In Jivānanda's edition it reads like: हरिनाथोपाध्यायधृतनारदवचनात्।

[3]A. B. C & D. पूर्वोक्त

[4]B. C & D. पैठीनसिवचनैकवाक्यत्वात्
A. पैठीनसिवचनेन च एकवाक्यत्वात्

[5]A. B. C & D. विवाहविषयम्

[6]Raghunandana seems to have taken the idea from Vivāhatattvārṇava of Śrīnāthācāryacūḍāmaṇi where the line occurs: त्रीन् पञ्चेति तु आसुरादिनिन्दित-विवाहविषयं क्षत्रियादिविषयमेवेति टीकाकृतः (Manuscript. (p. 2.) preserved in Vaṅgīya Sāhitya Pariṣat).

Vide Sambandhaviveka. (J. B. Choudhury Edn.) p. 6, where we find: 'यत्तु मातुः सपिण्डा यत्नेन····व्यासवचनेनैव मातामहसपिण्डाया अवश्यवर्जनीयत्वप्रतिपादनात् मातामहसमानोदकाया अप्यपरित्यागः प्रतीयते तदासुरादिनिन्दितविवाह-क्षत्रियादिविवाहयोः एव प्रतिपत्तव्यम्'।

[6a]A. वचनस्य

[7]A & C.

[8]C. तृतीयान्तर्गतत्वेपि

[9]A. त्रयेभ्योऽप्यधिकदोषाय

[10]omitted in B.

यत्तु 'पितृमातृ[1]सम्बन्धादासप्तमादविवाह्याः कन्या भवन्ति आपञ्चमादन्येषा'मिति सुमन्तुवचने (गृहस्थरत्नाकरः, पृः ११) मातृकुलेऽप्यासप्तमत्वमुक्तं तद्वचनान्तरैकवाक्यतया वरं तन्मातरञ्चादायैव गणनया बोध्यम्। सन्तानवर्जने तु न सप्तमत्वं किन्तु वचनान्तरैकवाक्यतया मातामहादि[2]पञ्चानामेव पञ्चमी ग्राह्या, अन्यथा नानाश्रुतिकल्पना[3] स्यात्। एवमापञ्चमादिति पैठीनस्युक्त'त्रीन् मातृतः पञ्च पितृत[4]' इत्यस्य समानम्। अत्रापि मातृपक्षे वरं तन्मातरञ्चादाय गणनान्न[5] विरोधः। एतेन आसप्तमादिति पितृपक्षपरम्, आपञ्चमादिति मातृपक्षपरम्, सप्तमीं पितृपक्षाच्च मातृपक्षाच्च पञ्चमीमित्याद्यनेकवचनैकवाक्यत्वादिति[6] निरस्तम्। भवन्तीत्यनेनोभयपक्षे स्वमतमभिधायापञ्चमादन्येषामित्यस्य परमताभिधानेनैव[7] युक्तत्वात्। एवञ्च सुमन्तुवचने मातृकुले सप्तमपुरुषवर्जनेनात्यवचनोक्तपञ्चमादिवर्जने मातृपदेन मातामहलक्षणा स्फुटैव।९॥

एतेन जनन्यपेक्षया[8] अप्रत्तानां त्रिपौरुषमिति वशिष्ठोक्त[9]तदनूढाकालीनत्रिपुरुषसपिण्डापेक्षया वरापेक्षया वा पैठीनस्युक्तमातृपक्षपञ्चमत्वविवेचनं निरस्तम्। अत एव याज्ञवल्क्यटीकायां शूलपाणिमहामहोपाध्यायैर्मातामहस्योपर्यधः सपिण्डसन्ततिः पञ्चमी[10]पर्यन्ता परिहरणीया इत्युक्तम्। एवञ्च मनुवचने चकारानुषक्तव्याख्यानेन मातृपितृसगोत्रावर्जनादेव[11] तत्सपिण्डयोर्निषेधसिद्धेर्यदसपिण्डेति पृथगुक्तं तत् सपिण्डकन्यापरम्पराजाताया अपि पञ्चमीसप्तमीपर्यन्ताया निषेधार्थम्। अत एव वक्ष्यमाणत्रिगोत्रात्[12] परतो यदीति प्रतिप्रसवः सार्थकः। सपिण्डारूपकन्यामात्रवर्जने तु व्यर्थं स्यादिति। अत्र केवलपितृमातृशब्दाभ्यां पितृमातृसम्बन्धित्वेन पितृसपिण्डमातामहपितृबन्धुमातृबन्धुपरिग्रहात् तत्सन्ततीनां निषेधः। बन्धुनिषेधे नारदः

> आसप्तमात् पञ्चमाच्च बन्धुभ्यः पितृमातृतः।
> अविवाह्याः सगोत्राश्च[13] समानप्रवरास्तथा ॥ (ना-१२।७)
> सप्तमे पञ्चमे वापि येषां वैवाहिकी क्रिया।
> तेच सन्तानिनः सर्वे पतिताः शूद्रतां गताः॥

मातृतः पितृतो बन्धुतश्च इत्यत्र पञ्चमीविभक्तिविनिगमकाभावात् पूर्वापरावधिकार्था।

---

[1]A. B. C & D. मातृपितृ

[2]C. मातामहानां

[3]C. नानाविधकल्पना

[4] omitted in C.

[5]C. गणनया

[6]A. B & C. वाक्यतया

[7]B. परमताभिधानस्यैव

[8]A. adds वा

[9]A. व्याख्यानेन

[10]omitted in A. B. C & D.

[11]C & D. वर्जनेनैव. The idea is taken from Sambandhaviveka. pp. 9 & 10

[12]A. B. C & D. वचने

[13]स्युः in Nārada Saṁhitā. (Jolly's edition).

बान्धवाश्च—

पितुः पितुः स्वसुः पुत्राः पितुर्मातुः स्वसुः सुताः ।
पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः ॥
मातुर्मातुः स्वसुः पुत्राः मातुः पितुः स्वसुः सुताः ।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः[1] ॥

तेन पितामहभगिनीपुत्रः पितामहीभगिनीपुत्रः पितामहीभ्रातृपुत्रश्चेति त्रयः पितृबान्धवा भवन्ति। तथा मातामहीभगिनीपुत्रो मातामहभगिनीपुत्रो मातामहीभ्रातृपुत्रश्चेति त्रयो मातृबान्धवा भवन्ति।१०॥

अत्र[2]

जमदग्निर्भरद्वाजो विश्वामित्रात्रिगोतमाः ।
वशिष्ठकाश्यपागस्त्या मुनयो गोत्रकारिणः ॥
एतेषां यान्यपत्यानि तानि गोत्राणि मन्यन्ते ॥[3]

इति स्मृतेः। गोत्राणि तत्तन्नामकगोत्रभागीनि[4] वंशपरम्पराप्रसिद्धमादिपुरुषब्राह्मणरूपं गोत्रम्। तेन काश्यपो गोत्रं यस्य स काश्यपगोत्रः। प्रवरस्तु गोत्रप्रवर्तकस्य मुनेर्व्यावर्तको मुनिगण [5]इति माधवाचार्यः। एवञ्च यद्यपि राजन्यविशां प्रातिस्विकगोत्राभावात्[6] प्रवराभावस्तथापि पुरोहितगोत्रप्रवरौ वेदितव्यौ[7]। तथाच यजमानस्यार्षेयान् प्रवृणीतेत्युक्त्वा पौरोहित्यान्[8] राजन्यविशां प्रवृणीत इत्याश्वलायन इति[9] मिताक्षरा[10]।११॥

अत एव 'असमानार्षगोत्रजामिति ब्राह्मणादिवर्णत्रयविषयमि'ति सम्बन्धविवेकः (पृः ८)। तर्हि शूद्रस्य श्राद्धादावधिकारश्रुतेः कथं गोत्रोच्चारणमिति चेत्—

गोत्रं स्वरान्तं सर्वत्र गोत्रस्याक्षय्यकर्मणि ।
गोत्रस्तु तर्पणे प्रोक्तः कर्ता एवं न मुह्यति ।

---

[1]Referred to in the Parāśarabhāṣya of Mādhava. p. 62. Ācārakāṇḍa. (*Bombay ed.*). & Sambandha-viveka. p. 9.

[2]Omitted in B.

[3]*Vide* Parāśarabhāṣya. pp-71-72 (Ācārakāṇḍa).

The Baudhāyana Śrautasūtra (pravarādhyāya. 54.) has almost identical lines. There we find:

विश्वामित्रो जमदग्निर्भरद्वाजोऽथ गौतमः ।
अत्रिर्वशिष्ठः कश्यप इत्येते सप्त ऋषयः॥ तेषां सप्तर्षीणामगस्त्याष्टमानां यदपत्यं तद्गोत्रमुच्यते ।

[4]एवं in B.

[5]C. अपि. *Vide* Ācārakāṇḍa. p. 70. (Bombay Ed.).

[6]Omitted in A & B.

[7]Vide Āpastamba pravarakhaṇḍa : पुरोहितस्य प्रवरेण राजा प्रवृणीत इति विज्ञायते। (गोत्रप्रवरनिबन्धकदम्बम् p. 308, Ed. by P. Chentsalrao. 1900.) The idea is taken from Sambandha-viveka. p. 8.

[8]A & C. गोत्रप्रवरान्

[9]D. Āśvalāyana Śrauta Sūtra 1·3 (?).

[10]Vide his commentary on Yāj. smṛti. 1/53.

इति गोभिलीयदर्शनात्, आकाङ्क्षितत्वेन

शूद्राणां मासिकं कार्यं वपनं न्यायवर्तिनाम्।
वैश्यवच्छौचकल्पश्च द्विजोच्छिष्टन्तु[1] भोजनम्। (मः ५।१४०)

इति मनुवचने चकारसमुच्चितगोत्रेऽपि वैश्यधर्मातिदेशात् पूर्वपुरुषपुरोहितगोत्रभागित्वं प्रतीयते। तर्हि न सगोत्रां न समानप्रवरां भार्यां विन्देत—इत्यनेन शूद्रस्यापि सगोत्रा कथं न निषिध्यत इति चेदत्रोपदिष्टातिदिष्टगोत्रस्यैव[2] निषेधो न त्वतिदिष्टातिदिष्टशूद्रगोत्रादेः। अन्यथातिदेशे क्षत्रिय-वैश्यमात्रोपादानं व्यर्थं स्यात्।१२।।

एतन्न्यायमूलं प्रागुक्तमनुशातातपवचने द्विजातिग्रहणं सगोत्रावर्जने शूद्रव्यावृत्त्यर्थम्। सपिण्ड-समानोदकता तु शूद्रेऽप्यविशिष्टा। अन्यथा

पञ्चमात् सप्तमादूर्ध्वं मातृतः पितृतः क्रमात्।
सपिण्डता निवर्तेत सर्ववर्णेष्वयं विधिः।।

इति हरिनाथोपाध्यायधृतयमवचने चतुर्वर्णसाधारणवैवाहिकसापिण्ड्य[3]विवेचनं व्यर्थं स्यात्।१३।।

**बौधायनः**

सगोत्राञ्चेदमत्या उपयच्छेन्मातृवदेनां विभृयादिति। (२।१।३८)

सुमन्तुः

पितृष्वसृसुतां मातृष्वसृसुतां मातुलसुतां मातृसगोत्रां समानार्षेयीं विवाह्य चान्द्रायणं चरेत् परित्यज्य चैनां विभृयादिति। तथाचाचारमाधवीयमदनपारिजातयोरापस्तम्बः

समानगोत्रप्रवरां[4] कन्यामभ्युपगम्य च।
तस्यामुत्पाद्य चाण्डालं ब्राह्मण्यादेव हीयते।। (मदनपारिजातं Bib. Ind. पृः १३७)

समानप्रवरत्वं संख्यासंज्ञयोरन्यूनानतिरिक्तत्वेन बोध्यम्। समानप्रवरेऽपि गोत्रान्यत्वम्,[5] यथा वात्स्य-सावर्णगोत्रयोरौर्व्वच्यवनभार्गवजामदग्न्याप्नुवत्प्रवराः। एकगोत्रेऽपि प्रवरान्यत्वम्। यथा घृत-कौशिकगोत्रस्य कुशिककौशिकघृतकौशिकाः कौशिककुशिकबन्धुलाश्च प्रवराः। अतो गोत्रप्रवरयोः पृथक् निर्देशः[6]। सगोत्रासमानप्रवराग्रहणमविवाह्यस्त्रीमात्रोपलक्षणमिति प्रायश्चित्तविवेकः[7]। अतोऽसवर्णाविवाहेऽपि चान्द्रायणम्। 'चान्द्रायणेन चैकेन सर्वपापक्षयो भवे'दित्यापस्तम्बवचनात्। कलौ त्वसवर्णाया अविवाह्यत्वमाह वृहन्नारदीयम्

समुद्रयात्रास्वीकारः कमण्डलुविधारणम्।
द्विजानामसवर्णासु कन्यासूपयमस्तथा।।
देवरेण सुतोत्पत्तिर्मधुपर्के पशोर्वधः।
मांसादनं[8] तथा श्राद्धे वानप्रस्थाश्रमस्तथा।।

---

[1]A & C. ञ्च
[2]C. सगोत्रस्यैव
[3]B. सपिण्डता, C. सपिण्ड
[4]C & D. सगोत्रप्रवरां कन्यां समुद्वाह्योपगम्य च।
B. समानगोत्रप्रवरां समुद्वाह्योपगम्य च।
[5]गोत्रभेदेऽपि प्रवराभेदः D. गोत्रभेदे एकप्रवरत्वम् B.
[6]निषेधः in all printed texts.
[7]p. **444**.
[8]B मांसदानं; मांसादनं in printed texts.

दत्तायाश्चैव कन्यायाः पुनर्दानं वरस्य च।
दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ॥
महाप्रस्थानगमनं गोमेधञ्च तथा मखम्।
इमान् धर्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः॥ (२२-१३-१६)

मांसदनं गोमहिषादेः। हेमाद्रिपराशरभाष्ययोरादित्यपुराणम्—

दीर्घकालं ब्रह्मचर्यं धारणञ्च कमण्डलोः।
देवरेण सुतोत्पत्तिर्दत्ता[1] कन्या प्रदीयते॥
कन्यानामसवर्णानां विवाहश्च द्विजातिभिः।
आततायिद्विजाग्र्याणां धर्मयुद्धेन हिंसनम्।
वानप्रस्थाश्रमस्यापि प्रवेशो विधिदेशितः[2]॥
वृत्तस्वाध्यायसापेक्षमघसंकोचनन्तथा।
प्रायश्चित्तविधानञ्च विप्राणां मरणान्तिकम्॥
संसर्गदोषः पापेषु मधुपर्के पशोर्वधः।
दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः॥
शूद्रेषु दासगोपालकुलमित्रार्धसीरिणाम्।
भोज्यान्नता गृहस्थस्य तीर्थसेवातिदूरतः।
ब्राह्मणादिषु शूद्रस्य पक्वतादिक्रियापि च॥
भृग्वग्निपतनञ्चैव वृद्धादिमरणं तथा।

एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः।
निवर्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः॥
समयश्चापि साधूनां प्रमाणं वेदवद्भवेत्। इति[3]

समयः संवित् सा च प्रतिज्ञा 'समयाः शपथाचारकालसिद्धान्तसंविद' इत्यमरोक्तेः संविदागूः प्रतिज्ञानं नियमाश्रवसंस्रवा इति तेनैवोक्तेः[4]।१४॥

संसर्गदोषः पापेष्वित्यत्र विशेषयति पराशरः

त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत्।
द्वापरे कुलमेकन्तु कर्तारन्तु कलौ युगे॥ (१।२५)
कृते सम्भाषणादेव त्रेतायां स्पर्शनेन च।
द्वापरे [5]त्वर्थमादाय कलौ पतति कर्मणा॥ (१।२६)

देशं पापियुक्तदेशमेवमन्यत्रापि। कर्मणा वधादिकर्मणा इति माधवाचार्यः। वस्तुतस्तु कर्ता-

---

[1] A. दत्तकन्या

[2] C & D. विधिचोदितः

[3] A.

[4] A. C & D. इत्यमरोक्तेश्च

[5] त्वन्न in printed Parāśara Smṛti. 1/26.

रमित्यनेन कर्तृसंसर्गनिषेधात्। कर्मणेति सम्भाषणस्पर्शनधनग्रहणेतरयाजनादिगुरु[1]तरसंसर्गपरम्। अत एव स्कान्दे परदाराभिगामिनमुपक्रम्य

एतैः सह समायोगं यः करोति दिने दिने।
तुल्यतां याति विप्रेन्द्र, कलौ संवत्सरे गते॥

याज्ञवल्क्यटीकायां वृहस्पतिः कलावित्यधिकृत्य—

अनेकधा कृताः पुत्राः ऋषिभिर्यैः पुरातनैः।
न शक्यास्तेऽधुना कर्तुं [2]शक्तिहीनैरिदन्तनैः॥

(वृहस्पतिस्मृतिः संस्कारकाण्डम् नं २६९)

दत्तकपुत्रमाह याज्ञवल्क्यः

'दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्। (या-२।१३०)

तत्परिग्रहप्रकारमाह वशिष्ठः

शुक्रशोणितसम्भवः पुत्रो मातापितृनिमित्तकः (वः १५/१), तस्य प्रदानविक्रयत्यागेषु मातापितरौ प्रभवतः (१५/२)। नत्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा (१५/३)। स हि सन्तानाय पूर्वेषाम् (१५/४)। न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्तुः (१५/५)। पुत्रं प्रतिग्रहीष्यन् बन्धनाहूय राजनि निवेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा प्रतिगृह्णीयात् (१५/६)[2a]। अतः स्त्रिया अपि पत्यनुमत्या दानप्रतिग्रहयोः श्रुतेः प्रतिग्रहे हुत्वेति श्रवणात् व्रतप्रतिष्ठा[3] इव ब्राह्मणद्वारा होमेनाविरुद्धम्। एवं शूद्रस्यापीति। एतयोर्होमाधिकारः पश्चादुपपादयिष्यते। प्रपञ्चस्तु मलिम्लुचे[4]ऽनुसन्धेयः[5]।

गोत्ररिक्थे जनयितुर्न हरेद्दत्रिमः सुतः[5a]।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा॥ (म ५।१४२) इति मनूक्तेः।

अत्र स्वधाशब्दः पितृभक्ष्यार्थकः। तथा च गुणविष्णुधृता स्मृतिः[6]—'स्वधा वै पितृणामन्न'मिति। तथाच जनकगोत्ररिक्थाग्राहित्वेन तत्पिण्डस्वधापदवाच्य[7]श्राद्धाकर्तृत्वेन प्रतिग्रहीतुरेव गोत्रादिभागित्वं प्रतीयते दत्तक[8]पुत्रस्य।

---

[1]A. C & D. गुरु

[2]शक्तिहीनतया नरैः। in printed text.

[2a]A. इति।

पुत्रं प्रतिग्रहीष्यन्बन्धूनाहूय राजनि च निवेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा दूरबान्धवं बन्धुसन्निकृष्टमेव प्रतिगृह्णीयात्। Vas. 15/6. in printed text.

[3]C & D. व्रतप्रतिष्ठादिवत्

[4]मलमासतत्त्वे in C.

[5]Omitted in the text followed. Vide Malamāsatattva. p. 280-281. Syāmakānta's edition.

[5a]क्वचित्—in Manu's printed text.

[6]A & C. श्रुतिः

[7]C. प्रतिपाद्य

[8]A. दत्तकस्य प्रतीयते; C. दत्तपुत्रस्य प्रतीयते

कालिकापुराणे

औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च।

इत्यादीनुपक्रम्य

पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवीपते।
आचूड़ान्तं न पुत्रः स पुत्रतां याति चान्यतः॥
चूड़ाद्या यदि संस्कारा निजगोत्रेण वै कृताः।
दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते॥
ऊर्ध्वञ्च पञ्चमाद्वर्षान्न दत्ताद्याः सुता नृप।
गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमं चरेत्॥

औरसमाह बौधायनः

'सवर्णायां संस्कृतायां स्वयमुत्पादितमौरसं पुत्रं विद्यादिति। (२।२।१४)

अलम्[1] प्रकृतमनुसरामः। तत्र व्यास[2]:

सगोत्रां मातुरप्येके नेच्छन्त्युद्वाहकर्मणि।
जन्मनाम्नोरविज्ञानेप्युद्वहेदविशंकितः॥ (गृहस्थरत्नाकरः पृ:१०)

तेन मातामहसमानोदकापि न [3]विवाह्या इत्यर्थः। एतदेकवाक्यतया मनुवचने चकारानुषक्तं मातुरसगोत्रेति पदं मातामहसमानोदकापरम्।१५॥

यत्तु 'मातुः सपिण्डा यत्नेन वर्जनीया द्विजातिभि'रिति व्यास[4]वचनान्तरं तद्यत्नेनेतिग्रहणादतिशय-दोषार्थं मातृसपिण्ड[5]कन्यापरम्परायाः पञ्चमीपर्यन्ताया वर्जनार्थञ्च। केचित्तु एतद्वचनस्या-सुरादिविवाहपरत्वेन तादृग्विवाहे समानोदकापि विवाहेत्याहुः, तन्न प्रमाणाभावात्।

तथा[6] मत्स्यसूक्ते[7]

मातुर्यन्नाम[8] गुह्यं स्यात् सुप्रसिद्धमथापि वा।
तन्नाम्नी या भवेत् कन्या मातृनाम्नी प्रचक्षते॥
प्रमादाद्यदि गृह्णीयात् प्रायश्चित्तं समाचरेत्।
ततश्चान्द्रायणं कृत्वा तां कन्यां परिवर्जयेत्॥

---

[1]D; A. इत्यलम्, C. अतः

[2]Here Gṛhastharatnākara writes: 'इदञ्च व्यासाभिधानं हलायुधेन पुत्रिकापुत्र-विषयमिति यल्लिखितं तच्चिन्त्यं लक्ष्मीधराद्यस्वरसात्।' (p. 10).

[3]A. C & D. अविवाह्या

[4]Vide Gṛhastharatnākara p. 11. Here Nirṇayasindhu says (p. 206): यच्च 'मातुः सपिण्डा······द्विजातिभिः' इति तद्गान्धर्वादिविवाहोढ़मातृविषयम्, तत्र पितृगोत्रानिवृत्तेः। अत एव मार्कण्डेयपुराणम्—

गान्धर्वादिविवाहेषु पितृगोत्रेण धर्मवित्' इति। ब्राह्मादिविवाहे तु परिणेयैवेति।

[5]A. C & D. सन्तति

[6]D.

[7]A & D. महातन्त्रे

[8]C. यन्मातुर्नाम

यत्तु

मातृनाम्नी यदा कन्या विवाहे कुलजा हि सा ।
विप्रैर्नामान्तरं कार्यं तस्याः पित्रोरनुज्ञया ॥

इति राजमार्तण्डवचनं[1] तद्वाग्दानोत्तरज्ञाने[2] बोध्यम् । अन्यथा पूर्वोक्तनिषेधवैयर्थ्यापत्तेः[3] ।१६॥

गृहस्थरत्नाकरः[4]

त्रिविवाहं कृतं येन न करोति चतुर्थकम् ।
कुलानि पातयेत् सप्त भ्रूणहत्या दिने दिने[5] ॥

एतद्वर्तमानस्त्रीत्र[6]यपरमिति वदन्ति ।

अत्र पितृबन्धुमातृबन्धुसप्तमीपञ्चमीपरिहारे पितृबन्धुमातृबन्धुविरहेऽपि तयोर्योग्यतामवलम्ब्य सप्तमीपर्यन्तायाः पञ्चमीपर्यन्तायाश्च कन्यायाः परीहारः । अन्यथा पितृमातामहमातृमातामह-प्रभृतिपूर्वतनपञ्चत्रिकपुरु[7]षस्यान्यतममादायाधस्तनसप्तपञ्चमान्तर्गतायाः कन्यायाः पितृबन्धुमातृ-बन्धुसत्त्वे विवाहाभावः, तदसत्त्वे विवाह इति महाजनविरोधः स्यात् । एष एवार्थो याज्ञवल्क्य-टीकायां शूलपाणिमहामहोपाध्यायैः 'एतेन पितुर्मातुश्च मातामहोपरितनपञ्चत्रिक[8]पुरुषेष्वपि पितृबन्धुमातृबन्धुनिपातेऽपि न विवाह' इत्यनेन निर्दिष्ट इति ।१७॥

एवञ्च पितुर्मातुश्च मातामहकन्यान्तरसत्त्वे तस्याः कन्यायाः परतः तत्सहित[9] सप्तमी पञ्चमी पर्यन्तायाः परीहारः । एवं बन्ध्वन्तरेऽप्यूह्यम् । अत्र सप्तमगणनप्रतियोगिपितृपितृबन्धुपञ्चमगणन-प्रतियोगिमातामहमातृबन्धुगोत्र[10]मादायैव प्रतिप्रसवे त्रिगोत्रगणनम्, न तु वरगोत्रापेक्षया तस्य गणनायामप्रतियोगित्वात् । न वा तच्चतुष्टय[11]गोत्रं परित्यज्य त्रिगोत्रगणनं तथात्वे शूलपाण्युक्तं[12] पञ्चमीकन्यायाः विवाहाभ्यनुज्ञानं नोपपद्येत । न च तदेवायुक्तमिति वाच्यम्, मर्यादाभिविधिसन्देहे कार्यान्वितत्वेनाभिविधेरेव युक्तत्वात् ।

---

[1]D. राजमार्तण्डीय C. मार्कण्डेय

[2]D. तददत्ताकालीननामविषयं वाग्दानोत्तरनामज्ञानं वा

[3]Omitted in D.

[4]D. गृहस्थरत्नाकरे

[5]व्रतञ्चरेत्

[6]A. त्रिक

[7]Omitted in C.

[8]Omitted in A. C & D.

[9]A & D.

[10]A. बन्धुरूपगोत्रचतुष्टयम्

[11]A. चतुष्टयपितृपितृबन्धुमातामहमातृबन्धुगोत्रम्

[12]A & C. महामहोपाध्यायोक्तम्

तद्यथा-'सन्निकर्षेऽपि कर्तव्यं त्रिगोत्रात् परतो यदि,' इति मत्स्यपुराणवचनम्[1]। सन्निकर्षेऽपि प्रतियोगिचतुष्टयापेक्षया सप्तमपञ्चमाभ्यन्तरेऽपि। वृहन्मनुरपि

असम्बन्धा भवेद्यातु पिण्डेनैवोदकेन वा।
सा विवाह्या द्विजातीनां त्रिगोत्रान्तरिता च या॥१८॥

एवं प्रतियोगिचतुष्टयापेक्षया सप्तमपञ्चमगणने पूर्वत्र यतो यतः सन्तानभेदस्तं तमादाय गणयेत् परत्र तच्चतुष्टयमादाय गणयेत् यावत्सप्तमं यावत्पञ्चमञ्च।

यथा विश्वरूपसमुच्चये

एवमुक्तप्रकारेण पितृबन्धुषु सप्तमात्।
ऊर्ध्वमेव विवाह्यत्वं पञ्चमान्मातृबन्धुतः॥
सन्तानो भिद्यते यस्मात् पूर्वजादुभयत्र च।
तमादाय गणेद्धीमान् वरं यावच्च कन्यकाम्॥

वरं यावदिति तु मातामहपक्षे सुमन्तूक्तसप्तमादिगणनस्य वरा[2]पेक्षितत्वेन तत्परम्। अत्र पूर्वजादित्युपादानात् पितृबन्धुमातृबन्ध्वपेक्षया पूर्वेषां षण्णां चतुर्णां प्रत्येकापेक्षया सप्तमपञ्चमोर्ध्वत्वम्। बन्धूनां परतस्तु न प्रत्येकापेक्षया किन्तु बन्ध्वपेक्षयैव सप्तमपञ्चमोर्ध्वत्वं गणनायां बोध्यम्। एवं यस्य सापिण्ड्यं विविच्यते तस्य तद्गणनायां पूर्वेषां षण्णां प्रत्येकापेक्षया तत्परजातसप्तमा[3]-न्यतमान्तर्भावः। परेषां षण्णां तु प्रत्येकापेक्षया न गणना किन्तु स्वमात्रपेक्षयैव। अन्यथा स्वापेक्षयाधस्तनाष्टमस्य स्वपुत्रापेक्षया सप्तमान्तर्गतत्वात् सापिण्ड्यं स्यात्। अत एव स्वापेक्षया प्राक्तना[4]ष्टमस्य स्वपित्राद्यपेक्षया सप्तमान्तर्गतस्यापि न सापिण्ड्यं पिण्डतल्लेपदातृत्वभोक्तृत्वरूप-सम्बन्धाभावात्। अत एव द्वैतनिर्णयेऽपि सापिण्ड्यगणने बीजिनमारभ्येत्युक्तम्। एवं माता-महाद्यपेक्षया पञ्चमगणनेऽपि बोध्यम्। अत्र च पितृबन्धुमातृबन्धुपूर्वेषां वर्जने पितृबन्धुत्वसम्बन्ध-बीजीभूतानां पितुः पितामहादिमातामहादीनां मातृबन्धुत्वसम्बन्धबीजीभूतानां मातुः पितामहादि-मातामहादीनां च पुरुषपरम्पराणामेव ग्रहणम्, न तु पितृमातुलपुत्रमातृमातुलपुत्रेतरपितृबन्धुमातृ-बन्धुपितृप्रभृतीनां ग्रहणं सम्बन्धबीजित्वायोगादिति।१९॥

बन्ध्वपेक्षया गणनेऽपि पूर्वेषां [5]तत्तत्सन्तानभेदकानां सप्तमपञ्चमान्तर्गतानां बीजिनां पुंसामेव ग्रहणं, न तूपदिष्टपितृबन्धुमातृबन्धुमातृव्यतिरिक्तानां मातामह्यादिपितामह्यादिस्त्रीपरम्पराणां ग्रहणम्, 'आसप्तमात् पञ्चमाच्च बन्धुभ्यः पितृमातृतः' इति नारदवचने पुंस्त्वस्य विधेयविशेषण-त्वेन विक्षितत्वात्। एवमेव विवाहतत्त्वार्णवः। अत्र यद्यपि पितामहस्वसृपुत्ररूपबन्धोर्ये मातामहा-द्यास्ते पितृसपिण्डत्वेन निषिद्धाः, तथापि तद्बन्धूपादानं तदपेक्षयाध[6]स्तनसप्तमनिषेधाय। एवं

---

[1]Nirṇaya sindhu quotes it as the opinion of Devala. See. Chap. III. p. 205.

[2]D. वरापेक्षत्वेन

[3]D. सप्तान्यतमस्यान्तर्भावः

[4]D. पूर्वतनाष्टमस्य

[5]C. सप्तमपञ्चमनिषेधाय

[6]A. परतन

यद्यपि मातामहस्वसृपुत्ररूपबन्ध्वोर्ये मातामहाद्यास्ते वरस्य[1] मातामहसपिण्डत्वेन निषिद्धास्तथापि तदु[2]पादानं तदपेक्षयाधस्तनपञ्चमनिषेधाय।

अत्र यद्यपि पितुर्मातृष्वसृपुत्रस्य[3] ये मातामहाद्यास्ते पितुर्मातुलपुत्रस्यापि पितामहाद्या एवेति प्राक्तने पृथगुपादानं व्यर्थं तथापि पूर्ववदधस्तनतत्तत्सप्तमवर्जनाय[4]। एवं तद्रूपमातृबन्धुद्वयोपादनं तदपेक्षयाधस्तनतत्तत् पञ्चमवर्जनाय। तथा सप्तमपञ्चममध्ये पुरुषाणां पुरुषान्तरेण विवाह्यत्वाप्रसक्तेः, तत्परम्पराजातायाः कन्यायाः सप्तमपञ्मान्तर्गताया अविवाह्यत्वं ज्ञेयम्। अत एव मार्कण्डेयपुराणम्—'नोद्वहेत् पितृमात्रोस्तु सप्तमीं पञ्चमीं तथा,' इत्यत्र स्त्रीत्वेन निर्देशः[5]।२०॥

अत्रैवं संक्षेपः। पितृपितामहादीनां सप्तानां[6] सन्ततिः सप्तमीपर्यन्ता नोद्वाह्या। मातामहप्रमातामहादीनां पञ्चानां सन्ततिः पञ्चमीपर्यन्ता नोद्वाह्या। एवं पितृबन्धुप्रभृतिसम्बन्धघटकानां सप्तानां सन्ततिः सप्तमीपर्यन्ता नोद्वाह्या। एवं मातृबन्धुप्रभृतिसम्बन्धघटकानां पञ्चानां सन्ततिः पञ्चमीपर्यन्ता नोद्वाह्या। बन्धुतन्मात्रोरसत्त्वेपि पितृमातामहमातृमातामहप्रभृत्युपरितनानां पञ्चानां त्रयाणां सप्तमीपञ्चमीपर्यन्ता च नोद्वाह्या। एवञ्च पितुर्मातुश्च मातामहकन्यान्तरसत्त्वे तामादाय परतः सप्तमीपञ्चमीपर्यन्तायाः परीहारः। एवं बन्ध्वन्तरेऽप्यूह्यम्। बन्ध्वपेक्षया त्रिगोत्रगणनं परतः सर्वत्र। पूर्वतस्तु पितुर्मातुश्च मातुलपुत्ररूपबन्ध्वोरपि स्वापेक्षया अन्येषां बन्धूनां मातामहगोत्रापेक्षया त्रिगोत्रगणनं सर्वसामञ्जस्यं स्याद्, अन्यथा पितुः प्रपितामहदौहित्रीकन्यायाः पितामहभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् पराया विवाहः प्रसज्येत। स चायुक्तः, पितृगोत्रापेक्षया तस्यास्त्रिगोत्रमध्यवर्तित्वात्।

एवं पितुः प्रमातामहदौहित्रीकन्यायाः पितामहीभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् पराया विवाहः प्रसज्येत स चायुक्तः पितामहीभ्रातृपुत्रबन्ध्वपेक्षया तस्यास्त्रिगोत्रमध्यवर्तित्वात्। एवं मातुः प्रपितामहदौहित्रीकन्यायाः मातामहभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् पराया विवाहः प्रसज्येत स चायुक्तः, वरस्य मातामहापेक्षया तस्यास्त्रिगोत्रमध्यवर्तित्वात्। एवं वरस्य मातुः प्रमातामहदौहित्रीकन्याया मातामहीभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् पराया विवाहः प्रसज्येत, स चायुक्तः मातामहीभ्रातृपुत्रबन्ध्वपेक्षया तस्यास्त्रिगोत्रमध्यवर्तित्वादिति। मातृसपत्नीभ्रातृसन्ततिरपि न विवाह्या इत्याह सुमन्तुः, पितृमातृसम्बन्धादासप्तमादविवाह्याः कन्या भवन्ति आपञ्चमादन्येषाम्। सर्वाः पितृपत्न्यो मातरस्तद्भ्रातरो मातुलास्तद्दुहितरो भगिन्यस्तदपत्यानि भागिनेयानि ताश्चाविवाह्याः, अन्यथा संकरकारिण्यस्तथाध्यापयितुरेतदेवेति। यद्यपि तेषां मातुलत्वेनार्थात्तद्दुहितृतदपत्ययोर्भगिनीत्वभागिनेयीत्वे, तथापि तदुपादानं तयोरेव वर्जनार्थम्, अन्यार्थं पुनर्वचनमिति दर्शनात्। अन्यार्थं तदितरार्थमधिकार्थमिति यावत्।

---

[1]A.

[2]A & C. तद्बन्धूपादानं

[3]C. पुत्ररूपबन्धोः

[4]A & D. निषेधाय

[5]A & D. 'सप्तमीं पञ्चमीं परिहृत्ये'ति शेषः।

[6]C. प्रत्येकम्।

अतिदिष्टत्वेन च मुख्यमातुलतो जघन्यता युक्तेति। अन्यथा एताः कन्याः परिणीताः संकरात्मकाधर्मकारिण्यो भवन्ति। तथाध्यापयितुस्तद्विवाहमन्त्राध्यापयितुरेतदेव संकरकारित्वमेवेत्यर्थः इति रत्नाकरः (पृः ११)। अन्यथा इत्यत्र ताः परिणीता इति पठितं व्याख्यातञ्च हरिनाथोपाध्यायैः ताः कन्यका विवाहिता इति स्मृतिसारे[1]।२१॥

वस्तुतस्तु अध्यापयितुर्गुरोस्तथा कन्या उद्वाहिता एतदेव संकरात्मकाधर्मकारित्वं भजन्ते एवेत्यर्थः। अत एवादिपर्वणि—

प्रस्थितं त्रिदशावासं देवयान्यब्रवीदिदम्। (आदि ७१।१)
गृहाण विधिवत्पाणिं मम मन्त्रपुरस्कृतम्॥ (आदि ७१।५)

कच उवाच

त्वं भद्रे धर्मतः पूज्या गुरुपुत्री सदा मम। (७१।७)
यथा मे स गुरुर्नित्यं मान्यः शुक्रः पिता तव॥
देवयानि तथैव त्वं नैवं मां वक्तुमर्हसि॥ (७१।८)
गुरुपुत्रीति कृत्वाहं प्रत्याचक्षे न दोषतः॥ (७१।१७)

दोषतो दृष्टदोषतः। व्यक्तं मत्स्यसूक्ते

समानप्रवरा वा[2]पि शिष्यसन्ततिरेव च।
ब्रह्मदातुर्गुरोश्चैव सन्ततिः प्रतिषिध्यते॥

काश्यपः

सप्त पौनर्भवाः कन्या वर्जनीयाः कुलाधमाः।
वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला॥
उदकस्पर्शिता या च या च पाणिगृहीतिका।
अग्निं परिगता या तु पुनर्भूप्रसवा च या॥
इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवत्॥

कृतकौतुकमङ्गला बद्धकंकणा, उदकस्पर्शिता उदकस्पर्शपूर्वकं दत्ता इति रत्नाकरः। हारीतः, ज्येष्ठेऽनिर्विष्टे कनीयान् निर्विशन् परिवेत्ता भवति परिविन्नो ज्येष्ठः परिवेदनीया कन्या परिदायी दाता परिकर्ता याजकः ते सर्वे पतिताः। ज्येष्ठमाह देवलः—

बहिर्वर्णेषु चारित्र्याद्यमयोः पूर्वजन्मतः।
यस्य जातस्य यमयोः पश्यन्ति प्रथमं मुखम्॥
सन्तानः पितरश्चैव तस्मिन् ज्यैष्ठं प्रतिष्ठितम्।

जन्मप्राथम्याज्जौष्ठ्यं यमजयोर्न तु निषेकप्राथम्यात् जन्मप्राथम्यसन्देहे मुखदर्शनप्राथम्यादेव ज्यैष्ठ्यं प्रतिष्ठितम्; तस्मिन् सन्तानः प्रतिष्ठितः पितरश्च प्रतिष्ठिताः। अनिर्विष्टे अकृतविवाहे अकृताग्निहोत्रे च। निष्ठानिर्देशादेकदापि ज्येष्ठकनिष्ठाभ्यां विवाहो न कर्तव्यः। अग्निहोत्रञ्च न कर्तव्यम्।

---

[1]A. स्मृतिसागरे

[2]A. C & D. चापि

कालादर्शे वार्हस्पत्यम्—

एकोदरप्रसूतानामेकस्मिन्नपि [1]वासरे।
विवाहो नैव कर्तव्यो गर्गस्य वचनं यथा॥
(संस्कारकाण्डे श्लो: ३८०)

मत्स्यसूक्तमहातन्त्रे[2]ऽपि—

एकस्मिन् दिवसे चैव सोदराणां तथैव च।
यौग्ममौद्वाहिकं वर्ज्यं कन्यादानद्वयं तथा॥

पूर्ववचने वासर इत्यत्र वत्सर इत्यौड्रदेशीयाः पठन्ति व्यवहरन्ति च[3]।२२॥

छन्दोगपरिशिष्टम्—

देशान्तरस्थक्लीवैकवृषणानसहोदरान्।
वेश्याभिषक्तपतितशूद्रतुल्यातिरोगिणः॥
जडमूकान्धबधिरकुब्जवामनकुण्ठकान्।
अतिवृद्धानभार्यांश्च कृषिसक्तान्नृपस्य च॥
धनवृत्तिप्रसक्तांश्च कामतः कारिणस्तथा।
कुलटोन्मत्तचौरांश्च परिविन्दन्न दुष्यति।
धनवार्धुषिकं राजसेवकं कर्षकन्तथा।
प्रोषितञ्च प्रतीक्षेत वर्षत्रयमपि त्वरन्॥
प्रोषितं यद्यशृण्वानमब्दादूर्ध्वं समाचरेत्।
आगते च पुनस्तस्मिन् पादं तच्छुद्धये चरेत्॥
(प्रथमप्रपाठकः षष्ठः खः ४-८)

देशान्तरपरिभाषायां वृहन्मनुः—

वाचो यत्र विभिद्यन्ते गिरिर्वा व्यवधायकः।
महानद्यन्तरं यच्च तद्देशान्तरमुच्यते॥
देशनामनदीभेदान्निकटोऽपि भवेद्यदि।
तत्तु देशान्तरं प्रोक्तं स्वयमेव स्वयम्भूवा॥
दशरात्रेण या वार्ता यत्र न श्रुयतेऽथवा।

---

[1]वत्सरे in printed text.

[2]A. मत्स्यसूक्तेपि।

[3]A. adds the line: अपवादमाह यमः—पितृव्यपुत्रान् सापत्नान् परनारीसुतांस्तथा।
वेदाग्निहोत्रसंयोगे न दोषः परिविन्दति॥

परनारीसुता दत्तकादिभ्रातरः।

वृहस्पतिः—

देशान्तरं वदन्त्येके षष्टियोजनमायतम्।
चत्वारिंशद्वदन्त्येके त्रिंशदेके तथैव च॥ (अशौचकाण्डे–श्लोः २६)

मुनिद्वय[1]वचनोक्तवागादियोजनादिभेदानां सामञ्जस्यार्थमेवं व्याख्यायते। त्रितयवैशिष्ट्ये त्रिंशद्योजनाभ्यन्तरे द्वितयवैशिष्ट्ये तदुपरि, एकवैशिष्ट्ये चत्वारिंशद्योजनोपरि वाणीगिरिमहानद्यन्तरितत्वभेदाभावे तु षष्टियोजनोपरि वैदेश्यमिति चिन्तामणिः[2]।

क्लीवमाह कात्यायनः—

न मूत्रं फेनिलं यस्य विष्ठा चाप्सु निमज्जति।
मेढ्रञ्चोन्मादशुक्राभ्यां हीनं क्लीवः स उच्यते॥ (८६१)

एकवृषण एकाण्डः पशुविशेषः इति रत्नाकरः।

शूद्रतुल्यमाह मनुः—

गोरक्षकान् वाणिजिकान् तथा कारुकुशीलवान्।
प्रैष्यान् वार्धुषिकांश्चैव विप्रान् शूद्रवदाचरेत्॥ (म–८।१०२)

जडो विकलान्तःकरणः हिताहितावधारणाक्षम इति मिताक्षरा। कुण्ठः सर्वक्रियालसः, 'कुण्ठो मन्दः क्रियासु य' इत्यमरोक्तेः।२३॥

अभार्यांश्च शास्त्रनिषिद्धभार्यासम्बन्धान् नैष्ठिकब्रह्मचारिवानप्रस्थभिक्षुस्वरूपान्। नृपस्य चेति चकारेण सक्तानित्यनुषज्यते[3]। कामतः कारिणः श्रौतस्मार्तनिरपेक्षस्वच्छन्दव्यवहारिणः। कुलटः कुलान्यटतीति परकुलाटनशील इति नारायणोपाध्यायाः। तेषामयमाशयः, परकुलं परगोत्रमटति गच्छति प्राप्नोति यो दत्तकः स कुलटः। चौरानित्यत्र पौरानिति पाठे पुरजनप्रैष्यान्। धनवार्धुषिकादित्रयं देशान्तरस्थितं च ज्येष्ठं त्वरन्नपि वर्षत्रयं प्रतीक्षेत। ततश्च पूर्ववचन एतान् परिविन्दन्न दुष्यतीत्युक्तम्। अत्र परेर्लक्षणार्थत्वाद्द्वितीया। तेन देशान्तरस्थकृषिसक्तनृपसक्तधनवृद्धिप्रसक्तान् प्रति वर्षत्रयादूर्ध्वमिति बोद्धव्यम्। अत्रापि प्रोषिते यत त्र्यब्दप्रतीक्षणमुक्तं तद्विद्याधर्मधनेतरार्थप्रोषितपरं वक्ष्यमाणवशिष्ठगौतमवचनात्। अशृण्वान प्रत्ययव्यत्ययेनाश्रूयमाणमिति परि[4]शिष्टप्रकाशः। अशृण्वन् इति पाठस्तु, रत्नाकरे। प्रोषितस्य कल्याणवार्तामशृण्वन् वर्षं प्रतीक्ष्य परिणयनं यदि करोति तत्र समागते ज्येष्ठे परिवेदनपापशुद्धये कृच्छ्रपादं कुर्यात्[5]।

---

[1]A & D; E 'त्रय'

[2]C. शुद्धिचिन्तामणिः।

[3]A & D. अनुकृष्यते

[4]Omitted in D.

[5]A. चरेत्

D. (त्र्यहः साध्यकृच्छ्रपादव्रताशक्तौ पादोनकार्षापणो देयः।)

C adds here: प्रायश्चित्तसंकलनयेति, एवमन्यत्रापि प्रायश्चित्तसंकलनान्वेष्या।

वशिष्ठः

अष्टौ दश द्वादशवर्षाणि ज्येष्ठं भ्रातरमनिर्विष्टमप्रतीक्षमाणः प्रायश्चित्ती भवति। तत्र श्लोकौ

[1]द्वादशैव तु वर्षाणि ज्यायान् धर्मार्थयोर्गतः।
न्याय्यः प्रतीक्षितुं भ्रात्रा श्रूयमाणः पुनः पुनः।
उन्मत्तः किल्विषी कुष्ठी पतितः क्लीव एव वा।
राजयक्ष्मामयावी च न न्याय्यः स्यात् प्रतीक्षितुम्।

गौतमः—'द्वादशवर्षाणि प्रतीक्षणं[2] ब्राह्मणस्य विद्यासम्बन्धे,' (२/९/१७) 'भ्रातरि चैवं ज्यायसि, यवीयान् कन्याग्न्युपयमेषु' (२//९/१८) 'षडित्येके' (२/९/१९) इति। विद्यार्थं प्रोषितस्य ब्राह्मणस्य दारा अपत्योत्पादनार्थं तदभिगमने द्वादशवर्षाणि प्रतीक्षेरन्नित्युक्त्वा भ्रातरि चैवमित्यनेन सर्वमतिदिष्टमिति। एतेनैतदवसीयते विद्याधर्मार्थगतानां ब्राह्मणक्षत्रियवैश्यशूद्राणां क्रमशो द्वादशदशाष्टषड्वर्षाणि क्षपण[3]मिति प्रायश्चित्तविवेकः[4]। रत्नाकरकृद्भिस्तु श्रूयमाणेऽभिमुखगमनं प्रव्रजिते गमनस्य निवृत्तिः प्रसङ्गादित्यधिकं गौतमीयं विलिख्य प्रोषिते ज्येष्ठे भ्रातरि विवाहाग्न्याधाने कारयितुमभिमुखगमनं यवीयसा कर्तव्यं कृतसन्न्यासे च ततो निवृत्तिरिति व्याख्यातम्[5]। शातातपः

क्लीवे देशान्तरगते पतिते भिक्षुकेऽपि वा।
योगशास्त्राभियुक्ते च न दोषः परिवेदने॥[6]

योगशास्त्राभियुक्ते विषयात्यन्त[7]विरक्ते इति रत्नाकरः।२४॥

अत एव दक्षः

वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि।
एकीकृत्य विमुच्येत योगोऽयं मुख्य उच्यते॥ (७।१५)

तेन विषयानासक्तमनसा जीवपरमात्मनोरभेदचिन्तनविशेषो योग इति। छन्दोगपरिशिष्टम्

नाग्नयः परिविन्दन्ति न यज्ञा न तपांसि च।
न च श्राद्धं कनिष्ठस्य या च कन्या विरूपिका॥

---

[1]The verse has been quoted in Haradatta's 'Mitākṣarā commentary on Gautama Dharma Sūtra 2/9/18.

[2]Omitted in printed Gau.

[3]C. प्रतीक्षणम्

[4]Vide प्रायश्चित्तविवेक (Calcutta Skt. Press Depository) P. 432.

[5]Gṛhastha ratnākara. P. 89.

[6]*Referred to in Gṛhastha ratnākara (p. 89).*

[7]C. विषयान्तरविविक्ते

विकला या च कन्यकेति पाठः शातातपीये। नाग्नयः परिविन्दन्ति इति ज्येष्ठानुमत्या। यथोशनाः[1]

ज्येष्ठभ्राता यदा तिष्ठेत् आधानं नैव कारयेत्[2]।
अनुज्ञातस्तु कुर्वीत शंखस्य वचनं यथा॥

वशिष्ठः

अग्रजस्तु यदानग्निरधिकार्यनुजः कथम्।
अग्रजानुमतः कुर्यादग्निहोत्रं यथाविधि॥

एतेन विवाहस्त्वनुमत्यापि दोषायेति प्रायश्चित्तविवेकः[3]। विकृतरूपा कन्याऽनूढा ज्येष्ठा कनिष्ठायाः सोदरायाः उढायाः परिवेदनाय न भवति, अप्रसक्तनिषेधानुपपत्त्या नञः पर्युदासवृत्तित्वादेत अतिरिक्तायाः परिवेदने दोष इति परिशिष्टप्रकाशः। देवलस्त्वत्र विषये अग्रेदिधिषुत्वमाह

ज्येष्ठायां विद्यमानायां कन्यायामुह्यतेऽनुजा।
सा चाग्रेदिधिषुर्ज्ञया पूर्वा च दिधिषुः स्मृता॥[4]

विद्यमानायामित्यत्र यद्यनूढायामिति लौगाक्षिः। प्रायश्चित्तमाह वशिष्ठः,

अथाग्रेदिधिषुपतिः कृच्छ्रं द्वादशरात्रं चरित्वा निर्विशेत् ताञ्चोपयच्छेत् (२०।९)। दिधिषुपतिः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्वा पुनर्निर्विशेदिति (२०।१०)। कृच्छ्रं द्वादशरात्रं पापस्य गुरुत्वात् पराकरूपम्। निर्विशेदन्यामुद्वहेत् तां कनिष्ठां ज्येष्ठाया वराय उपयच्छेत्। एवं ज्येष्ठामपि कनिष्ठाया वराय। एतच्चानुमत्यर्थं शास्त्रेणोक्तं न तु तयोरप्यभिगमः। परिवेदनाधिकारे 'न भूयश्चैनामुपयच्छे'दिति सुमन्तुवचनात्। भवदेवभट्टधृतम्—परित्यक्ता च सा पोष्या भोजनाच्छादनेन[5] च।

अङ्गिराः

आवृत्ते तीर्थगमने प्रतिज्ञाते च कर्मणि।
कालात्यये च कन्यायाः कालदोषो न विद्यते॥
अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी।
दशमे कन्यका प्रोक्ता अत ऊर्ध्वं रजस्वला॥
तस्मात् संवत्सरे प्राप्ते दशमे कन्यका बुधैः।
प्रदातव्या प्रयत्नेन न दोषः कालदोषजः॥

कालदोषस्य विषयो राजमार्तण्डीये व्यक्तीभविष्यति।२५॥

यमः

कन्या द्वादशवर्षाणि याऽप्रदत्ता वसेद् गृहे।
ब्रह्महत्या पितुस्तस्याः सा कन्या वरयेत् स्वयम्[6]॥

---

[1]Referred to in Prāyaścittaviveka—p. 436.

[2]A & D. चिन्तयेत्

[3]p. 436.

[4]The verse has also been quoted by Śulapāṇi in his Prāyaścittaviveka. p. 435.

[5]C भोजनाच्छादनेपि च।

[6]Also referred to in Gṛhastharatnākara p. 43.

अङ्गिराः

प्राप्ते तु द्वादशे वर्षे यदा कन्या न दीयते।
तदा तस्यास्तु कन्यायाः पिता पिवति शोणितम् ॥

राजमार्तण्डे

संप्राप्ते द्वादशे वर्षे कन्यां यो न प्रयच्छति।
मासि मासि रजस्तस्याः[1] पिता पिवति शोणितम् ॥ (श्लो ३९३)
माता चैव पिता चैव ज्येष्ठभ्राता तथैव च।
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥ (श्लो ३९४)
यस्तां विवाहयेत् कन्यां ब्राह्मणो मदमोहितः।
असम्भाष्यो ह्यपाङ्क्तेयः स ज्ञेयो[2] वृषलीपतिः। (श्लो ३९६)

महाभारते

त्रिंशद्वर्षः षोडशवर्षां भार्यां विन्देत नग्निकाम्।
अतोऽप्रवृत्ते रजसि कन्यां दद्यात् पिता सकृत् ॥
महदेनः . स्पृशेदेनमन्यथैष विधिः सताम्।

नग्निकानागतार्तवा। अन्यथा प्रवृत्ते रजसि

अत्रिकाश्यपौ

पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता।
भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता ॥
यस्तु तां वरयेत् कन्यां ब्राह्मणो ज्ञानदुर्बलः।
अश्रद्धेयमपाङ्क्तेयं तं विद्यात् वृषलीपतिम् ॥[3]

यत्तु मनुवचनम्

काममामरणात्तिष्ठेद् गृहे कन्यर्तुमत्यपि।
न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित् ॥ (म ९।८९) इति

तत् स्वोक्तगुणहीनमात्र[4]सद्भावविषयम्। अत एव गुणवते अष्टवर्षन्यूनापि देयेत्याह मनुः।

उत्कृष्टायाभिरूपाय वराय सदृशाय च।
अप्राप्तामपि तां कन्यां तस्मै दद्याद्यथाविधि ॥ (म ९।८८)

अप्राप्ताम् अप्राप्तविवाहप्रशस्तकालाम्।

स्मृतिसारे

सप्तसम्वत्सरादूर्ध्वं विवाहः सार्ववर्णिकः।
कन्यायाः शस्यते राजन्नन्यथा धर्मगर्हितः ॥

---

[1] रजःप्राप्तौ in printed text.

[2] विप्रो in printed text.

[3] Referred to in Gṛhastharatnākara pp. 44-45.

[4] C adds निन्दा.

राजमार्तण्डे

अयुग्मे दुर्भगा नारी युग्मे च विधवा भवेत् ।
तस्माद्गर्भान्विते युग्मे विवाहः शोभनो मतः[1] ॥ (श्लो ३८१)

मासत्रयादूर्ध्वमयुग्मवर्षे युग्मेऽपि मासत्रयमेव यावत् । 'विवाहशुद्धिं प्रवदन्ति सर्वे वात्स्यादयो ज्योतिषि जन्ममासात्' अत्र युग्मायुग्मग्रहणं प्रसवाधानापेक्षया 'प्रसूत्याधानतः शुद्धिर्विषमेऽब्दे समे क्रमा'दिति मनूक्तेः ।[2] २६॥

मासदोषमाह वात्स्यायनः

आषाढे धनधान्यभोगरहिता नष्टप्रजा श्रावणे ।
वेश्या भाद्रपदे इषे च मरणं रोगान्विता कार्तिके ॥
पौषे प्रेतवती वियोगबहुला चैत्रे मदोन्मादिनी ।
अन्येष्वेव विवाहिता सुतवती नारी समृद्धा भवेत् ॥[3]
राजग्रस्ते तथा युद्धे पितॄणां प्राणसंशये ।
अतिप्रौढा च या कन्या नानुकूल्यं प्रतीक्षते ॥
अतिवृद्धा च या कन्या कुलधर्मविरोधिनी ।
अविशुद्धापि सा देया चन्द्रलग्नबलेन तु ॥[4]

भुजबलभीमः

ग्रहशुद्धिमब्दशुद्धिं शुद्धिं मासायनर्तुदिवसानाम् ।
अर्वाग्दशवर्षेभ्यो मुनयः कथयन्ति कन्याकानाम् ।

दशवर्षाभ्यन्तरे शुद्धौ ग्रहाब्दादीनां विशेषोपादानात् तदूर्ध्वं न तावन्मात्रनियमः ।

अत्रैव विषये

माङ्गल्येषु विवाहेषु कन्यासम्बरणेषु च ।
दशमासाः प्रशस्यन्ते चैत्रपौषविवर्जिताः ॥[5] (श्लो ४६६)

---

[1]अयुग्मेऽविधवा नारी युग्मे च विधवा भवेत् ।
तस्माद्गर्भान्विते युग्मे विवाहे सा पतिव्रता ॥ in printed text.
(Venkatesvara Edition—sl. 381.)

[2]The sentence is omitted in A. C. & D.

[3]The verse with slight variation in reading appears in Rājamārtaṇḍa of Sri Bhojarāja. (Venkateśvara edition, sl. 469.)

[4]The two verses appear in Rājamārtaṇḍa, (sls. 397-398,) with variations in reading.

[5]मङ्गलेषु विवाहेषु कन्याया वरणेषु च ।
प्रशस्तमासाः शंस्यन्ते चैत्रपौषविवर्जिताः ॥ verse in printed text. [sl. 466]

इति राजमार्तण्डोक्तं सङ्गच्छते। एतदेकवाक्यतया पूर्ववचने अविशुद्धा इति एतावन्मात्रपरं न तु मलमासशुक्रास्तादिसमयाशुद्धिप्रतिप्रसवपरं तस्याः स्त्रीपुंसाधारणत्वेन प्रतिप्रसवास्पर्शात् कृत्यचिन्तामण्यादिषु गोचराद्यशुद्धिप्रतिप्रसवसमयाशुद्ध्योः प्रकरणभेदेनोपादानात्। 'कालात्यये च कन्यायाः कालदोषो न विद्यते' इति अङ्गिरसोक्तमपि तथैव। 'उदगयने आपूर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोपनयनगोदानविवाहाः' (१।४।१)। [1]विवाहः सार्वकालिक इत्येके (१।४।२) इत्याश्वलायनवचनेनापि सार्वकालिक इत्यनेन प्रागुक्तवचनैकवाक्यतया दशाब्दोत्तरे स्वोक्तोदगयनादेरनियम उक्तः। अत एव गर्भकृत्यादिप्रतिप्रसववन्मलमासादावतिप्रौढाविवाहे प्रतिप्रसवः केनापि विशिष्य नोक्तः। अङ्गिरोवचने 'आवृत्ते तीर्थगमने' इति तु मलमासेऽप्यनावृत्तं 'तीर्थस्नानमपि त्यजेदि'ति[2] दर्शनान्मलमासादिप्रतिप्रसवपरम्। स्मृत्यर्थसन्देहे स्मृत्यन्तरसंवादादेवार्थनिर्णय इति निबन्धकारः।[3] २७॥

'भाविनोऽर्था भवन्त्येव हठेनानिच्छतोऽपि ही'ति मत्स्यपुराणोक्तावश्यंभाविशुभाशुभेषु ग्रहादिदोषशान्त्यर्थं होमहिरण्यादिदानं विवाहात् प्राक् कर्तव्यम्; भगवत्या रुक्मिण्या विवाहे तथा दर्शनात्। यथा भागवते

चक्रुः सामर्ग्यजुर्मन्त्रैर्वध्वा रक्षां द्विजोत्तमाः।
पुरोहितोऽथर्वविद्वै जुहाव ग्रहशान्तये॥
हिरण्यरूप्यवासांसि तिलांश्च गुडमिश्रितान्।
प्रादाद्धेनूश्च विप्रेभ्यो राजा विधिविदां वरः॥ (भाः १०।५३।१२–१३)

अत एव दीपिकायां, ये ग्रहा रिष्टसूचका इत्यनेन ग्रहाणां पूर्वसिद्धपापबोधकत्वमुक्तं न तु पापजनकत्वमिति।

तथा च मत्स्यपुराणम्

पुराकृतानि पापानि फलन्त्यस्मिंस्तपोधनाः।
रोगदौर्गत्यरूपेण तथैवेष्टवधेन च॥
तद्विघाताय वक्ष्यामि सदा कल्याणकारणम्[4]।

अत एव याज्ञवल्क्यः

दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिता।
तत्र दैवमभिव्यक्तं पौरुषं पौर्वदेहिकम्॥ (या १–३४९)

कर्मसिद्धिः शुभाशुभकर्मसिद्धिः पूर्वकालीनदेहेन पुरुषनिष्पन्नं सुकृतं दुष्कृतं फलोन्मुखीभूतं सुदैवं दुर्दैवं च इत्युक्तम्।

मत्स्यपुराणञ्च

प्रतिकूलं तदा दैवं पौरुषेण विहन्यते।
मङ्गलाचारयुक्तानां नित्यमुत्थानशालिनाम्॥

---

[1]सार्वकालमेके विवाहम् in printed Āśvalāyana Gṛhyasūtram, 1-4-2.

[2]C adds वचन।

[3]C & D. निबन्धारः

[4]A. कारकम्

पौरुषेण ऐहिकदैहिक[1]यागादिना। उत्थानशालिनाम् कर्मारम्भवताम्। ततश्चामुकस्य चामुकाया विवाहे ग्रहादिसूचनीयदोषोपशमनकाम इति हिरण्यदानादौ प्रयोज्यम्। ग्रहहोमे तु आकृष्टेनेत्यादिका मन्त्राः सर्ववेदिसाधारणाः पुराणोक्तत्वात्।

तथा च मत्स्यपुराणम्

आकृष्णेनेति (ऋः १-३५-२) सूर्याय होमः कार्यो द्विजन्मना।
आप्यायस्वेति (ऋः १-९१-१६) सोमाय मन्त्रेण जुहुयात् पुनः।
अग्निर्मूर्ध्वा दिव (८-४४-१६) मन्त्रमिति भौमाय कीर्तयेत्।
अग्ने विवस्वदुषस (ऋः १-४४-१) इति सोमसुताय च॥
वृहस्पते परिदीयारथेनेति (ऋः १०-१०२-४) गुरोर्मतः।
शुक्रन्तेऽन्यदिति (ऋः ६-५८-१) च शुक्रस्यापि निगद्यते॥
शर्णैश्चरायेति पुनः शन्नो देवीति (ऋः १०-९-४) होमयेत्।
कया नश्चित्र आभूवदूती (ऋः ४-३१-१) राहोरुदाहृतः॥
केतुं कृण्वन्निति (ऋः १-६-३) कुर्यात् केतूनामुपशान्तये।

अत एव भवदेवभट्टेनापि तथा लिखितम्।

मत्स्यसूक्ते—भूकम्पादे र्न दोषोऽत्र वृद्धिश्राद्धे कृतेऽपि[2] वा।२८॥

अथ कन्यादानाधिकारिणः। तत्र विष्णुः

पिता पितामहो भ्राता सकुल्यो मातामहो माता चेति कन्याप्रदाः। (भवन्ति) (२४-३८)।
[3]पूर्वनाशे प्रकृतिस्थः परः पर (२४-३९) इति। प्रकृतिस्थः पातित्योन्मादादिरहितः।
अप्रकृतिस्थेन पित्रादिना कृतमप्यकृतमेव।

तदाह नारदः

[4]स्वतन्त्रोऽपि हि यत् कर्म कुर्यादप्रकृतिं गतः।
तदप्यकृतमेव स्यादस्वातन्त्र्यस्य हेतुतः॥

पितृत्वा[5]दिना स्वतन्त्रोऽपि सन् अप्रकृतिस्थत्वेन हेतुना परतन्त्रो भवति। तदा तत्कृतं वाग्दानादिकमकृतमेव। यदि तु विवाहो निर्वृतस्तदा प्रधानस्य निष्पन्नत्वेनाधिकारिवैकल्यादपि न तस्य पुनरावृत्तिः।

मातुः पूर्वं मातुलो बोध्यः। यथा नारदः

पिता दद्यात् स्वयं कन्यां भ्राता वानुमतः पितुः।
मातामहो[6] मातुलश्च सकुल्यो बान्धवस्तथा॥
माता त्वभावे सर्वेषां प्रकृतौ यदि वर्तते।
तस्यामप्रकृतिस्थायां कन्यां दद्युः स्वजातयः[7]॥ (ना–१२।२०–२१)

इत्यर्धमधिकं पराशरभाष्ये माधवाचार्यधृतम्।

---

[1]C drops दैहिक।

[2]C सति।

[3]पूर्वाभावे in printed text XXIV-39.

[4]स्वतन्त्रोऽपि हि यत् कार्यं कुर्यादप्रकृतिं गतः।
अकृतं तदपि प्राहुरस्वातन्त्र्यस्य हेतुतः॥
in printed Nārada's text 1-4-40. (Government of West Bengal, publioation).

[5]C पित्रादिः

[6]पितामहो in Nārada's printed text.

[7]सनाभयः in Nārada's printed text.

बान्धवः पितामहो विष्णुवचनैकवाक्यत्वात्। एवमेव रत्नाकरः। एवञ्च सकुल्यपितामहयोर्नारदोक्तक्रमो न ग्राह्यः किन्तु विष्णूक्तवक्ष्यमाणयाज्ञवल्क्योक्तक्रमो ग्राह्यः पाठक्रमाच्छाब्दक्रमस्य बलवत्त्वात्। तस्यामित्यनेन मातुरुपस्थितत्वात् स्वजातय इत्यनेन मातामहमातुलेतरमातृपक्षसकुल्या उच्यन्ते।

संस्कृतानामधिकारमाह याज्ञवल्क्यः

असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः।
भगिन्यश्च निजादंशाद्दत्त्वांशन्तु तुरीयकम्॥ (या–२–१२४)

असंस्कृता भगिन्यश्च भ्रातरः पूर्वसंस्कृतैरुपनीतैः, अन्यथा मन्त्रपाठानधिकारापत्तेः[1]। तुरीयकं विवाहोचितद्रव्यपरमिति दायतत्त्वे विवेचितम्। अत एव विवाहोचितद्रव्यदाने संस्कृतासंस्कृतभेदानुपयोगात् पूर्वसंस्कृतैरिति कन्यासंस्कार एवोपयुक्तम्।

याज्ञवल्क्यः[2]

पिता पितामहो भ्राता सकुल्यो जननी तथा।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः॥ (या–१–६३)
अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ।
गम्यन्त्वभावे दातॄणां कन्या कुर्यात् स्वयम्वरम्॥ (या–१–६४)
सकृत् प्रदीयते कन्या हरंस्तां चौरदण्डभाक्।
दत्तामपि हरेत् कन्यां[3] श्रेयांश्चेद्वर आव्रजेत्॥ (या–१–६५)

तथेत्यनेन नारदोक्तमातामहाद्याः समुच्चिताः।

गम्यं सवर्णत्वादिना स्वप्रापणार्हं वरं स्वप्रदानेन पतिं कुर्यादित्यर्थः। 'दत्तात्मा तु स्वयं दत्त' इति (या २–१३१) याज्ञवल्क्योक्तस्वयंदत्तपुत्रस्य स्वदानवत्। स्वदानेऽपि[4] स्वस्याधिकारो बोध्यः। दत्तां वाग्दत्तां, इयं कन्या अमुकाय दातव्येति प्रतिश्रुतामिति यावत्।२९॥

अत्र विशेषमाह नारदः

ब्राह्मादिषु विवाहेषु पञ्चस्वेष विधिः स्मृतः।
गुणापेक्षं भवेद्दानमासुरादिषु च त्रिषु॥ (ना–१२।२९)

एष विधिः सकृद्दानविधिः[5]। गौतमः 'प्रतिश्रुत्यापि अधर्मसंयुक्ताय न दद्या'दिति (१-५-२१।) अधर्मः अत्र[6] प्रदानानर्हताप्रयोजक इति विवादरत्नाकरः[7]। वशिष्ठः

कुलशीलविहीनस्य पण्डा[8]दिपतितस्य च।
अपस्मारिविधर्मस्य रोगिनां वेशधारिणाम्॥
दत्तामपि हरेत् कन्यां सगोत्रोढां तथैव च।

---

[1]C मन्त्रपाठाधिकार्यनुपपत्तेः।
[2]A.
[3]पूर्वाम् in some printed texts.
[4]The sentence is omitted in C & D.
[5]Vide also Gṛhastha ratnākara. (p. 48) where we find :
ब्राह्माद्विविवाहपञ्चकोऽयं सकृत् कन्यादानविधिः।
[6]A.
[7]A रत्नाकरः।
[8]A शन्ढादि

नारदः

[1]प्रतिगृह्य च यः कन्यामदुष्टामुत्सृजेद्वरः।
विनेयः सोऽर्थदण्डेन कन्यां तामेव चोद्वहेत्॥ (ना–१२।३५)

विनेयो दण्डनीयः। ब्राह्मादीन्[2] आह याज्ञवल्क्यः

ब्राह्मो विवाह आहूय दीयते शक्त्यलङ्कृता।
तज्जः पुनात्युभयतः पुरुषानेकविंशतिम्॥ (या–१–५८)
यज्ञस्थायर्त्विजे दैव आदायार्षस्तु गोयुगम्।
चतुर्दश प्रथमजः पुनात्युत्तरजश्च षट्॥ (या १–५९)

[3]इत्युक्त्वा चरतां धर्मं सह या दीयतेऽर्थिने।
स कायः पावयेत्तज्जः षड्वंश्यांश्च सहात्मना॥ (या १–६०)
आसुरो द्रविणादानाद्गान्धर्वः समयान्मिथः।
राक्षसो युद्धहरणात् पैशाचः कन्यकाच्छलात्॥ (या १–६१)

एकविंशतिमिति 'दश पूर्वान् दशापरान् आत्मानञ्चैकविंशतिमि'ति[4] मनुवचनसमानार्थकम्। पुनाति पित्रादीन् पापात् नरकाच्च समुद्धरति, पुत्रादीन् निष्पापान् जनयति आत्मानमपि निष्पापं करोति। 'आदायेति' गोद्वयं वराद्गृहीत्वा तेनैव सह कन्यादानमार्षः', 'सह गोमिथुनेन' चेति [5]देवलवचनात्। सह धर्मं चरतामिति नियमं कृत्वा कन्यादानं कायः। कः प्रजापतिर्देवता अस्येति प्राजापत्य इत्यर्थः। शास्त्रीयसंख्यानियमं विना धनग्रहणादासुरः, अतो नार्षस्य तथात्वम्। कन्यावरयोरन्योन्यानुरागाद्यः समयः त्वं मे भार्या त्वं मे पतिरिति निश्चयः स गान्धर्वः। युद्धेति बलात्कारोपलक्षणम्। 'प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते' (म ३।३३) इति मनुवचनात्। छलमाह मनुः

सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति।
स पापिष्ठो विवाहानां पैशाचः [6]कथितोऽष्टमः॥ (म ३।३४)

एवम्भूतत्यागाद्यनन्तरग्रहणे ब्राह्माद्यष्टनामको विवाह इति वर्तुलार्थः। गान्धर्वादौ[7] विधिमाह देवलः

गान्धर्वादिविवाहेषु विधिर्वैवाहिको मतः।
कर्तव्यश्च त्रिभिर्वर्णैः समयेनाग्निसाक्षिकः॥३०॥

---

[1]प्रतिगृह्य तु यः कन्यामदुष्टामुत्सृजेन्नरः।
स विनेयस्त्वकामोऽपि कन्यां तामेव चोद्वहेत्॥ (in printed text of Nārada XII-35.)

[2]C. ब्राह्मादिविवाहम्

[3]सहोभौ चरतां धर्ममित्युक्त्वा दीयतेऽर्थिने।
स कायः पावयेत्तज्जः षट् षट् वंश्यान् सहात्मना॥ in some printed text of Yaj. 1/60.

[4]*cf.* Manu। दशपूर्वान् परान् वंश्यानात्मानं चैकविंशकम्। (मनु ३–३७)

[5]The full verse of Devala as quoted in the Gṛhastha ratnākara is : (p. 70).

प्रदानं यत्तु कन्यायाः सह गोमिथुनेन च।
शस्ताय वाऽसगोत्राय तमार्षमृषयो विदुः॥

[6]प्रथितोऽष्टमः in some printed texts of Manu.

[7]A & D read वैवाहिकविधिम्

क्षतयोन्या अपि संस्कारमाह याज्ञवल्क्यः

अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनः। इति। (या १–६७)

घृताभ्यक्तत्वादिना नियो[1]गधर्ममुपक्रम्य मनुः

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः।
तामनेन विधानेन निजो विन्देत देवरः॥
यथाविध्यभिगम्यैनां शुक्लवस्त्रां शुचिव्रताम।
मिथो भजेताप्रसवात् सकृत् सकृदृतावृतौ॥ (म ९।६९–७०)

आगर्भग्रहणात् सकृत् सकृत् गमनोपदेशाच्च यस्मै वाग्दत्ता तदपत्यं तस्यैव भवतीति कुल्लूकभट्टः। एतच्च कन्यानुमति[2]सत्त्वे, तदननुमत्या नेत्याह वशिष्ठः।

कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः।
देवराय प्रदातव्या यदि कन्यानुमन्यते॥ (म ९।९७)
अद्भिर्वाचा च दत्तायां म्रियेतोर्ध्वं[3] वरो यदि।
नच मन्त्रोपनीता स्यात् कुमारी पितुरेव सा॥ (व: १७।७२)

प्रागुवचनं मनोरपि। मन्त्रोपनीता पाणिग्रहणमन्त्रजन्यसंस्कारवती कुमारी पितुरेव सेति अन्यस्मै यादृशेन सम्बन्धेन पित्रा विवाहव्रते तादृक्पितृसम्बन्धवती। एतत् परमेव

नोदकेन न वाचा च कन्यायाः पतिरिष्यते।
पाणिग्रहणसंस्कारात् पतित्वं सप्तमे पदे॥

इति यमवचनम्[4]। कन्यायाः सकृद्दानन्तु पाणिग्रहण[5]संस्कारयुक्तकन्याविषयम्।[6]

कात्यायनः

अनेकेभ्योऽपि दत्तायामनूढायान्तु यत्र वै।
वरागमश्च सर्वेषां लभेताद्यवरस्तु ताम्।
पश्चाद्वरेण यद्दत्तं तस्याः प्रतिलभेत सः।
तथा गच्छेत् समूढायां दत्तं पूर्ववरो हरेत्॥

वरो विवाहार्थोपस्थितः। तथा

प्रदाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनन्तथा।
धार्या सा वर्षमेकन्तु देयान्यस्मै विधानतः॥
अथ प्रवृत्तिरागच्छेत् प्रतीक्षेत समात्रयम्।
अत ऊर्ध्वं प्रदातव्या कन्यान्यस्मै यथेच्छतः॥

---

[1]A नियम।

[2]C & D.

[3]म्रियेतादौ in printed Vaśiṣṭha Dh. Śāstram. 17/72.

[4]A & D मनु

[5]A ग्रहीतृ।

[6](A adds—न तु वागदत्ताजनदानविषयम्)।

प्रवृत्तिरागमनवार्ता। मनुः

मङ्गलार्थं स्वस्त्ययनं यज्ञस्तासां प्रजापतेः।
प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारणम्॥ (म ५।१५२)
पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे॥ (म ८।२२७)

स्वस्त्ययनं कुशलेन कालातिवाहनहेतुकम्, करणसाधनात्, कनकधारणादि। ॐ स्वस्ति भवन्तो ब्रुवन्त्वित्यादयः। यश्च प्रजापतिदैवतो वैवाहिको होमस्तत् सर्वं मङ्गलार्थम्। अभिमतार्थसिद्धिर्मङ्गलं तदर्थमवैधव्यार्थमिति यावत्। स्वाम्यकारणं तु प्रदानं न तु वाग्दानम्। रत्नाकरकृतापि प्रदानेनैव कन्यायां वरस्य स्वाम्यं जायते कन्यादातुः स्वाम्यं निवर्तते इति व्याख्यातम्। निष्ठा भार्यात्वस्य समाप्तिरूपा सप्तमे पदे गतायां कन्यायामिति बोद्धव्यम्। तदानीं गोत्रापहारमाह हारीतः

स्वगोत्राद्भ्रश्यते नारी विवाहात् सप्तमे पदे।
[1]पतिगोत्रेण कर्तव्या तस्याः पिण्डोदकक्रिया॥

पाणिग्रहणादपि गोत्रापहारमाह श्राद्धविवेके वृहस्पतिः

पाणिग्रहणिका मन्त्राः पितृगोत्रापहारकाः। (श्रा०का—२९)
भर्तृगोत्रेण नारीणां देयं पिण्डोदकं ततः॥३१॥ (श्रा०का—३०)

यत्तु सपिण्डनस्य गोत्रापहारित्वप्रतिपादकं वचनान्तरं तत् शाखान्तरीयम्, शिष्टव्यवहाराभावात्। अत एवानुमन्त्रिता 'गुरुं गोत्रेणाभिवादयेदिति' गोभिलोक्तम्। सप्तपदीगमनानन्तरं पत्युरभिवादनं तत् पतिगोत्रेण कर्तव्यमिति भट्टनारायणैरुक्तम्। एतेन पितृगोत्रेणेति सरलाभवदेवभट्टाभ्यामुक्तं हेयम्। एतत् पत्यभिवादनान्त एव सामगानां विवाहः। 'तावुभौ ततः प्रभृति त्रिरात्रमक्षारलवणाशिनौ ब्रह्मचारिणौ भूमौ सह शयीयाता'मिति (२।३।११)[2] तत्परसूत्रे ततः प्रभृति विवाहकर्मण ऊर्ध्वमिति भट्टनारायणव्याख्यानात्। अत एव पत्यभिवादनानन्तरं भवदेवभट्टेनापि प्रायश्चित्तहोमादिवामदेव्यगानदक्षिणा लिखिताः। यजुर्वेदिनान्तु प्रेक्षकाभिमन्त्रणानडुच्चर्मोपवेशनान्तो विवाहः, 'आचार्याय वरं ददातीति' पारस्करसूत्रेण तदनन्तरं वरशब्दवाच्यगवादिदक्षिणादानस्योक्तत्वात्। अतएव

विवाहादिः कर्मगणो य उक्तो गर्भाधानं शुश्रुम यस्य चान्ते।
विवाहादावेकमेवात्र कुर्यात् श्राद्धं नादौ कर्मणः कर्मणः स्यात्॥ (१।५।५)

इति छन्दोगपरिशिष्टवचने विवाहादिरिति समशनीयचरुहोमगृहप्रवेशयानारोहणचतुष्पथामन्त्रणाक्षभङ्गसमाधानार्थहोमचतुर्थीहोमानामादिशब्देन ग्रहणम्। एषु विवाहादिगर्भाधानान्तकर्मसु एकमेव श्राद्धं कार्यमिति श्राद्धविवेकः। ततश्च समशनीयचरुहोमादयः साङ्गविवाहाद्भिन्ना इति। ततश्च 'नाशौचं राज्ञां राजकर्मणी'त्यधिकृत्य 'न देवप्रतिष्ठाविवाहयोः पूर्वसंभृतयो'रिति विष्णुसूत्रेणारब्धविवाह एवाशौचाभावो न तु समशनीयचरुहोमादौ; विवाहारम्भश्च वृद्धिश्राद्धम्।

---

[1]स्वामिगोत्रेण कर्तव्या पिण्डदानोदकक्रिया in Laghu Hārīta Smṛti (*verse-63.*)

[2]*cf.* अत ऊर्ध्वमक्षारलवणाशिनाधः शयिनौ ब्रह्मचारिणौ स्याताम्। त्रिरात्रं द्वादशरात्रं संवत्सरं वैक ऋषिर्जायत इति। आश्वलायनगृह्यसूत्रम् १।८।११

त्रिरात्रमुभयोरधःशय्या ब्रह्मचर्यं क्षारलवणवर्जनं च। आपस्तम्ब गृह्यसूत्रम् ३।८।८
तयोश्शय्यामन्तरेण दण्डो गन्धलिप्तो वाससा सूत्रेण वा परिवीतस्तिष्ठति। *Ibid.* ३।८।९

व्रतयज्ञविवाहेषु श्राद्धे होमार्चने जपे ।
आरब्धे सूतकं न स्यात् अनारब्धे तु सूतकम् ॥
आरम्भो वरणं यज्ञे सङ्कल्पो व्रतजापयोः ।
नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिष्क्रिया ॥

निमन्त्रणन्तु वा श्राद्धे आरम्भः स्यादिति श्रुतिः ।
इति राघवभट्टधृतविष्णु[1] वचनात् । पाकपरिष्क्रियेति साग्नेर्दर्शश्राद्धविषयम् । तत्र तस्य तदुद्धरणस्यासाधारणाङ्गत्वात् । न चैवं विवाहपूर्वकृतनान्दीमुखश्राद्धेन सर्वेषां श्राद्धवत्त्वात् सर्वेषामारम्भो भूत इति वाच्यम् । विवाहार्थं कृतवृद्धिश्राद्धस्य समशनीयादीनामारम्भत्वाभावात्, उद्देश्यतागर्भत्वादारम्भपदार्थस्य । अन्यथा अन्यार्थवरणादावन्यारम्भः स्यादक्षभङ्गाभावात्तदर्थहोमाकरणे विवाहार्थकृतश्राद्धेन तस्याप्यारम्भादारब्धाकरणे प्रत्यवायश्च स्यात् । अत एवाग्न्याधानार्थं विवाहार्थे वा कृते श्राद्धेऽ[2]शौचे तु न वैश्वदेवस्य गर्भाधानस्य वा करणमिति । एवञ्च विवाहकाले अशौचे[3] समशनीयचरु[4]होमादयोऽशौचान्ते व्याहृतिहोम[5]प्रायश्चित्तं कृत्वा कर्तव्याः ;

गौणेषु तेषु कालेषु कर्म चोदितमारभेत् ।
प्रायश्चित्तप्रकरणप्रोक्तां निष्कृतिमारभेत् ॥
इति भरद्वाजवचनात् ।३२।।

गौणकालमाह हरिहरपद्धतौ

यद्वागामिक्रियामुख्यकालस्याप्यन्तरालवत् ।
गौणकालत्वमिच्छन्ति केचित् प्राक्तनकर्मणि ॥

अन्तरालवत् मध्यकालस्येव । श्राद्धचिन्तामणिकृत्यतत्त्वार्णवयोः,

एवमागामियागीयमुख्यकालादधस्तनः ।
स्वकालादुत्तरो गौणः कालः पूर्वस्य कर्मणः[6] ।

एवं 'सर्वाण्येवान्वाहार्यवन्ती'ति (१।१।५) गोभिलगृह्येण ।

[7]यच्छ्राद्धं कर्मणामादौ या चान्ते दक्षिणा भवेत् ।
आमावास्यां द्वितीयं यत् अन्वाहार्यं विदुर्बुधाः ॥

इति गृह्यान्तरे नान्दीमुखश्राद्धदक्षिणयोरन्वाहार्यत्वप्रतिपादनात्, गृह्योक्तकर्मणामाद्यन्ताङ्गत्वेन नान्दीमुखश्राद्धदक्षिणानियमाभिधानात् विवाहमात्रस्य गृह्यकर्मत्वेन तदादौ नान्दीमुखश्राद्ध[8]मवश्यं कर्तव्यम् ।

---

[1] C omits विष्णु ; D reads विष्णुपुराण ।
[2] A & C. वृद्धिश्राद्धे
[3] B.
[4] A & D चरु ।
[5] D प्रायश्चित्तहोमं
[6] A & C अधस्तनः पूर्वः, शास्त्रे वृक्षवद्व्यवहार इति न्यायात् ।
[7] Referred to in the commentary of Gobhila by Bhaṭṭanārāyaṇa on 1-1-65.
[8] A, C & D अवश्यम् ।

तत्राद्यविवाहे पित्रा कर्तव्यम् ।

स्वपितृभ्यः पिता दद्यात् सुतसंस्कारकर्मसु ।
पिण्डानोद्वहनात्तेषां तस्याभावेऽपि तत्क्रमात् ॥

इति छन्दोगपरिशिष्टात् । सुतसंस्कारग्रहणात् पुत्रस्य विवाहान्तरे पित्रा नाभ्युदयिकं कार्यम्, आद्येन संस्कारसिद्धौ द्वितीयादेस्तदजननात्[1] । तथाश्वलायनगृह्य[2]परिशिष्टम् 'सीमन्तोन्नयनं प्रथमे गर्भे, सीमन्तोन्नयनसंस्कारो गार्भपात्रसंस्कार' इति श्रुतिरिति । गर्भपात्रयोरयं गार्भपात्रः । गार्भस्य उदरस्थस्य पात्रस्य तदाधारस्य स्त्रिया इति कल्पतरुः[3] ।

वृद्धराजमार्तण्डे

या नार्यकृतसीमन्ता प्रसूते वा कदाचन ।
अङ्के निधाय तं बालं पुनः संस्कारमर्हति ॥
एवं
सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता ।

हारीतः

सकृत्तु कृतसंस्काराः सीमन्तेन द्विजस्त्रियः ।
यं यं गर्भं प्रसूयन्ते स गर्भः संस्कृतो भवेत् ॥

अत्र सकृत्संस्कृतपात्रजातानां सर्वेषां संस्काराभिधानेन प्रत्येककृतजातकर्मादिसंस्काराणां सुतरां सकृत्त्वम्, सकृत् कृते कृतः शास्त्रार्थ इति न्यायात् । पिण्डानिति श्राद्धपरं, कन्यापुत्रविवाहेष्विति श्राद्धविधायकविष्णुपुराणवचनैकवाक्यत्वात् । तदेकवाक्यतया एकशेषात् सुतपदं कन्यापुत्रपरम् । आ उद्वहनादित्यत्राभिविधावाङ् । तस्याभावेऽपि संस्कार्यक्रमबाधकपितुरभावे पुनरन्यः संस्कार्यः सपिण्डादिर्वा ।३३॥

तत्क्रमादिति ।

चित्रकर्म यथानेकैरङ्गैरुन्मील्यते शनैः ।
ब्राह्मण्यमपि तद्वत् स्यात् संस्कारैर्विधिपूर्वकैः ॥ (४।१०)

इत्यङ्गिरसोक्तफलभागितया तस्य प्रधानस्य संस्कार्यस्य क्रमात्तेषां पितॄणां दद्यात् । ततश्च संस्कार्यपित्रादित्रयमातामहादित्रयेभ्यः श्राद्धं कुर्यात् । न च संस्कार्यपितरमादाय तेषां पितुः सम्प्रदानभूतानां तत्क्रमादित्यनेन पितुः प्रवेशात् पितुः प्रपितामहेतरपञ्चानामिति नारायणोपाध्यायमतं युक्तमिति वाच्यम्, पित्रनुप्रवेशेन संस्कार्यपितृपितामहप्रपितामहानां श्राद्धे तन्मातामहपक्षस्यैव 'पितरो यत्र पूज्यन्ते तत्र मातामहा ध्रुवम् । अविशेषेण कर्तव्यं विशेषान्नरकं व्रजेदि'त्यनेन युक्तत्वात् । न वा तेषां संस्कर्तृपित्रादीनां संस्कार्यपितुः पितृगणमातामहगणानां वा ग्रहणं तत्क्रमादित्यनुपपत्तेः । तथाहि आद्ये संस्कर्तुरनुपात्तत्वेन तच्छब्दादनुपस्थितिः द्वितीये तेषामित्यनेनैव प्रक्रान्तत्वेन तथाविधानां प्राप्त्या तत्क्रमादित्यस्यानुवादकतापत्तिरूपानुपपत्तिः । तस्याभावे त्विति मैथिलपाठे प्रक्रान्तव्यवच्छेदक'तु'शब्देन द्वितीयपक्षस्य सुतरां बाधितत्वमिति । ततश्च तेषामिति निर्विशेषितपितृमात्रपरामर्शकमिति । एवञ्च भ्रात्रापि संस्कार्यदेवदत्तादिपितुरित्यादि प्रयोज्यम् ।

---

[1] अजनकत्वात् in printed texts.

[2] A & C.

[3] C reads रत्नाकरः ।

नान्दीमुखे तु छन्दोगैर्योषितां श्राद्धं न कार्यम्

न योषिद्भ्यः पृथक् दद्यादवसानदिनादृते।
स्वभर्तृपिण्डमात्राभ्यस्तृप्तिरासां यतः स्मृता ॥

इति छन्दोगपरिशिष्टेन पर्युदस्तत्वात्। न चावसानदिनेतरत्र योषिद्भ्योऽपृथग्दद्यात् यतः स्वभर्तृ-पिण्डांशेभ्य उभयोद्देश्यकदत्तेभ्य एव योषितां तृप्तिः पुरुषाणां योषिज्जीवनादौ पृथक्पिण्डादपि तृप्तिसत्त्वाद् योषित्पदं सार्थकमिति वाच्यम्, तथात्वे अवसानदिनादृते इति व्यर्थं स्यात्॥३४॥

तथाहि परिप्राप्ते योषितां श्राद्धेऽपृथक्त्वं विधीयते, किंवा अपृथक्त्वविशिष्टं श्राद्धं विधीयते। नाद्यः, अमावस्यादौ योषिद्दानाप्राप्तौ कथं तदनूद्यापृथक्त्वमात्रविधानम्। न चामावस्यायां पितृभ्यो दद्यादित्यत्र 'प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु' इति विष्णुपुराणीयेन (३।१३।३५) योषितामपि पितृत्वात् श्राद्धप्राप्तिरिति वाच्यम्, पितृभ्यो दद्यादित्यत्र पितृपदं न प्राप्तपितृलोकमात्र-परं किन्तु पितृपितामहप्रपितामहमात्रपरम् 'असावेतत्ते यजमानस्य पित्रे, यजमानस्य पितामहाय असावेतत्ते यजमानस्य प्रपितामहाय' इति श्रुत्यैकवाक्यत्वात्।

त्रयाणामुदकं कार्यं त्रिषु पिण्डः प्रवर्तते।
चतुर्थः सम्प्रदातैषां पञ्चमो नोपपद्यते॥ (९।१८६)

इति मनुवचने त्रयाणामित्यनेन पितृपितामहप्रपितामहानां पत्नीनिरपेक्षाणां तर्पणवद्देवत्वावगमाच्च। मातामहादिलाभस्तु

पितरो यत्र पूज्यन्ते तत्र मातामहा ध्रुवम्।
अविशेषेण कर्तव्यं विशेषान्नरकं व्रजेत्॥

इति [1]वृद्धयाज्ञवल्क्यवचनात्। मातामहा इति तदादित्रिकपरम्। इत्यादिबहुवचनान्ता गणस्य सूचका [2]इत्युक्तेः श्राद्धेतिकर्तव्यतायां मातामहादित्रिकोपादानाच्च। नान्त्यः, तथाहि अवसान-दिनादृत इति व्यर्थं स्यात्। अवसानदिने तु, ध्रुवानि तु प्रकुर्वीत प्रमीताहनि सर्वदेति छन्दोग-परिशिष्टवचनेन स्त्रीपुंसाधारणत्वेन श्राद्धप्राप्त्या सर्वशाखाप्रत्ययमेकं कर्म इति न्यायात्।

यन्नाम्नातं स्वशाखायां परोक्तमविरोधि च।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत्॥ (१।३।३)

इति छन्दोगपरिशिष्टीयाच्च। (न चैवं परिशाखि[3]कसर्वकर्मानुष्ठानमिति वाच्यमविरोधि चेति चकारेणाकाङ्क्षितस्यैव लाभात्। अतएव[4]

बह्वल्पम्वा स्वगृह्योक्तं यस्य कर्म प्रकीर्तितम्।
तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत्॥ इति)
स्त्रीणामप्येवमेवैतदेकोद्दिष्टमुदाहृतम्।
मृताहनि यथान्यायं नृणां यद्वदिहोदितम्॥

इति मार्कण्डेयपुराणीयेन विशेषतः श्राद्धप्राप्त्या च विशिष्टविधित्वानुपपत्तेः। तस्माद-वसानदिनादृत इति वाक्यस्य सार्थकत्वाय पृथक्पदमनुवादकम्।[5]

---

[1]A & C याज्ञवल्क्य

[2]This part up to the end of the sentence is omitted in C and D.

[3]A. पारशाखिकाविरोधि

[4]A. अनाकांखिते

[5]अस्तु वानुवादः अनुवादवैयर्थ्यं तथा चावसानदिनादृते योषिद्भ्यो न दद्यादिति वचनार्थः, in C as additional reading.

नच वैपरीत्यं तथात्वे वाक्यानुवादः स्यात्। अव्ययपदानुवादे तु विभक्तेर्नानुवादकतेति। एवमेवेशानन्यायाचार्याः ।३५।।

तस्मात्

मातृश्राद्धं तु पूर्वं स्यात् पितॄणां तदनन्तरम्।
ततो मातामहानाञ्च वृद्धौ श्राद्धत्रयं स्मृतम् ।।

इति शातातपवचनात्। अन्वष्टकास्वष्टकावदग्नौ हुत्वा दैवपूर्वमेव मात्रे पितामह्यै प्रपितामह्यै पूर्ववद्ब्राह्मणान् भोजयित्वेति विष्णुसूत्रात्; 'मृताहनि च कर्तव्याः स्त्रीणामप्युत्तरक्रियाः' इति विष्णुपुराणात् (३।१३।३८)।

श्राद्धं सपिण्डकं कुर्यात् स्वसूत्रोक्तविधानतः।
अन्वष्टकासु वृद्धौ च गयायाञ्च क्षयेऽहनि ।।
मातुः श्राद्धं पृथक् कुर्यादन्यत्र पतिना सह ।। इति देवलवचनात्

'वृद्धिश्राद्धे च मात्रादि गयायां पितृपूर्वकमि'ति तीर्थचिन्तामणिधृतवायुपुराणवचनात्। वृद्ध्यन्वष्टकावसानदिनगयानिमित्तकश्राद्धकरणेषु 'न योषिद्भ्यः' इत्यादिना छन्दोगेतरोऽवसानदिनेतरत्र वृद्ध्यादौ योषिद्भ्यः पृथक् श्राद्धं[1] दद्यात्। अवसानदिने तु छन्दोगाछन्दोगोभय एव योषिद्भ्यो[2] दद्यादित्यर्थात् सिद्धम्। ततश्च वृद्ध्यादौ छन्दोगयोषितां कथं तृप्तिरित्याकाङ्क्षामुत्थाप्य उतरार्घेनान्वयः। एतदर्थमेव स्वसूत्रोक्तविधानत इत्युक्तम्। सूत्रेति स्वगृह्यशास्त्रपरम्। अन्यत्रामावस्यादौ पतिना सह भोग्यं श्राद्धं कर्तव्यमित्यर्थः। 'असावेतत्ते यजमानस्य पित्रे' इत्यादि प्रागुक्तश्रुत्या श्राद्धे पत्नीनिरपेक्षपित्रादिकबोधिकया

सपिण्डीकरणादूर्ध्वं यत् पितृभ्यः प्रदीयते।
सर्वेष्वंशहरा माता इति धर्मेषु निश्चयः ।।

इति स्मृत्या भर्तृदत्तांशहारक[3]त्वबोधिकया चैकवाक्यत्वात्। अन्वष्टकायाञ्च साग्निकानामेवाधिकारः। विष्णुवचने हि हुत्वेत्यनेन होमादग्निप्राप्तेरग्नावितिग्रहणं तन्नियमार्थम्। न च अनग्नीनामग्नौ करणहोमे विप्रपाण्यादिविधानादत्रापि तथेति वाच्यं[4] प्रकृतीभूतश्राद्धविध्युक्तस्याधारान्तरस्य विकृतीभूतश्राद्धविशेषविहिताधारेण बाधात् शरमयबर्हिषा कुशमयबर्हिर्बाधवत्। न च लौकिकाग्नौ होमः। 'न पैत्रयज्ञियो होमो लौकिकेऽग्नौ विधीयते' इति मनुवचननिषेधात्। वाचस्पतिमिश्रोऽप्येवम्। प्रागुक्तपर्युदासात् वृद्धिश्राद्धे छन्दोगपरिशिष्टेन 'षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमे'दित्युपक्रम्य षण्णामेवानुष्ठानमुक्तं न तु मातॄणामिति। एतेन षड्भ्य इति जीवन्मातृविषयकमिति हलायुधोक्तं[5] निरस्तम्।

---

[1] A & D. श्राद्धायात्रं

[2] A reads here पृथक् श्राद्धायात्रं।

[3] A हरण; C भागित्व।

[4] A & D.

[5] C and D omit हलायुधोक्तम्।

**जीवन्मातृकेन** छन्दोगेतरेण पितामह्यादीनां श्राद्धं क्रियते। 'जीवन्तमतिदद्याद्वा प्रेतायान्नोदके द्विजः' इति छन्दोगपरिशिष्टात्। जीवन्तमित्यत्र निमित्तविशेषणत्वेन पुंस्त्वमविवक्षितम्।३६॥

अत एव लघुहारीतेनाप्युक्तम्

स्वेन भर्त्रा सहैवास्याः सपिण्डीकरणं स्त्रियाः।
एकत्वं सा गता यस्मात् चरुमन्त्राहुतिव्रतैः॥
तस्मिन् सति सुताः कुर्युः पितामह्या सहैव तु।
तस्याञ्चैव तु जीवन्त्यां तस्याः श्वश्र्वेति निश्चयः॥

**इति** पितुर्देशान्तरस्थायित्वे तत्प्रतिनिधित्वेन[1] पुत्रादिना वृद्धिश्राद्धं कर्तव्यम्। तथा च **हारीतः,** जीवति पितरि पुत्राणामर्थादानविसर्गाक्षेपेषु न स्वातन्त्र्यं, कामं दीने प्रोषिते चार्ति गते वा ज्येष्ठोऽर्थांश्चिन्तयेदिति। अर्थान् दृष्टादृष्टप्रयोजनानि। दक्षोऽपि

ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः।
एभिरेव हुतं यत्तु तत्तु स्यात् स्वयमेव हि[2]॥ (२।२९)

**स्वयं** प्रवृत्तस्यापि ऋत्विक्त्वमाह विवादचिन्तामणौ नारदः

**ऋत्विक् च त्रिविधो दृष्टः पूर्वजुष्टः स्वयं कृतः।**
**यदृच्छया च यः कुर्यादार्त्विज्यं प्रीतिपूर्वकम्॥** (ना।१०)

**यदृच्छया** स्वेच्छया। मरणादिना पितुरनधिकारे द्वितीयादिविवाहे वा विवाहकारिणा **स्वयमवश्यं** स्वपितृभ्यः श्राद्धं कर्तव्यम्।

नान्दीमुखेभ्यः श्राद्धन्तु पितृभ्यः कार्यमृद्धये।
ततो विवाहः कर्तव्यः शुद्धः शुभसुतप्रदः॥

**इति** ब्रह्मपुराणे श्राद्धेन विवाहस्य शुद्धत्वाभिधानेन तदभावादशुद्धत्वप्रतीतेः। अङ्गत्वादेव जीवत्-**पितृकेनापि** जीवन्तं विहाय परमादायावश्यं श्राद्धं[3] क्रियते।

जीवे पितरि वै पुत्रः श्राद्धकालं विवर्जयेत्।
येषां वापि पिता दद्यात्तेषामेके प्रचक्षते॥

**इति** लघुहारीतवचनोत्तरार्धेन प्रधानस्य साङ्गताद्यर्थं श्राद्धविधानात्। तत्र पितामहपदाद्यूहमाह **विष्णुधर्मोत्तरम्**

[4]येषां श्राद्धं पिता कुर्यात् तेषामेव स कारयेत्।
मन्त्रोहेण तु कर्तव्यं तेषां श्राद्धं नराधिप॥ (१।१४०।५३)

स जीवत्पितृकः, प्रतिनिधिना अमुकस्य पितुरित्याद्यभिलापे प्रयोज्यम्। 'आयान्तु नः पितर' इत्यादौ तु न तथा। यां वै काञ्चन यज्ञे आशिषमाशासते यजमानस्यैव तामाशासत इति होवाच इति श्रुतेः। एवञ्चाङ्गत्वेन[5] पितामहादिभिः क्रियमाणकन्यादाने वृद्धिश्राद्धमुपपद्यते। मात्रा तु

---

[1]A C & D.

[2]तु in printed text

[3]A & D read वृद्धिश्राद्धं कर्तव्यम्।

[4]येषां श्राद्धं पिता कुर्यात्तेषामेव स कारयेत्।
मन्त्रहीनं प्रकर्तव्यं तेन श्राद्धं यथाविधि॥ वि. ध:. १।१४०।५३ (in printed text)

[5]A. एवञ्च अङ्गत्वात् सर्वाण्येवान्वहार्यवन्तीति गोभिलगृह्याच्च

जीवत्पित्रादित्रिकरूपवद् वृद्धिश्राद्धं विना कन्या दीयते तत्र तदनधिकारात्। तथाहि पार्वणाधिकारे विष्णुः, (७५।३) पितरि पितामहे प्रपितामहे च जीवति नैव कुर्यादिति। तद्विकृतित्वात् वृद्धिश्राद्धेऽप्यनधिकारः। एवम्

मृताहनि च कर्तव्याः स्त्रीणामप्युत्तराक्रियाः।
प्रतिसंवत्सरं राजन्नेकोद्दिष्टविधानतः॥ (३।१३।३८)

इति विष्णुपुराणीये सपिण्डनोत्तरक्रियायामेकोद्दिष्टविधानेनान्यत्रानधिकारः। अत्र[1] स्त्रीणामपि प्रकरणात् कर्तरि षष्ठी।३७॥

नन्वेवं व्रतप्रतिष्ठादिषु स्त्री कथं ब्राह्मणान् ह्रावयतीति चेन्न तत्र तद्विधानात्। तथाहि जुहुयाद्धावयेद्वापि इति गोभिलसूत्रे विकल्पदर्शनात्

सूतके च प्रवासे च अशक्तौ श्राद्धभोजने।
एवमादिनिमित्तेषु ह्रावयेदिति योजयेत्॥

इति छन्दोगपरिशिष्टीये आदिशब्दाद् होममात्रे ह्रावयेदिति श्रुतेस्तथा कल्प्यते। एवं शूद्रस्यापि ब्राह्मणद्वारा विवाहादौ होमाधिकारः। विष्णुधर्मोत्तरे

विवाहादिक्रियाकाले तत्क्रियासिद्धिकारणम्। (वि. ध. ३।३१६।२०)
[2]यः प्रयच्छति धर्मज्ञः सोऽश्वमेधफलं लभेत्॥ (वि. ध. ३।३१६।२१)

आदिशब्दाद् यज्ञोपनयनप्रतिष्ठाग्रहणमिति दानवाक्यावली।

मनुः

अद्भिरेव द्विजाग्र्याणां कन्यादानं प्रशस्यते[3]।
इतरेषान्तु वर्णानामितरेतरकाम्यया॥ (म ३–३५)

उदककरणकमेव ब्राह्मणानां कन्यादानं प्रशस्यते। क्षत्रियादीनां पुनर्दातृप्रतिगृहीत्रोर्दानग्रहणेच्छाकरणेन जलं विनापि दानं प्रशस्यते, न तु जलकरणकत्वं तेषां निषिध्यते। व्यवहारोऽपि तथा। रत्नाकरे तु इतरेतरकाम्यया कन्यावरयोः परस्परानुरागेणेति। बौधायनः, श्रुतशीलिने[4] विज्ञाय ब्रह्मचारिणे अर्थिने देयेति स ब्राह्म (बौः १।११।२) इति। ब्रह्मचारिणे अजातस्त्रीसम्पर्काय इति कल्पतरुदीपकलिके[5]। जातपरिणीतस्त्रीसङ्गमस्य द्वितीयविवाहे विवाहाष्टकबहिर्भावापत्तेस्तदुपादानं प्राशस्त्यार्थमिति तु तत्त्वम्। ब्राह्मानुवृत्तौ संवर्तः—

तां दत्त्वा च पिता कन्यां भूषणाच्छादनासनैः।
पूजयन् स्वर्गमाप्नोति नित्यमुत्सववृत्तिषु॥ (श्लोः ६३)

---

[1] C अतः।

[2] यः प्रयच्छति धर्मज्ञः सोऽश्वमेधमवाप्नुयात्। (वि. धः ३।३१६।२१) in printed text.

[3] विशिष्यते in printed text of Manu.

[4] श्रुतशीले विज्ञाय ब्रह्मचारिणेऽर्थिने कन्या दीयते स ब्राह्मः 1-11-2 in printed text.

[5] A. याज्ञवल्क्यदीपकलिके

vide Dīpakalikā on Yāj. 1-58.

नित्यं स्वर्गं चिरकालीनम्। उत्सववृत्तिषु उत्सवानां वाद्यादीनां वर्तनेषु सत्सु दत्त्वेति सम्बन्धः। तत्फलमाह मत्स्यपुराणम्

माङ्गल्यानि च वाद्यानि ब्रह्मघोषञ्च गीतकम्।
ऋद्ध्यर्थं कारयेद्विद्वानमङ्गल्यविनाशनम्॥

यमः

कूपारामप्रपाकारी तथा वृक्षादिरोपकः।
कन्याप्रदः सेतुकारी स्वर्गमाप्नोत्यसंशयम्॥३८॥

अत एव मत्स्यपुराणम्

शास्त्रेषूक्तमसन्दिग्धं बहुद्वारं महाफलम्।
दशपुत्रसमा कन्या यापि स्यात् शीलसंयुता॥*

अत एवानपत्यस्य गत्यभावस्तत्रैवोक्तः, यथा[1]

अनपत्यस्य लोकेषु गतिः का च न विद्यते।
कन्याञ्चैवानपत्यानां ददतां गतिमुत्तमाम्॥

अनपत्यानां अनपत्येभ्यः उत्तमां गतिं जानीयादिति शेषः।

बिष्णुप्रीत्यर्थमपि कन्या दीयते 'देयानि विप्रमुख्येभ्यो मधुसूदनतुष्टये' इति वामनपुराणेन सामान्यतो विधानात्। विष्णुपुराणञ्च

विशिष्टफलदा कन्या निष्कामानाञ्च मुक्तिदा।

[2]मनुः

[3]येन येन हि भावेन यद्यद्दानं प्रयच्छति।
तेन तेन हि भावेन फलं प्राप्नोति पूजितः। (म ४।२३४)

येन येन हि भावेन सात्विकराजसतामसान्यतमेन तेन तेन हि भावेन देवमानुषपशुभावेन।

यमः—

परञ्चानुपहत्यैव दानं दद्याद्विचक्षणः।
सुखोदयं सुखोदर्कं प्रेत्य वै लभते फलम्।

इत्येतयोर्दानमात्रे यद्दातृनिष्ठं फलं यच्च कन्यादाने प्रागुक्तं दातृनिष्ठं फलं तदौत्सर्गिकं किन्तु तत् पित्रादिनिष्ठमपि कल्प्यते, 'ततश्चोद्दिश्य पितरं ब्राह्मणेभ्यो धनं ददौ' इत्ययोध्याकाण्डे।

रत्नं वस्त्रं मही यानं सर्वभोगादिकं वसु।
विभवे सति विप्रेभ्यो योऽस्मानुद्दिश्य दास्यति॥

इति विष्णुपुराणीयपितृगाथायाञ्च पितृनिष्ठफलजनकत्वाभिधानात्।३९॥

---

[1]A and D read here भविष्योत्तरे।

[2]A reads: कन्यादाने यद्दातृनिष्ठफलं तदाह।

[3]येन येन तु भावेन यद्यद्दानं प्रयच्छति।
तत्तत्तेनैव भावेन प्राप्नोति प्रतिपूजितः॥ (Manu ४।२३४) in printed text.

*शीलवर्ज्जिता (alt. reading).

तदीयन्तु कन्यादि तदर्थं देयमाहापस्तम्बः—अन्तेवासी वार्थांस्तदर्थेषु धर्मकृत्येषु प्रयोजयेद् दुहिता वेति। तदर्थेषु मासिकादिना तद्भोगार्थं धर्मकृत्येष्वित्यदृष्टार्थमिति। अत एव व्यासः

आयासशतलब्धस्य प्राणेभ्योऽपि गरीयसः।
एकैव गतिरर्थस्य दानमन्या विपत्तयः॥ इति

एवञ्च पित्रादिनारब्धं देवगृहपुष्करिण्यादिकं तद्धनस्वामिना तदर्थं देयम्। तदाह विवादरत्नाकरे कात्यायनः

सुस्थेनार्तेन वा दत्तं श्रावितं धर्मकारणात्।
अदत्त्वा तु मृते दाप्यस्तत्सुतो नात्र संशयः॥

एवञ्च मुमूर्षुदत्तस्य यद्दानोपसर्गत्वाभिधानं तद्धर्मार्थेतरदानपरम्। एवञ्च शास्त्रदेशितं फलम-[1]नुष्ठातरीतिन्यायेन पित्रादयो न व्यावर्तन्ते तेषामपि शास्त्रदेशितफलभागित्वात्। किन्तु वेतनेन प्रवर्तमाना होमदेवगृहतडागादिषु ऋत्विक्स्थपतिखनितृप्रभृतयो व्यावर्तनीया इति ते न फलभागिनः। अत एव ऋत्विक्विषयिका श्रुतिः। दीक्षितमदीक्षिता दक्षिणादिभिः क्रीता ऋत्विजो याजयेयुरिति। इतरेषामपि लोकव्यवहारादेव धनार्थित्वमात्रम्।
काश्यपः

शुल्केन ये प्रयच्छन्ति स्वसुतां लोभमोहिताः।
आत्मविक्रयिणः पापा महाकिल्विषकारिणः॥
पतन्ति नरके घोरे घ्नन्ति चासप्तमं कुलम्।
[2]गमनागमने चैव सर्वः शुल्कोऽभिधीयते॥

गमनागमने पारितोषिकद्रव्यमादाय कन्याप्रदानार्थं कन्यापितृवेश्मनि यातायाते।[3] अत्र लोभमोहिता इत्यनेन स्वार्थं न ग्राह्यं कन्यार्हणार्थग्रहणे न दोषः।

यासां नाददते शुल्कं ज्ञातयो न स विक्रयः।
अर्हणं यत् कुमारीणामानृशंस्यं च केवलम्॥ (मनु ३।५४)

आनृशंस्यमनुकम्पा। अतएव मनुः

आददीत न शूद्रोऽपि शुल्कं दुहितरं ददन्। (म ९।९८)४०॥

एवञ्च रत्नाकरधृतयमवचने यत् शूद्रसम्प्रदानकदानमुक्तं तत् कन्यादानविषयकमिति। तद्यथा

शूद्रे समगुणं दानं वैश्ये द्विगुणमुच्यते।
क्षत्रिये षड्गुणं प्रोक्तं विप्रे दशगुणं स्मृतम्।

---

[1]A reads प्रयोक्तरीतिन्यायेन

[2]C & D गमनागमने चैव सर्वः शुल्को विधीयते।

[3]A reads कन्यापित्रादिना यल्लब्धं तदपि शुल्कम्।

अत एव मदनपारिजाते भरद्वाजः

साधारणं स्यात्त्रिविधं विदुस्तच्च क्रमागतम्।
प्रीतिदानं तथैवात्र प्राप्तञ्च सह भार्यया।
अविशेषेण वर्णानां सर्वेषां त्रिविधं धनम्॥

(मदनपारिजातः पृः २१४ Bib. Ind.)

यत्तु

चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः।
राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः॥ (म ३।२४)

इति मनुना प्रशस्तत्वेनाभिहितं तदपि प्रागुक्तकन्यार्हणार्थविषयम्।

याज्ञवल्क्यः

दत्तां[1] कन्यां हरन् दण्ड्यो व्ययं दद्याच्च सोदयम्।
मृतायां दत्तमादद्यात् परिशोध्योभयव्ययम्॥ (या २।१४६)

वाचा दत्तां कन्यां कारणमन्तरेण हरन् दण्ड्यो भवति। यच्च वरेण दत्तं हिरण्यादिकं तत् सवृद्धिकं कन्यापिता दद्यात्। वाग्दत्तायां मृतायां वरो दत्तमादद्यात्। उभयव्ययं परिशोध्य यदवशिष्ट-मिति।[2] दक्षः

मातापितृविहीनन्तु संस्कारोद्वाहनादिभिः।
यः स्थापयति तस्येह पुण्यसंख्या न विद्यते॥ (३।३२)

मत्स्यसूक्तम्

वलिकर्मणि यात्रायां प्रवेशे नववेश्मनः।
महोत्सवे च माङ्गल्ये तत्र स्त्रीणां ध्वनिः शुभः॥

स्त्रीणां ध्वनिः हुलुहुलुध्वनिः। दाक्षिणात्यास्तु

आसने शयने दाने भोजने वस्त्रसंग्रहे।
विवादे च विवाहे च क्षुतं सप्तसु शोभनम्॥

---

[1]दत्त्वा in Yāj. II—146. printed adition

[2]Here C adds the following lines :

दीपकलिकामिताक्षरायान्तु सर्वमादद्यादिति पाठं कृत्वा व्याख्यास्यते। स्वयमेव वाचा कन्यां दत्तां हरन् कारणमन्तरेण (तां) दण्ड्यो भवति। यच्च वरेण दत्तं हिरण्यादिकं तत् सवृद्धिं कन्यापिता दद्यात्। वाग्दत्तायां तु कन्यायां मृतायां पितृसम्बन्धिनां वरसम्बन्धिनाञ्च उपचारार्थं यद्दत्तं तदुभयं परिशोध्य यदवशिष्टं शुल्कं तत् सर्वं वरो गृह्णीयात्। यद्यपि मृतायां सर्वमादद्यात् इत्यत्र वरो न श्रु(य)ते, तथापि इत्यनुवृत्तौ स्वञ्च शुल्कं वर इति शङ्खवचनाद्वरः प्रतिपत्तव्यः। यच्च बौधायनः 'ऋक्‌थं मृतायाः कन्यायाः गृह्णीयुः सोदराः स्वयम्। तदभावे भवेन्मातुस्तदभावे भवेत् पितुः' तत् पित्रादिधनविषयमिति।

अन्यत्र तु विष्णोरित्यधिकृत्य विष्णुधर्मोत्तरम्

[1]नामसङ्कीर्तनं नित्यं क्षुते प्रस्खलितादिषु। (विः धः ३।३४१।३९)
[2]वियोगं शीघ्रमाप्नोति सर्वानर्थो न संशयः। (विः धः ३।३४१।४०)

अत एव विष्णुपुराणे

स्मृते सकलकल्याणभाजनं यत्र जायते।
पुरुषं तमजं नित्यं व्रजामि शरणं हरिम्॥

विष्णुधर्मोत्तरे

नासंवृतमुखः कुर्याद्धास्यं जृम्भं तथा क्षुतम्।

श्रीपतिरत्नमालायाम्

आज्ञया नरपतेर्द्विजन्मनां दारकर्ममृतसूतकेषु च।
बन्धमोक्षमखदीक्षणेष्वपि क्षौरमिष्टमखिलेषु चोरुषु॥

क्षौरं क्षुरिकर्म। तेन स्त्रिया अपि नखकृन्तनम्।

महाभारते

रात्रौ दानं न शंसन्ति विना चाभयदक्षिणाम्।
विद्यां कन्यां द्विजश्रेष्ठ दीपमन्नं प्रतिश्रयम्॥

अभयदक्षिणामभयदानम्। तथा च रामायणम्

पर्याप्तदक्षिणस्यापि नाश्वमेधस्य तत् फलम्।
यत् फलं याति सन्त्रासे रक्षिते शरणागते॥

अकरणे निन्दामप्याह महाभारते

प्राणिनं वध्यमानं हि यः शक्तः समुपेक्षते।
स याति नरकं घोरमिति प्राहुर्मनीषिणः॥

प्रतिश्रयं प्रवासिनामाश्रयम्। विवाहे रात्रौ दानान्तरमाह देवलः

राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु।
स्नानदानादिकं कुर्युर्निशि काम्यव्रतेषु च॥४१॥

ज्योतिःसारसंग्रहे

विवाहे तु दिवाभागे कन्या स्यात् पुत्रवर्जिता।
विवाहानलदग्धा सा नियतं स्वामिघातिनी॥

---

[1]नामसंकीर्तनं कृत्वा क्षुत्प्रस्खलनादिषु। ३।३४१।३९ वि. ध: in printed text.
[2]वियोगं शीघ्रमाप्नोति सर्वानर्थैरसंशयम्। ३।३४१।४० वि. ध: in printed text.

व्यासः

संपूज्य गन्धपुष्पाद्यैर्ब्राह्मणान् स्वस्ति वाचयेत् ।
धर्म्ये कर्मणि माङ्गल्ये संग्रामाद्भुतदर्शने ।।

गन्धादौ विशेषमाह विष्णुधर्मोत्तरे

माल्यानुलेपनादग्रं न प्रदद्यात्तु कस्यचित् ।
अन्यत्र देवताविप्रगुरूणां भृगुनन्दन ।।

धर्म्ये कर्मणीति सप्तमीनिर्देशादमुककर्मणि स्वस्ति भवन्तोऽधिब्रुवन्तु इति ब्रूयात् ।

यमः[1]

पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते ।
एतदेव निरोङ्कारं कुर्यात् क्षत्रियवैश्ययोः ।
सोङ्कारं ब्राह्मणे ब्रूयात् निरोङ्कारं महीपतौ ।
उपांशु च तथा वैश्ये स्वस्ति शूद्रे प्रयोजयेत् ।।

सौभाग्यतिलकमाह मत्स्यपुराणम्

गोरोचनं सगोमुत्रं शुष्कगोशकृतन्तथा ।
दधिचन्दनसंमिश्रं ललाटे तिलकं न्यसेत् ।।
सौभाग्यारोग्यकृद्यस्मात् सदा च ललिताप्रियम् ।।

ललिता परमेश्वरी । कन्यावरयोः[2] पुष्पमाल्याद्युत्सवेन[3] साम्मुख्याचरणमाह हरिवंशः

आशीर्भिर्वर्द्धयित्वा तु देवर्षिः कृष्णमब्रवीत् ।
अनिरुद्धस्य वीर्याख्यो विवाहः क्रियतां विभो ।।
जम्बूलमालिकां द्रष्टुं श्रद्धा हि मम जायते ।।

तामाह हारावली, जम्बूलमालिका कन्यावरयोर्मुखचन्द्रिका । मुखदर्शनमिति रभसः । वाक्ये तु 'अद्य सोमार्कग्रहणे संक्रान्त्यादौ सुतीर्थके' इत्यग्निपुराणीयदाने निमित्तोल्लेखे सोमग्रहणेप्यद्येति श्रवणाद्, अन्यत्र रात्रावपि अद्येत्युल्लेख्यम् । अहःपदस्याहोरात्रपरत्वादविरुद्धम् ।४२।।

विवाहादिसंस्कारकर्मणि सौरेणैव वाक्यम्[4] ।

आब्दिके पितृकृत्ये च मासश्चान्द्रमसः स्मृतः ।
विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः ।। इति पितामहवचनात् ।

तिथिकृत्ये च कृष्णादिं व्रते शुक्लादिमेव च ।
विवाहादौ च सौरादिं मासं कृत्ये विनिर्दिशेत् ।।

---

[1]omitted in C.

[2]C adds सांमुख्यपूर्वकम्

[3]C adds सहितम् ।

[4]C adds कार्यम् ।

इति स्मृतिरत्नाकरधृतब्रह्मपुराणवचनाच्च। सौरः सूर्यसंक्रमः। विनिर्दिशेत् उल्लिखेत्। सौरे रविराश्युल्लेखोऽपि।

संक्रान्तिविहिते कार्ये संक्रान्तिः परिकीर्तिता।
मासोल्लेखश्चेतरस्मिन् रविराशिस्थितिस्तथा॥

इति गारुडात्। कल्पतरुरत्नाकरयोर्गृह्यपरिशिष्टम्

कन्यां वरयमानानामेष धर्मो विधीयते।
प्रत्यङ्मुखा वरयन्ति प्रतिगृह्णन्ति प्राङ्मुखाः॥

वरयन्ति गोत्रप्रवराभिधानपूर्वकं ददति प्रतिगृह्णन्तीति श्रवणात्। अत एव दानधर्मे[1]

सर्वत्र प्राङ्मुखो दाता ग्रहीता च उदङ्मुखः।
एष दानविधिर्दृष्टो विवाहे च व्यतिक्रमः॥

इति प्रत्यङ्मुखः सम्प्रदाता प्रतिग्रहीता च प्राङ्मुखः। तथा च

प्राङ्मुखायाभिरूपाय वराय शुचिसन्निधौ।
दद्यात् प्रत्यङ्मुखः कन्यां क्षणे लक्षणसंमताम्॥

इति भवदेवभट्टीयसम्बन्धविविके[2]।

प्रवराभिधानमाह भविष्यपुराणम्[2]

तुलापुरुषदाने च तथैव हाटकाचले।
कन्यादाने तथोत्सर्गे कीर्तयेत् प्रवरादिकम्॥

इति हरिशर्मधृताश्वलायनगृह्यपरिशिष्टम्[4]। शिवदत्तप्रपौत्री विष्णुदत्तपौत्री हरिदत्तपुत्री यज्ञदत्तकन्या शिवमित्रप्रपौत्राय कृष्णमित्रपौत्राय राममित्रपुत्राय रुद्रमित्राय तुभ्यं संप्रदत्तेति। अत्र दृष्टार्थत्वात् पुंवचसां क्त-प्रत्ययार्थाविवक्षा, तेन संप्रददे इत्येव प्रयोगः। न च[5] संप्रदत्तेति। तथा च व्यासः

नामगोत्रे समुच्चार्य प्रदद्यात् श्रद्धयान्वितः।
परितुष्टेन भावेन तुभ्यं संप्रददे इति॥४३॥

इति। नाम्नः उपपदमाह विष्णुपुराणम्

ततश्च नाम कुर्वीत पितैव दशमेऽहनि।
देवपूर्वं नराख्यं हि शर्मवर्मादिसंयुतम्॥ (३।१०।८)

नरमाचष्टे इति नराख्यं नरनाम स्त्र्याख्यवन्मूलविभुजादिभ्यश्चेति क इति जिनेन्द्रबुद्धिः। अन्यतोऽपि चेति ड इति वररुचिः।

---

[1]omitted in C & D.

[2]शुचिरत्र पवित्रः, ब्राह्मणादिसन्निधावित्यर्थः, शुचिरग्निरिति वा। नचैतावता यजुर्वेदिपरता सामान्ये बाधकाभावात्, additional reading in E

[3]A. C & D read मतस्यपुराणम्।

[4]C आश्वलायनवचनम्।

[5]C तु।

देवपूर्वं देवात् पूर्वम्। तच्च विशिष्टं शर्मयुक्तम्।

शर्मा देवश्च विप्रस्य वर्मा त्राता च भूभुजः।
भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत्॥

इति यमवचनेऽपि समुच्चयोपलब्धेः। 'शर्मान्तं ब्राह्मणस्य स्यादिति'[1] शातातपीयेन शर्मान्तता च। एवं 'षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गले कुले' (म २।३४) इति मनुवचनात्; 'चूडा कार्या यथाकुलमिति' याज्ञवल्क्यवचनात्। 'देशानुशिष्टं कुलधर्ममुख्यं स्वगोत्रधर्मं न हि संत्यजेच्च' इति वामनपुराणाच्च संस्कारमात्रे कुलधर्मानुरोधेन कालान्तरे मङ्गलविशेषाचरणम्। शूद्राणां नामकरणे वसुघोषादिरूपपद्धतियुक्तनामत्वञ्च बोध्यम्[2]। 'देव्यन्तास्तु स्त्रियः स्मृता' इति द्विजातिस्त्रीविषयम्। 'शूद्रा दासान्तकाः स्मृताः' इति पुंयोगात्तत्पत्न्यः दासग्रन्ताः। पुंयोगाज्जातेश्च दासान्तता। व्यवहारोऽपि तथा।

यत्तु सर्ववर्णस्त्रीपरं देव्यन्ता इति तन्न प्रकरणात् द्विजातिपुंयोग[3]बाधाच्च। शर्मणीवर्मणीत्यादिप्रयोगस्तु न व्यावहारिकः। देवपूर्वं नराख्यं स्यादिति तत्परत्वानौचित्यात्[4]। एवमेव कुल्लूकभट्टः। तेन वाक्ये तथा कल्पना। अत्राहंपदप्रयोगस्तु, 'अहमस्मै ददानीति एवमाभाष्य दीयते' इति छन्दोगपरिशिष्टे (२, पृः २६) तथा दर्शनात्। ददानीति परगामिफले, ददे[5] इत्यात्मगामि फले बोध्यम्।

देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताः[6]।
सिद्धं सिद्धाधिकारांश्च श्रीपूर्वं समुदीरयेत्॥

इति राघवभट्टधृतप्रयोगसारदर्शनेन स्वर्गगामित्वादिना सिद्धोऽधिकारो येषां तानित्यनेन जीवतां श्रीशब्दादित्वं नाम्नि, मृतानां तु न तथेति शिष्टाः। श्राद्धादौ फलभागिनां गोत्राद्युल्लेखदर्शनादितरत्रापि तथोल्लेखाचारः। एवं श्राद्धे अमुकामुकगोत्रैतत्तुभ्यमन्नं स्वधा नमः इति ब्रह्मपुराणदर्शनात् देयविशेषणत्वेन एतच्छब्दप्रयोग इति।४४॥

अत्र कन्यावरयोः आश्वलायनोक्तपाठक्रमादृष्यशृङ्गोक्तशाब्दक्रमस्य बलवत्वाद्वरकुलानन्तरं कन्याकुलाभिधानाचारः। यथा हेमाद्रिधृतं ऋष्यशृङ्गवचनम्

वरगोत्रं समुच्चार्य प्रपितामहपूर्वकम्।
नाम संकीर्तयेद्विद्वान् कन्यायाश्चैवमेव हि॥

धनञ्जयकृतसम्बन्धविवेके[7] परिशिष्टीयम्

नान्दीमुखे विवाहे च प्रपितामहपूर्वकम्।
वाक्यमुच्चारयेत् धीमानन्यत्र पितृपूर्वकम्॥
एतदेव त्रिरुच्चार्य दद्यात् कन्यां यथाविधि॥

---

[1]C mentions the whole verse of Śātātapa thus :

शर्मान्तं ब्राह्मणस्य स्यात् वर्मान्तं क्षत्रसंश्रयम्।
गुप्तदासात्मकं नाम प्रसक्तं वैश्यशूद्रयोः॥

[2]C adds: एवमेव कुल्लूकभट्टः।

[3]A पुंयोगाच्च। C द्विजातिग्रहणबाधाच्च।

[4]C reads तत्परानौचित्यात्। E तात्पर्यालोचनाच्च।

[5]C omits this part of the sentence.

[6]E क्षेत्राधिपं तथा।

[7]D धनञ्जय विष्णुधृत सम्बन्धविवेके।

नान्दी समृद्धिरिति कथ्यते इति ब्रह्मपुराणात्[1] नान्दीमुखे पुत्रादिसमृद्धीनामादिरूपे विवाहे, विशेषणन्तु विवाहादेव पुत्रादिलाभज्ञापनाय। चकारस्त्वर्थः, अन्यत्र प्राप्तपित्रादिक्रमविच्छेदाय। नान्दीमुखपदस्य श्राद्धपरत्वे अनेकवचनप्राप्तपितृपूर्वकाभिलापबाधापत्तेः वाक्यभेदापत्तेश्च। एतदिति प्रपितामह-पूर्वकम् त्रिरुच्चारणं तच्च ऋष्यशृङ्गवचनात् कन्यानामान्तं वाक्यं न तु सम्प्रददे ददानि वेत्यन्तम्।

सकृदंशो निपतति सकृत् कन्या प्रदीयते।
सकृदाह ददानीति त्रीण्येतानि सतां सकृत्॥ (म ९।४७)

इति निश्चितमूलमनुवचनात्;

[2]वेदार्थोपनिबन्धृत्वात् प्राधान्यं हि मनोः स्मृतम्।
मन्वर्थविपरीता या सा स्मृतिर्न प्रशस्यते॥

इति वृहस्पत्युक्तेश्च।४५॥

अत्र च पारस्करेण बहिःशालाया'मुपलिप्ते उद्धृतावोक्षिते अग्निमुपसमाधाये'ति (पाः गृ सू १।४।३) सूत्रात् प्रधानगृहाङ्गने अग्निस्थापनानन्तरं 'कुमार्याः पाणिं गृह्णीयात्' (१।४।६)। 'त्रिषु त्रिषूत्तरा-दिष्विति' (१।४।७) सूत्रान्तरेण पाणिग्रहणाभिधानाद् यजुर्वेदिनां सामगदेयकन्याग्रहणेऽपि दानात् पूर्वमग्निस्थापनम्, त्रिषु त्रिषूत्तरादिषु नवसु नक्षत्रेषु। तत्र ज्योतिषेष्वनुक्तेष्वपि चित्राश्रवणा-धनिष्ठाश्विनीनक्षत्रेषु निरपेक्षकार्यत्वेन यजुर्वेदिनां विवाह इति। अत्रायं क्रमः[3]। प्राङ्मुखाय वराय प्रत्यङ्मुखः सम्प्रदाता एकादशीतत्त्वोक्तप्रमाणकं सर्वकर्मसाधारणं ॐ नमो नारायणायेत्युच्चार्य नत्वा ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षु-राततम्॥ इति विष्णुं संस्मृत्य ॐ तत् सदित्युच्चार्य तिलकुशसहितजलं गृहीत्वा ॐ अद्यामुके-मासि अमुकराशिस्थे भास्करे अमुकपक्षे अमुकतिथौ अमुकगोत्रः अमुकदेवशर्मा स्वर्गकामो विष्णु-प्रीतिकामो वा अहमित्यन्तं सकृदुच्चार्य अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्मणः प्रपौत्राय अमुक-गोत्रस्यामुकप्रवरस्यामुकदेवशर्मणः पौत्राय, अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्मणः पुत्राय, अमुक-गोत्रायामुकप्रवरायामुकदेवशर्मणे वराय, अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्मणः प्रपौत्रीं, अमुक-गोत्रस्यामुकप्रवरस्यामुकदेवशर्मणः पौत्रीं, अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्मणः पुत्रीं, अमुकगोत्रा-ममुकप्रवरां अमुकीं देवीमित्यन्तं त्रिरुच्चार्य सालङ्कारां प्रजापतिदेवताकां इमां कन्यां तुभ्यं सम्प्रददे। परार्थञ्चेद्दानं तदा ददानीति। अमुकगोत्र इत्यादौ षष्ठ्यन्ततानिर्देशः[4]। वीरेश्वररामदत्ता-दयोऽप्येवम्। विवाहे दानान्तरमाह हेमाद्रिधृतव्यासवचनम्

ग्रहणोद्वाहसंक्रान्तियात्रार्तिप्रसवेषु च।
दानं नैमित्तिकं ज्ञेयं रात्रावपि न दुष्यति॥

---

[1]C विष्णुपुराणात्।

[2]वेदार्थप्रतिबद्धत्वात् प्रामाण्यं तु मनोः स्मृतम्।
मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते॥
(वृहस्पतिस्मृतिः संस्कारकाण्डे श्लोः १३ G. O. S. Vol. Lxxxv.)

[3]D प्रयोगः।

[4]D adds इति विशेषः।

विवाहे प्रवर्तमाने रजोयोगेऽपि होमादिकं कार्यम्। तथा च गृहस्थरत्नाकरे वृद्धयाज्ञवल्क्य:[1]

विवाहे वितते तन्त्रे होमकाले उपस्थिते।
कन्याया ऋतुरागच्छेत् कथं कुर्वन्ति याज्ञिकाः॥
स्नापयित्वा तु तां कन्यामर्च्चयित्वा यथाविधि।
हुत्वाज्यञ्चैव लाजांश्च ततस्तन्त्रं प्रवर्तयेत्॥

हुत्वाज्याहुतीस्तत्रेति यज्ञपार्श्वः। मन्त्रानादेशे गायत्री हविषोऽनादेशे आज्यमिति कात्यायनसूत्रात् गायत्र्या घृतेन होम इति पशुपतिः। श्वश्र्वा स्नुषायै वस्त्रादि देयमाह हरिवंशे

ऊषां प्रद्युम्नगृहिणी स्नुषां दृष्ट्वा सुमध्यमाम्।
वासोभिरन्नपानैश्च पूजयामास सुन्दरीम्॥

मनुः

अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत्।
शौचे धर्मेऽन्नपक्त्याञ्च परिणाह्यस्य वेक्षणे॥ (म ९।११)

परिणाह्यस्य गृहोपकरणस्य शय्यासनादेः।

पानं दुर्जनसंसर्गः पत्या तु विरहोऽटनम्।
स्वप्नोऽन्यगृहवासश्च नारीणां[2] दूषणानि षट्॥ (म ९।१३) ४६॥

पानं मदिरादेः। वृहस्पतिः—

[3]ऋतुकालाभिगमनं कार्यं पुंसा प्रयत्नतः।
सदैव वा पर्ववर्जं स्त्रीणामभिमतं हि तत्॥
(संस्कारकाण्डे ३३)

कुर्मपुराणे

ऋतुकालाभिगामी स्याद्यावत् पुत्रो न जायते।

विष्णुधर्मोत्तरे

मण्डनं वर्जयेन्नारी तथा प्रोषितभर्तृका।
देवताराधनपरा तिष्ठेद्भर्तृहिते रता॥
धारयेन्मङ्गलार्थाय किञ्चिदाभरणन्तथा।
न जातु विधवावेशं कदाचिदपि धारयेत्[4]॥ (वि. ध २।३४।३९–४०)

तथा—

येनेच्छेद्विपुलां प्रीतिं तेन सार्धमरिन्दम।
न कुर्यादर्थसम्बन्धं दारसन्दर्शनन्तथा॥ (वि. ध २।८९।८६)

---

[1]In the Gṛhastha ratnākara (p. 80) the verse ocours as belonging to Yājñavalkya. In the Madana pārijāta (p. 161). the verse has been ascribed to Yajñapārśva.

[2]नारीसंदूषणानि in printed text of Manu (9/13).

[3]ऋतुकालाभिगमनं पुंसा कार्यं प्रयत्नतः।
सदैव पर्ववर्जं तु स्त्रीणामभिमतं हि तत्॥ (संस्कारकाण्डे श्लो: ३३) in printed text

[4]कारयेत् (वि. ध २।३४।४०) in printed text

हेमाद्रिधृताग्निपुराणम्

अप्रजायान्तु कन्यायां न भुञ्जीत कदाचन।
दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसि॥
महासत्वसमाकीर्णान्नास्ति ते नरकाद्भयम्।
तीर्णस्त्वं सर्वदुःखेभ्यः परं स्वर्गमवाप्स्यसि॥

अत एवादिपर्वणि गान्धारीवाक्यम्

एका शताधिका बाला भविष्यति कनीयसी।
ततो दौहित्रजाल्लोकादशोच्योसौ पतिर्मम॥

कामधेनावादित्यपुराणम्

विष्णुं जामातरं मन्ये तस्य मन्युं न कारयेत्।
अप्रजायान्तु कन्यायां नाश्नीयात्तस्य वै गृहे॥
ब्राह्मादौ तु विशेषेण नैव भोज्यं सदैव तु॥

मत्स्यसूक्ते[1]

भुक्त्वा पितृगृहे नारी भुङ्क्ते स्वामिगृहे यदि।
दौर्भाग्यं जायते तस्याः शपन्ति कुलनायिकाः॥

दक्षः

अनाश्रमी न तिष्ठेत्तु दिनमेक[4]मपि द्विजः।
आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते [2]त्वसौ॥
जपे होमे तथा दाने स्वाध्याये वा रतः सदा।
नासौ फलमवाप्नोति कुर्वाणोऽप्याश्रमाच्च्युतः॥ (१।१०-११)

विष्णुपुराणञ्च

व्रतेषु लोपको यस्तु आश्रमाद्विच्युतश्च यः।
सन्दंशयातनामध्ये पततस्तावुभावपि॥

अत्राश्रमाद्विच्युतश्च य इति सामान्येन दोषाभिधानात् शूद्रस्यापि तथात्वमिति। पूर्ववचने द्विज इत्युपलक्षणम्। शूद्राश्रममाह पराशरभाष्ये वामनपुराणम्[3]

चत्वार आश्रमाश्चैव ब्राह्मणस्य प्रकीर्तिताः।
गार्हस्थ्यं ब्रह्मचर्यञ्च वानप्रस्थञ्च भैक्षकम्॥
गार्हस्थ्यं ब्रह्मचर्यञ्च वानप्रस्थं त्रयो मताः।
क्षत्रियस्यापि कथिता आश्रमास्त्रय एव हि।
ब्रह्मचर्यञ्च गार्हस्थ्यमाश्रमद्वितयं विशः।
गार्हस्थ्यमुचितन्त्वेकं शूद्रस्य क्षणमाचरेत्॥

---

[1]The whole verse is omitted in A & C.

[2]हि सः in printed text.

[3]C. रामायणम्

[4]क्षणमात्रमपि

क्षणमुत्सवरूपम्। अत्र विशेषयति भविष्यपुराणम्

चत्वारिंशद्वत्सराणां साष्टानाञ्च परे यदि।
स्त्रिया वियुज्यते कश्चित् स तु रण्डाश्रमी स्मृतः॥
अष्टचत्वारिंशदब्दं यावद्वयो न पूर्यते।
पुत्रभार्यावियुक्तस्य नास्ति यज्ञेऽधिकारिता॥

एवञ्च प्रौढ़कन्यायाः दोषदृष्ट्या विवाहार्थं यथा महागुरोः सपिण्डनापकर्षस्तथानाश्रमिणोऽपि। एवञ्च प्रत्यवायश्रुतेः कन्यालाभसत्त्वेऽपि स्वेच्छया विवाहाकर्तुर्ज्येष्ठस्य 'कामतः कारिणस्तथेति' प्रागुक्तछन्दोगपरिशिष्टेन परिवेदने पर्युदस्तत्वात् तथाविधे ज्येष्ठे कनिष्ठस्य विवाहे परिवेदनदोषो नास्तीति। पैठीनसिः

'अलाभे चैव कन्यायाः स्नातकव्रतमाचरेत्।' एतच्च सन्न्यासानधिकारिणः। तदधिकारी तु गीतासुबोधिन्यां वशिष्टोक्तः।

प्राणे गते यथा देहः सुखदुःखे न विन्दति।
तथा चेत् प्राणयुक्तोऽपि स कैवल्याश्रमे वसेत्॥ ४७॥

अन्यत्र वशिष्ठोऽपि—

गृहस्थो विनीतक्रोधहर्षो गुरुणानुज्ञातः स्नात्वा असमानार्षेयीमसंस्पृष्टमैथुनाम[1]न्यूनवयस्कां सदृशीं भार्यां विन्देतेति। (८।१)

गृहस्थ इति भाविनि भूतवदुपचारात्तद्धर्मप्राप्त्यर्थम्। तेनाकृतदारोऽपि गार्हस्थ्यसंकल्पेनाश्रमान्तरनिवृत्तो गृहधर्मेष्वधिक्रियते इति यज्ञपार्श्व[2] इति कल्पतरुः। न सगोत्रां समानप्रवरां भार्यां विन्देतेति विष्णुसूत्रादौ नञः पर्युदासपरता वैधविषयकत्वात् प्रसज्यप्रतिषेधपरता च निन्दाप्रायश्चित्ताभ्यां रागप्राप्तविषयकत्वाच्च पर्वणि ऋत्वभिगमनवत्। अत एव भार्याशब्दो[3] यूपाहवनीयादिवदलौकिकाङ्गसङ्गेन अलौकिकसंस्कारयुक्तस्त्रीवचनः। ततश्च सपिण्डसन्ततिसमानप्रवरादिषु परित्यागप्रायश्चित्तश्रुतेः अदृष्टार्थनिषिद्धासु भार्यात्वमेव नोपपद्यते। तेन तथाविधासु परिवेदनादिदोषानिष्पत्तिर्धर्मानुपयोगश्च[4]।

नोद्वहेत् कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम्।
नालोमिकां नातिलोमां न वाचालां न पिङ्गलाम्॥
नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम्।
न पक्ष्यहिप्रेष्यनाम्नीं न च भीषणनामिकाम्॥ (म ३।८–९)

इत्यादिमन्वादिना निषिद्धासु।

मनुष्यदेवजातीनां शुभाशुभनिवेदकम्।
लक्षणं हस्तपादादौ[5] विहितं वेधसा किल॥

इति मत्स्यपुराणाद्युक्तशुभाशुभसूचकत्वेन दृष्टदोषासु भार्यात्वमुपपद्यते किन्तु दृष्टदोष एवेति।

---

[1]अवरवयसीम् in printed text

[2]Omitted in C.

[3]D.

[4]A & D. दोषोऽनिष्पत्तिः, धर्मकर्मानुपयोगश्च

[5]C. हस्तपादाद्यैः

मीमांसाभाष्यकारेणापि स्मृत्यधिकरणे उक्तम्। ये दृष्टार्थास्ते तत्रैव प्रमाणम् येत्वदृष्टार्था-स्तेषु वैदिकशब्द एव प्रमाणमिति।

मनुः

न निष्क्रयविसर्गाभ्यां भर्तुर्भार्या विमुच्यते। (म ९।४६)

निष्स्क्रयो विक्रयः, विसर्गस्त्यागः। कात्यायनः

दासेनोढ़ा त्वदासी या सापि दासीत्वमाप्नुयात्।
यस्माद्भर्ता प्रभुस्तस्याः स्वाम्यधीनः प्रभुर्मतः[1]॥ (श्लो ७२५)

एतच्च स्वत्वास्पदीभूतदासपरम्।४८॥

पदिन्यायात् सप्रतियोगिकदासपदाद्यो यस्य दासस्तेन तद्दास्यपि परिणीता तस्य दासी भवतीत्यर्थः। दासी च द्विविधा, कस्यापि न दासी, अन्यस्य दासी वा। अत्र पूर्वा सर्वथैव दासी परा तु तत्प्रभोरनुमत्या दासी तदननुमत्या न दासी न वा तत्पतिः कन्ये-श्वरस्य वड़वाकृतो दासः तयोस्तत्प्रभुतन्त्रत्वात्। वड़वादासमाह नारदः

भक्तदासश्च विज्ञेयस्तथैव वड़वाकृतः।

भक्तेनान्नेन दासः भक्तदासः। वड़वा दासी तया कृतः, तल्लोभादङ्गीकृतदास्य इति रत्नाकरः। व्यक्तमाह वृहस्पतिः

यो भुङ्क्ते परदासीन्तु स ज्ञेयो वड़वाभृतः।
कर्म तत्स्वामिनः कुर्यात् यथान्नेन भृतो नरः॥ (अभ्युपेत्याशुश्रूषा–श्लो ८)

तत्स्वामिनो दासीश्वरस्य। तयोरपत्यं द्वयोरेव स्वामिनोर्विभाज्यम्। रत्नाकरादयोप्येवम्। यत्तु

ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति।
क्षेत्रिकस्यैव तद्बीजं न वप्ता फलम्[2]र्हति॥
एष धर्मो गवाश्वस्य दास्युष्ट्राजाविकस्य च।
विहङ्गमहिषीणाञ्च विज्ञेयः प्रसवं प्रति॥ (मनु ९।५४–५५)

इति मनुवचनद्वयम्। तत्र दासीपदं परोढ़ापरम्। तस्यामन्येन यो जातो दासीभर्तुर्न बीजिभर्तुः। हारीतः, गर्भिणीमधोवर्णगां शिष्यसुतगामिनीं पापव्यसनासक्तां धनधान्यक्षयकरीं वर्जयेत्। यमः,

स्वच्छन्दगामिनी नारी तस्यास्त्यागो विधीयते।
न चैवं स्त्रीवधः कार्यो न चैवाङ्गवियोजनम्॥

वृहस्पतिः

हीणवर्णोपभुक्ता या त्याज्या वध्यापि वा भवेत्।
(प्राशश्चित्तकाण्डे श्लो ५८)

विशेषयति मिताक्षरायां स्मृतिः

ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण सङ्गताः।
अप्रजास्ता विशुध्यन्ति प्रायश्चित्तेन नेतराः[3]॥

इति वन्द्यघटीयहरिहरभट्टाचार्यात्मजमहामहोपाध्यायश्रीरघुनन्दनभट्टाचार्यविरचितमुद्वाहतत्त्वं समा-प्तम्॥४९॥

---

[1]Omitted in A & D.

[2]लभते फलम् in printed text of Manu (३।५४)।

[3]A reads: एतत् वलात्कारविषयम्।

[illegible]

# उद्वाहतत्त्वम् ॥

Commentary by Kāśirāma Vācaspati

नत्वा गुरोश्चरणपद्मरजांसि मूर्ध्ना
श्रीकान्तकान्तचरणञ्च निधाय चित्ते ।
श्रीकाशिरामसुकृती कृतिनां हिताय
सम्बन्धतत्त्वविवृतिं वितनोति यत्नात् ॥

स्मृतिशास्त्राम्बुधौ लीलाकृतसेतुं जगद्गुरुम् ।
विदितं त्रिषु लोकेषु नमामि रघुनन्दनम् ॥

स्वकर्तव्यग्रन्थसमाप्तिप्रतिबन्धकविघ्नसम्भावनास्ति अतः सम्भावितताद‍ृशविघ्नविनाशार्थं ग्रन्थकारः परमेश्वरप्रणामरूपं मङ्गलं कृतवान्। तच्च शिष्यशिक्षार्थमादौ निबध्नाति 'प्रणम्येति'। वाग्रूपस्य ग्रन्थस्य समाप्त्यर्थं वागीशस्य प्रणाम उचित इति सूचनार्थं वागीशमिति विशेषणमुपात्तम्। "उद्वाहकर्मण" इति, उद्वाहरूपसंस्कारजनकस्य अत्र कर्मपदस्य संस्कारजनकवाचित्वमतो ज्ञानविविशेषरूपस्य उद्वाहस्य क्रियात्वाभावेऽपि न क्षतिः। "तत्त्व"मनारोपितधर्मम् ।१॥

"अथोद्वाहे"ति। अथशब्दः मङ्गलार्थः। यथा—

ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्वा विनिर्यातौ तेन माङ्गलिकावुभौ ॥ इति। यद्वा,
'प्रायश्चित्ते विवाहे च तिथौ जन्माष्टमीव्रते' इति

मलमासतत्वोक्तवक्तव्यप्रतिज्ञानुसारेण प्रायश्चित्तनिरूपणानन्तरं विवाहनिरूपणादानन्तर्यार्थः। "प्रशस्ता" विहिता, यद्वा, प्रशस्ता कथिता इत्यर्थः। कथने एव शस्तप्रयोगः यथा विवाहे अषाढादिपञ्चके धनधान्यभोगरहितेत्यादिदोषश्रुतावपि 'दश मासाः प्रशस्यन्ते चैत्रपौषविवर्जिता' इत्यत्र। तथा 'दिवैव योगः शस्तोऽयं न च रात्रौ कदाचन' इत्यत्र च। अतो न असपिण्डादेः प्राशस्त्यकथनात् सपिण्डादेरप्राशस्त्यप्राप्त्या विहितत्वमाशङ्कनीयम्। शूद्रस्य सगोत्रपरिणयनाभ्यनुज्ञानार्थं "द्विजातीना"मित्युक्तं ब्रह्मक्षत्रियविशामिति तदर्थः। "ग्रहणरूपम्" स्वीकाररूपम्। "सदृशान्" कुलजात्यादिना स्वयोग्यान्। "आहरेद्दारा"निति दारत्वेन गृह्णीयादित्यर्थः। अतः स्वीकारात् पूर्वं दारत्वाभावेऽपि न क्षतिः। "दारपरिग्रहं" दारत्वेन स्वीकारम्। "भार्यां विन्देत" भार्यात्वेन स्वीकुर्यात्। "स्वीकाररूपे"ति ममेयं भार्या इत्याकारकेत्यर्थः। "समवाये"ति, तथा च समवायसम्बन्धेन यत्र तादृशं ज्ञानं तत्र विवाहकर्तृत्वरूपं पतित्वं, यत्र तु विषयतासम्बन्धेन तादृशं ज्ञानं तत्र विवाहकर्मत्वरूपं भार्यात्वम्। एवञ्च सति आहरेद्दारानित्यादौ समवायित्वरूपं कर्तृत्वमाख्यातार्थः, द्वितीयार्थस्तु विषयतारूपं कर्मत्वमिति बोध्यम्। "अत एव" विवाहस्य सम्बन्धभेदेन कन्यावरोभयनिष्ठत्वादेव।

ननु भार्यात्वसम्पादकग्रहणविशेषत्वं विवाहत्त्वं, भार्यात्वञ्च ग्रहणविशेषरूपविवाहविषयत्वम्। तथा च परस्परज्ञानसापेक्षज्ञानकत्वरूपोऽन्योन्याश्रयः। तथा हि विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वात् भार्यात्वस्य ज्ञानं विना विवाहज्ञानं न सम्भवति विवाहज्ञानं विना भार्यात्वज्ञानं न सम्भवति। तत्राह "भार्यात्वस्ये"ति, "स्वरूपे"ति। तथा च ज्ञानविशेष एव विवाहः, भार्यात्वसम्पादकमिति तु तस्य परिचायकमिति।२॥

"विवाहसम्पादके"ति। तथा च आह्वानपूर्वकयथाशक्त्यलंकृतकन्यादानसम्पाद्यो विवाहो ब्राह्म इति ब्राह्मलक्षणम्। दानं विना स्वीकारासम्भवात् विवाहस्य दानसम्पाद्यत्वम्। एवमन्यविवाहे लक्षणमूह्यम्। "अत एव" दानादिरूपसम्पादकभेदाद्ब्राह्मादिभेदादेव। "उक्तलक्षणाय" याज्ञवल्क्योक्तलक्षणविशिष्टाय। "एवञ्च" दानस्य विवाहसम्पादकतया विवाहादिभिन्नत्वे च। जुटा ङनट्प्रत्ययेन सिद्धम्। "तथात्वे" अत्र तु दानपदस्य भावप्रत्ययसिद्धत्वे ॥३॥

ननु अत्र दानपदस्य ग्रहणपरत्वे एककर्तृकत्वाभावादाहूयेत्यत्र कथं 'क्त्वा' तत्राह "प्रत्ययार्थे"ति। प्रत्ययस्य ङनट्प्रत्ययस्य अर्थो ग्रहणम् तस्य निमित्तीभूतो यः प्रकृते दाधातोरर्थः त्यागो दानं तेन सहेत्यर्थः। अत्रेदं बोध्यं, विवाहत्वञ्च उद्वहामीत्यनुगतप्रतीतिसाक्षिकजातिविशेषः। स च किं दानत्वस्य व्याप्यः उत स्वीकारत्वस्य व्याप्यः? अत्र प्राञ्चः। 'ब्राह्मो विवाह आहूय दीयते शक्त्यलङ्कृता' इति याज्ञवल्क्यवचनात् यद्दीयते इति व्युत्पत्त्या विवाहत्वव्याप्यस्य ब्राह्मत्वस्य दानत्वव्याप्यत्वसिद्धौ विवाहत्वस्य सुतरां दानवृत्तिता व्याप्यसत्वे व्यापकसत्त्वस्यावश्यकत्वात्। दानत्वमादाय साङ्कर्यभिया च पश्चाद्विवाहत्वस्य दानत्वव्याप्यत्वसिद्धिः। साङ्कर्यञ्च परस्परात्यन्ताभावसामानाधिकरण्ये सति एकाधिकरणवृत्तित्वम्। वस्तुतस्तु 'आच्छाद्य चार्चयित्वा च श्रुतशीलवते स्वयम्। आहूय दानं कन्यायाः ब्राह्मो धर्मः प्रकीर्तितः'॥ इत्यनेन मनुना स्फुटतयैव ब्राह्मत्वस्य दानत्वव्याप्यत्वमुक्तम्। न च कन्याया दानकर्ता विवाहकर्तेति प्रयोगः स्यादिति वाच्यं, प्रकृते विवाहे कर्तृपदस्य आश्रयमात्रपरत्वेन तथा प्रतीतेर्विवाहत्वावच्छिन्नाश्रयविषयकत्वात्। तादृशाश्रयत्वञ्च न दानकर्तरि स्वीक्रियते। यथाधिकरणस्वरूपाभाववादिनां मीमांसकानां मते घटवृत्तिपटाभावस्य घटस्वरूपत्वेऽपि पटाभावकर्ता कुलाल इति न प्रतीतिः; विशिष्टकर्तृताया अतिरिक्तत्वात्तथात्रापीति। किञ्च विवाहाश्रयत्वमत्रोद्देश्यतासम्बन्धेन, तच्च न दानकर्तरि अपि तु सम्प्रदाननिष्ठमिति। अत एव प्राचीनानां शुभविवाहेन दातुमिति वाक्यरचनापि संगच्छते। धान्येन धनवान् इत्यादाविव तृतीयाया अभेदार्थकत्वात्। किञ्च याज्ञवल्क्यवचने यस्मिन्निति पूरणेन मनुवचने च दानपदव्युत्पत्त्यन्तरकल्पनेन शाब्दबोधान्तरकल्पने बहुतरकार्यकारणभावप्रसङ्गाच्चेत्याहुः। स्मार्तास्तु 'अतःपरं समावृत्तः कुर्याद्दारपरिग्रह'मिति सम्बर्तवचनस्वरसेन दानकर्तुर्विवाहकर्तृत्वभिया च विवाहत्वस्य स्वीकारव्याप्यत्वमङ्गीचक्रुः। एवञ्च मनुवचने दानपदं दीयते यस्मै ग्रहणाय इति व्युत्पत्त्या स्वीकारविशेषपरम्। एवं याज्ञवल्क्यवचने यत्रेति पूरणीयम्। एवं प्राचां मते शुभविवाहेन दातुमिति वाक्ये तृतीयार्थस्य कारणत्वाभेदादिरूपस्य बाधात् शुभविवाहाय दातुमिति वाक्यभेदकल्पनमपीत्याहुः, तच्चिन्त्यम्। यथाश्रुतया सर्वसामञ्जस्ये बहुतरकल्पनाया अन्याय्यत्वात्।

केचित्तु, कुमारीपाण्यवच्छेदेन प्रतिग्रहीतृपाणिसंयोगविशेषवृत्तिजातिविशेषो विवाहत्वम्। अत एव सम्प्रदानकर्तुर्न विवाहकर्तृत्वापत्तिस्तादृशसंयोगस्य प्रतिगृहीतृनिष्ठत्वादेवं संयोगस्य उभयनिष्ठत्वात् कन्यावरयोर्विवाह इत्यपि संगच्छते। एवं प्राचां शुभविवाहेन दातुमिति वाक्यस्थतृतीयार्थस्य

कारणार्थकतया एव उपपत्तिः संयोगस्य दानपूर्ववृत्तित्वादिसत्त्वादिति। युक्तञ्चैतत् 'कुमार्याः पाणिं गृह्णीयात् त्रिषु त्रिषूत्तरादिष्वि'ति पारस्करसूत्रस्वरसेन कुमारीपाणिसंयोग-विशेषस्य विवाहत्वस्वीकारात् आसुरादावपि तथा संयोगः कल्प्यते। अतः परमित्यादिवचनस्थित-परिग्रहादिपदमपि तादृशसंयोगपरमित्यदोषः। 'ब्राह्मो विवाह' इति वचने यत्रेति पूरणीयम्। 'आच्छाद्य चार्चयित्वा च' इत्यादि वचने ब्राह्म इत्यस्य ब्राह्मविवाहाद्यनुष्ठानमित्यर्थः इत्याहुः। "भार्यात्वसम्पादकग्रहणं विवाह" इति यदुक्तं तत्रैव विचार्यते। ननु किमिदं भार्यात्वसम्पादकत्वं; तथा हि भार्यात्वसम्पादकत्वं न भार्यात्वजनकत्वं यतो ग्रहणविशेषविषयत्वं विषयतासम्बन्धेन ग्रहणविशेषवत्त्वं वा भार्यात्वम्। न च तं प्रति ग्रहणस्वरूपस्य विवाहस्य हेतुत्वम्। न च भार्यात्वव्यवहारजनकत्वं तदिति वाच्यम् व्यवहारो हि शब्दप्रयोगः, तं प्रति विवाहस्य हेतुत्वे मानाभावात् व्यवहर्तव्यतावच्छेदकप्रकारकव्यवहर्तव्यज्ञानस्यैव हेतुत्वात्। अत्रोच्यते—स्वरूप-सद्विशेषणत्वेनेति यदुक्तं तस्यैवं तात्पर्यं यत्किञ्चित्विवाहव्यक्तिमादाय तद्व्यक्तिसमवेतमान-सत्वान्यमानसान्यासमवेतधर्मसमवायित्वं विवाहत्वं, तादृशधर्मश्च उद्वहामीतिप्रतीतिसाक्षिको मानसत्वव्याप्यो जातिविशेषः। तञ्चादाय सर्वत्र लक्षणसमन्वयः। मानसत्वव्याप्यजात्यन्तर-मादायातिव्याप्तिः स्यादत उक्तं तद्व्यक्तिसमवेतेति; मानसत्वमादाय घटादिमानसेऽतिव्याप्ति-वारणाय मानसत्वान्येति; प्रत्यक्षत्व-ज्ञानत्व-गुणत्वादिकमादाय घटादिचाक्षुषादावतिव्याप्ति-वारणाय मानसान्यासमवेतेति। इदन्त्ववधातव्यं संस्कारविशेषो विवाहः, स च संस्कारः ज्ञानविशेषो वा तज्जन्यादृष्टविशेषो वा तज्जन्यभावनाख्यसंस्कारविशेषो वा। नाद्यः ज्ञानस्य तृतीयक्षणवृत्तिध्वंसप्रतियोगितया तृतीयक्षणादौ विवाहरूपसंस्काररहितत्वापत्तेः। न द्वितीयः-विवाहस्य अदृष्टजनकत्वे मानाभावात्। न तृतीयः मरणेन तन्नाशे तस्य संस्कार रहितत्वापत्तेः। न चान्येषां ज्ञानानां आशुविनाशित्वेऽपि विवाहरूपज्ञानस्य न तथात्वं स्वीकार्य-मिति वाच्यम्। योग्यविभुविशेषगुणानां नाशं प्रति स्वानन्तरोत्पन्नविशेषगुणत्वेन हेतुत्वान्नाश-सामग्रीसत्त्वेन स्थैर्यस्य वक्तुमशक्यत्वात्। अत्र वदन्ति ज्ञानविशेषरूपो विवाह एव संस्कारः, न चोक्तदोषः, संस्कृतत्वं हि न समवायसम्बन्धमात्रेण संस्कारवत्वं किन्तु समवायध्वंसान्यतर-सम्बन्धेन संस्कारवत्त्वमिति। वस्तुतस्तु यथा स्वर्गकामो यजेत इत्यादौ विधिप्रत्ययेन यागजन्या-पूर्वापरनामा अदृष्टविशेषो बोध्यते तथात्रापि भार्यां विन्देत इति विधिप्रत्ययेन विवाहजन्याऽपूर्वा-परनामा अदृष्टविशेषो बोध्यते, तस्य च स्थिरत्वात् तृतीयक्षणादावपि संस्कृतत्वं, मरणेन तन्नाश-स्वीकारान्न जन्मान्तरीयतादृशादृष्टमादाय संस्कृतत्वम्। एतेन जन्मान्तरीयविवाहरूपसंस्कारस्य ध्वंससम्बन्धेन सत्त्वात् संस्कृतत्वापत्तिरिति परास्तम्। ज्ञानविशेषरूपविवाहजन्यादृष्टविशेषस्यैव संस्कारत्वात् तस्य च मरणेन नाशादिति संक्षेपः।४।।

ननु दानस्य विवाहसम्पादकत्वे मन्त्रविशेषणां विवाहसम्पादकतया बोधकवचनविरोधस्तत्राह "यत्त्वि"ति। "पाणिग्रहणिका" इति। सप्तपदीगमनकाले कन्याया यत् पाणि गृह्यते तन्मन्त्रा इत्यर्थः। "लक्षणं" चिह्नम्, तेषामिति पञ्चम्यर्थे षष्ठी, "तेभ्यो" मन्त्रेभ्य इत्यर्थः। "विवाहगते"ति विवाह-गतयोर्वरकन्ययोरित्यर्थः। "विशेषे"ति विलक्षणेत्यर्थः। तथा च पूर्वपूर्वसंस्कारसहकृतपरस्परक्रियाभि-विलक्षणसंस्कारो जन्यते इति भावः। "अत एव" तादृशमन्त्राणां वैलक्षण्यमात्रसमाधायकत्वादेव। "अङ्गभूताः" न तु प्रधानभूताः। तथा च अङ्गप्रकर्षेण फलप्रकर्ष इति भावः। "जायात्वं" कृत्स्नं जायात्वं 'सप्तमे पदे कृत्स्न'मित्युक्तेः। तथा च परस्परक्रियावैलक्षण्यमात्राभिधायिका इति भावः। "त्रिशङ्कुः" राजविशेषः। "सवर्णासु" सवर्णास्वेव अयं वक्ष्यमाणो विधिः। "प्रतोदः" पाँचुनीति

प्रसिद्धिः। "उत्कृष्टवेदने" उत्कृष्टकर्तृकविवाहे। पृथक्त्वमिति उद्वाहकर्मणीत्युक्तेरिति भावः। "आधाने"ति अग्न्याधाने इत्यर्थः। "सा" असपिण्डा असगोत्रा च, "अत एव" आधानादेर्मिथुन-साध्यत्वादेव।

"न गृह"मिति, शालारूपं गृहं गृहस्थशब्दान्तर्गतगृहपदेनाहुरिति न, किन्तु गृहिणीरूपं गृहमुच्यते इत्यर्थः। "पुरुषार्थान्" अग्न्याधानादिरूपधर्मादीन्। "पुत्रे"ति, तथाच—'पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते। अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति पिष्टप'मिति।५।।

चतुर्थाद्यास्त्रयः पित्राद्यास्त्रयः। "पिण्डद" इति पिण्डपदं पिण्डलेपोभयपरम्। "सापिण्ड्य"मिति दातृत्वभोक्तृत्वान्यतरसम्बन्धेन पिण्डलेपान्यतरवत्त्वं सापिण्ड्यमिति सपिण्ड्यलक्षणम्। "पक्षा"दिति। अत्र पक्षशब्दः समूहवाची; "अत एव" विष्णुपुराणे पित्रपेक्षया सप्तमवर्जनादेव। एकपितृकस्यापी-त्यादिना द्विपितृकस्य परिग्रहः। "मनुवचने" 'असपिण्डा च' इत्यादिमनुवचने। "सार्थक"मिति एकपितृकस्य पित्रपेक्षया सपिण्डावर्जने पितुरिति सार्थकम्, सगोत्रावर्जने तु निरर्थकम्, पितुः सगोत्रायाः स्वस्यापि सगोत्रत्वात्। द्विपितृकस्य तु सपिण्डावर्जने सगोत्राया वर्जने च उभयत्रैव पितुरिति सार्थकमिति भावः। ननु विवाहकर्मरूपभार्यात्वस्य विवाहात् पूर्वमसम्भवात् कथमु'द्वहेत् द्विजो भार्या'मिति सङ्गच्छतां, तत्राह "भाविनी"ति। ननु सप्तमीं पितृपक्षाच्चेति वचनेन सप्तम्या विवाह्यत्वं बोध्यते कथं तत्र परित्यज्येति पूरयित्वा तस्या वर्जनीयत्वमुच्यते तत्राह "न सगोत्रा"मिति।६।।

ननु मातृपदस्य मातामहे लक्षणा क्वापि न दृष्टा तत्राह "अथे"ति। "तत्पत्नी"स्तेषां पत्नीः। तास्तर्पयेदिति शेषः। "मातृत" इति मातृत इत्यस्य। ननु त्रीन्मातृत इत्यत्र पुंलिङ्गनिर्देशाद्य-नुपपत्त्या लक्षणा स्वीकृता, तत्र किमर्थं लक्षणा स्वीकर्तव्या तत्राह "अन्यथे"ति। अत्र मातृपदस्य मातामहपरत्वाभावे इत्यर्थः। "अप्रत्ताना"मिति, पितृकुले साप्तपौरुषं सापिण्ड्यमित्यर्थः। पिण्ड-निवृत्तिः सप्तमे पञ्चमे वेति गतेति शेषः। "व्यक्त एवे"ति पिण्डनिवृत्तिरित्यर्थस्य सापिण्ड्यनिवृत्ति-रेवेत्यर्थः। सापिण्ड्यनिवृत्तिरितिपाठे तु व्यक्त एवार्थ इति भावः।।७।।

ननु अप्रत्तानां त्रिपौरुषसापिण्ड्यविधायकवचनविरोधस्तत्राह 'एवञ्चे'ति, साप्तपौरुषसापिण्ड्य-विधायकवचनसत्त्वे चेत्यर्थः। "विवाहमात्रे"ति, तथा च विवाहातिरिक्तस्थलेऽशौचादौ त्रिपौरुषसापिण्ड्य-मित्यर्थः। पूर्वोक्त—'सप्तमीं पितृपक्षाच्चे'त्यादिविष्णुपुराण—'न सगोत्रा'मित्यादिविष्णुसूत्राभ्यामित्यर्थ :। अस्य च एकवाक्यत्वादित्यनेनान्वयः। असमानार्षेयीं असमानगोत्रप्रवरामित्यर्थः। "मूर्धाभिषिक्तादे"-रिति, ब्राह्मणात् क्षत्रियासु जातो मूर्धाभिषिक्तः। तथा च मूर्धाभिषिक्तो मातामहकुले त्रीन् वर्जयेदित्यर्थः। पितृकुले च पञ्चमं वर्जयेत्तदन्या क्षत्रिया वैश्या च विवाह्येत्यर्थः। "अन्यथा" त्रीनित्यादेरधिकदोषपरत्वाभावे। "धर्मत" इति, यतो भगिन्यो भवन्ति अतस्ता वर्जयेदित्यर्थः। "का गति"रिति मातृष्वसृदुहित्रादिभिन्नाया विवाह्यत्वप्रसक्तेरिति। "प्रमातामहे"ति, तथा च प्रमातामह-वृद्धप्रमातामह-मातृबन्ध्वपेक्षया सन्ततित्रयं तेषां चतुर्थसन्ततिपञ्चमसन्तत्यपेक्षया त्रितयान्तर्गतत्वेऽपि मातृष्वसृदुहितृमातुलदुहित्रोरन्यापेक्षया दुष्टत्वार्थं, एवं मातामहापेक्षया त्रितयान्तर्गतत्वेऽपि मातृष्वसृदुहितृमातुलदुहित्रोरन्यापेक्षया अधिकदुष्टार्थं, मातृष्वसृदुहित्रित्यादि पैठीनसिवचनान्तरं यतस्तयोर्दुष्टत्वं 'त्रीन् मातृत' इत्यनेन पैठीनसिना पूर्वमेवाभिहितमिति। एवं पितृपक्षोऽपीति पितृष्वसृदुहितुः पित्रादिपञ्चकान्तर्गतत्वेऽपि अन्यापेक्षया अधिकदोषायेति भावः।।८।।

'अन्येषा"मिति मतमित्यर्थः। "ग्राह्या" अविवाह्यत्वेन ग्राह्या। "नानाश्रुती"ति मातामहपक्षे सप्तमीं परिहृत्य विवहेत् पञ्चमीं वा परिहृत्य विवहेदिति नानाश्रुतिरित्यर्थः। एवमभिहितमत

माह "अत्रापी"ति। "आपञ्चमा"दिति सुमन्तुवचनस्थमापञ्चमादिति, पैठीनस्युक्त'त्रीन् मातृतः पञ्च पितृतः' इत्यस्य समानं यथा तत्राधिकदोषाय इत्युक्तं तथात्रापीति भावः। नन्वेवमापञ्चमादित्यस्य पितृपक्षानुरोधादधिकदोषार्थकत्वे मातामहपक्षे कथं तदुपपद्यताम्, तत्र पैठीनसिना त्रयाणामधिकदोष-वर्णनम्। "एतेन" इति, अन्येषां मतमित्यस्य वक्ष्यमाणं यत् सामञ्जस्यं तदनुरोधेन इत्यर्थः। "युक्तत्वा"-दिति, अन्यथा अन्येषामिति न सङ्गच्छते। "एवञ्च" आसप्तमादित्यस्य आपञ्चमादित्यस्य च उभय-पक्षपरत्वे चेत्यर्थः। "पञ्चमा"दीति आदिना पुरुषत्रयग्रहणम्। "मातामहलक्षणे"ति, अन्यथा मातरमादाय पञ्चमगणनायामासप्तमादिति मातृपक्षीयसप्तमवर्जनबोधकवचनस्य तु 'मातृपक्षाच्च पञ्चमी'मित्यनेनैकवाक्यता न स्यादिति भावः॥९॥

"एतेने"ति मातृपक्षे सप्तमीपर्यन्तवर्जनबोधकवचनेन सहैकवाक्यत्वानुरोधेनेत्यर्थः। "अनूढे"ति मातुरनूढात्वकालीनेत्यर्थः। "अत एव" मातृपदेन मातामहस्य लक्षणीयत्वादेव। "मातामहस्ये"ति मातामहमादाय इत्यर्थः। मनुवचने 'असपिण्डा चे'त्यादौ। "सपिण्डकन्ये"ति, तथा च 'सपिण्डता तु सर्वेषां गोत्रतः साप्तपौरुषी'तिवचनप्राप्तमपि गोत्रैक्यं न विवाहस्थलीयसापिण्ड्यघटकमिति भावः। "अत एव" सपिण्डकन्यापरम्पराजाताया अपि वर्जनीयत्वादेव। पितृमातृसगोत्रामात्रस्य वर्जनीयत्वे तु त्रिगोत्रादिति प्रतिप्रसवो निरर्थकः स्यादिति भावः। "अत्रे"ति 'पञ्च मातृतः परि-हरे'दित्यादिवचने इत्यर्थः। तथा च पितृमातृशब्दयोः पितृमातृसम्बन्धित्वावच्छिन्ने लक्षणेति भावः। सन्तानिनः सन्तानविशिष्टाः पतितास्तेन सन्तानस्यापि पतितत्वम्॥१०॥

"अपत्यानि" पुत्रपौत्रादीनि। "व्यावर्तको" भेदबुद्धिजनकः। यथा द्वौ काश्यपौ गोत्ररूपौ तयोः परस्परभेदबुद्धिः प्रवरभेदेन पञ्चमप्रवरकाश्यपात् त्रिप्रवरकाश्यपो भिन्नो जन्यत इति। ग्रन्थकारस्तु घृतकौशिकगोत्रस्थले प्रवरभेदं दर्शयिष्यति। "एवञ्चे"ति ब्राह्मणरूपस्य आदिपुरुषस्य गोत्रत्वे चेत्यर्थः। "राजन्यविशां" क्षत्रियवैश्यानां "प्रातिस्विकगोत्राभावात्" स्वकीयस्वकीयगोत्राभावात्। "यजमानस्य" इति यज्ञादिकर्मणि यजमानस्यार्षेयानित्यर्थः। अत एव ब्राह्मणक्षत्रियविशामेव। आर्षेयान् गोत्रप्रवरान् प्रवृणीत ब्रूते इत्यर्थः। ननु क्षत्रियादेर्यजमानत्वे तदार्षेयाभावात् किं वक्तव्यं तत्राह "पौरहित्या"निति, राजन्यविशां यज्ञादिकर्मणि पुरोहितस्यार्षेयान् ब्रूते इत्यर्थः॥११॥

"अत एव" ब्राह्मणक्षत्रियविशामेव आर्षेयसम्बन्धादेव। आर्षः प्रवरः। "कर्ता" एवमिति समुच्चारयितेत्यर्थः। "न मुह्यति" न भ्रमभाग् भवति। "आकांक्षितत्वेन" शूद्राणामार्षेयस्याभावात् किं कर्तव्यमित्याकांक्षितत्वेन। मासिकं वपनं क्षौरमेतच्च मासाशौचाभिप्रायेणोक्तम्। यद्वा शूद्राणां केवलगृहस्थाश्रमित्वेन मासिकं क्षौरम्। 'यथा मासि मासि गृहस्थस्य पक्षे पक्षे च यजुनः। ऋतौ ऋतौ यतीनां स्याद्यथेष्टं ब्रह्मचारिणा'मिति॥ "पूर्वपुरुषे"ति, न तु इदानीन्तनपुरोहितगोत्र-भागित्वमिति। "अत्र" विवाहे; "उपदिष्टे"ति, 'एतेषां यान्यपत्यानि' इत्यादिना ब्राह्मणस्य गोत्रमुपदिष्टं पौरोहित्यानित्यादिना राजन्यविशां गोत्रमतिदिष्टं वैश्यवदित्यनेन अतिदिष्टगोत्रस्य वैश्यस्य गोत्राति-देशः शूद्रस्य कृतः। अतोऽतिदिष्टातिदिष्टं शूद्रगोत्रमिति भावः। अन्यथा शूद्रस्यापि सगोत्रानिषधे अतिदेशे पौरोहित्यान् राजन्यविशामित्यतिदेशः व्यर्थ इति ब्राह्मणभिन्नानामित्येव ब्रूयादित्यर्थः। १२॥

ननु यदि एतया युक्त्या न शूद्रस्य सगोत्रा निषिध्यते तर्हि शूद्रस्य सगोत्राविवाहाभ्यनुज्ञानार्थं 'सा प्रशस्ता द्विजातीना'मिति मनुशातातपवचने द्विजातिग्रहणं व्यर्थं, तत्राह—"एतन्न्यायमूले"मिति एतत् युक्तिमूलक्मित्यर्थः। तथा च क्वचित् युक्तिलभ्योऽपि अर्थः क्वचिद्वचनेन निषिध्यते इति भावः।

"अन्यथे"ति, शूद्रस्य सगोत्रावत् सपिण्डायाः समानोदकायाश्चावर्ज्यत्वे इत्यर्थः। "व्यर्थं स्या"दिति, अत्र विषये भविष्यपुराणवचनं पठन्ति। 'समानगोत्रप्रवरां शूद्रामूढ्वा न दोषभाक्। शूद्र स्याच्छूद्रजातिस्तु सपिण्डे दोषभाग्भवे'दिति ॥१३॥

"अमत्या" अजानतः। "समानार्षेयीं" समानगोत्रप्रवराम्। "संख्यासंज्ञयो"रिति, संज्ञाया अन्यूनातिरिक्तनिवेशेनैव सर्वसामञ्जस्ये संख्याया अन्यूनातिरिक्तत्वनिवेशः स्पष्टार्थ इति। "अत" इति प्रवरैक्येऽपि गोत्रभेदसत्त्वात् गोत्रैक्येऽपि प्रवरभेदसत्त्वाच्चेत्यर्थ :। मरणमुद्दिश्य समुद्रयात्रास्वीकारः। गृहस्थस्य सर्वदा सजलकमण्डलुधारणम्। "मधुपर्के" अतिथिसेवायां, "पशोः" गोः। "मांसादानं" निषिद्धमांसादानम्। अत एव व्याकरोति "गोमहिषादे"रिति। महाप्रस्थानगमनं मरणमुद्दिश्य हिमालयगमनम्। आततायीति 'अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारापहारी च षडेते आततायिनः॥' "अघसंकोचनं" अशौचसङ्कोचनम्। "मरणान्तिक"मिति, मरणं अन्तिकं निकटवर्तियस्य तत्। "दासे"ति दासो निजभृत्यः। "गोपालः" स्वकीयानां गवां पालकः। "कुलमित्रं" पुरुषक्रमेण मित्रम्। अर्धसीरिणः कृषकाः शस्यार्घभागं भजन्ते। शूद्रेषु मध्ये एतेषामित्यर्थः। "पक्वते"ति दासादीनां अन्नं भोक्तव्यमिति पूर्ववचनार्थः। ब्राह्मणाद्यन्नस्य शूद्रेण पाकः कर्तव्य इति एतद्वचनार्थं इत्यनयोर्भेदः। भृग्वग्नीति 'जलप्रवेशी चानन्दं प्रमोदं वह्निसाहसी। भृगुप्रपाती सौख्यन्तु रणे चैवातिनिर्मलम्॥' इत्यादिना विहितं मरणमित्यर्थः। "वृद्धादिमरण"मिति अन्ते वार्धक्यासहिष्णुतया मरणमित्यर्थः। तच्च वृद्धत्वं शौचस्मृतेः लुप्त इत्यादिना विहितम्। "लोकगुप्त्यर्थं" लोकरक्षार्थम्। ननु एतेषां कर्मणां कलौ निषेधको वेदो नास्ति तत् कथमेतानि कलौ निषिद्धानि तत्राह "समयश्चे"ति ॥१४॥

"विशेषयती"ति। कस्मिन् युगे कीदृशसंसर्गपर्यन्तः संसर्गे दुष्ट इत्याकांक्षायां विशेषं वदतीत्यर्थः। "देश"मिति, सत्ययुगे एकदेशवासरूपसंसर्गपर्यन्तः संसर्गे दुष्ट इत्यर्थः। एवं परत्रापि बोध्यम्। "अर्थमादाय" पापिजनात् धनं प्रतिगृह्य। "माधवाचार्य" इति, एतन्मते संसर्गेण पतितो न भवति किन्तु कर्मणैवेति बोध्यम्। "कर्तृसंसर्गनिषेधात्" कलौ कर्तृसंसर्गनिषेधात् पापकर्तुः संसर्गस्य अनिषिद्धत्वे 'कर्तारन्तु कलौ त्यजे'दि'ति न संगच्छते। "सम्भाषणे"ति सत्यादियुगत्रये निषिद्धेत्यादिः। "अत एव" कलावपि सम्भाषणादित्रयेतरगुरुसंसर्गस्य पापजनकत्वादेव। "अनेकधा" अनेकप्रकाराः। "इदन्तनै"रिदानीन्तनैः। "त्यागेषु" उपेक्षासु। "निवेशनस्य" स्वगृहस्य। "एतयोः" स्त्रीशूद्रयोः। गोत्ररिक्थ इति द्वितीयाद्विवचनान्तम्। "दत्रिमः" दत्तकः। यतः गोत्ररिक्थानुगः पिण्डः अतो ददतो जनस्य। स्वधा श्राद्धं अपगच्छतीत्यर्थः। "पितुर्गोत्रेण" जनयितुर्गोत्रेण य आचूडान्तं चूडापर्यन्तं संस्कृतः सोऽन्यतः अन्यस्य पुत्रतां न याति, आचूडान्तं इत्यत्र 'आङ अभिव्याप्तौ'। निजगोत्रेण प्रतिगृहीतुः गोत्रेण दत्ताद्या इति तदेत्यादिः। "पुत्रेष्टि"मिति पुत्रे जातेऽरणिं मथित्वा इत्यादि विहितम्। एतच्च साग्निना कर्तव्यम्। संस्कृतायां स्वयंकृतविवाहख्यसंस्कारायाम्। मनुवचने 'असपिण्डा च या मातु'रिति वचने ॥१५॥

ननु मातामहसमानोदकपर्यन्ताया निषिद्धत्वे 'मातुः सपिण्डा' इत्यनेन सपिण्डापर्यन्तवर्जनमसङ्गतं तत्राह–"यत्त्व"ति। "मातुः सपिण्डे"ति मातामहसपिण्डेत्यर्थः। "सन्तती"ति, अन्तरा कन्याजननान्मातामहगोत्राभावे सन्ततिपरम्पराया इत्यर्थः। एतद्वचनस्य 'मातुः सपिण्डा यत्ने'नेति वचनस्य। तादृशि आसुरादिरूपे। "मातृनाम्नी"ति, तामिति पूरणीयम्। "गृह्णीया"दिति तामिति पूरणीयम्। प्रमादान्मातृनाम्न्या अविवाह्यत्वज्ञानाभावात्, मातृनाम्नीत्वे ज्ञानाभावाद्वा। अन्यथा

इति मातृनाम्नया अपि विप्रद्वारा नामान्तरं कृत्वा विवाह्यत्वे। "पूर्वोक्ते"ति पूर्वोक्तवचनात् प्राप्तो यो निषेधस्तद्वैयर्थ्यापत्तेस्तथा हि प्रायश्चित्तं समाचरेदिति प्रायश्चित्तविधानान्मातृनाम्नीं न विवहेदिति निषेधस्य कल्पग्रतया प्राप्तिः। "वैयर्थ्ये"ति सर्वत्रैव मातृनाम्नया विप्रद्वारा नामान्तर कृत्वा विवाहस्य विधिप्राप्तत्वे निषेधो व्यर्थः स्यादिति भावः ॥१६॥

"कुलानि" पूर्वपुरुषान् "पातयेत्", नरकभागिनः करोति। "वर्तमाने"ति, "विवाहो" ज्ञानविशेषः ज्ञानस्य च तृतीयक्षणवृत्तिध्वंसप्रतियोगितया विवाहत्रयस्य एकदा एकस्मिन्नसम्भवेन मिलनरूपसमाहारस्य असम्भवात् विवाहपदस्य तद्विषयीभूतस्त्रियां लक्षणा। तथा च त्रयाणां विवाहानां तद्विषयीभूत-स्त्रीणां समाहार एकदावस्थानमिति वर्तमानस्त्रीत्रयलाभ इति भावः। अत्रेदं बोध्यम्। 'न करोति चतुर्थक'मित्यनेन चतुर्थकविवाहप्रागभावाभावविशिष्टत्रिविवाहत्वेन दुरष्दृटं प्रति जनकत्वं लभ्यते। एवञ्च सति चतुर्थे विवाहे कृते प्रागभावनाशाद्दुरदृष्टं कथं न जायते। न च चतुर्थ-विवाहप्रागभावश्चतुर्थभार्यान्यतराभावविशिष्टत्रिविवाहं दुरदृष्टविधायकमिति वाच्यं चतुर्थ-भार्यायां मृतायां दुरटृष्टापत्तेर्दुर्वारत्वात्। तद्ध्वंसप्रागभावयोस्तदानीमसत्त्वात् तत्रापि दुरटृष्टं प्रति चतुर्थविवाहप्रागभाववदन्यत्रिविवाहत्वेन हेतुत्वं भेदमात्रस्य व्याप्यवृत्तित्वात् तच्चतुर्थविवाहप्रागभावनाशेऽपि चतुर्थविवाहप्रागभाववदन्यत्वाभावोऽक्षत एवेति। अव्याप्यवृत्ति-धर्मावच्छिन्नप्रतियोगिताकभेदोऽव्याप्यवृत्तिरिति मते तु दुरदृष्टं प्रति चतुर्थविवाहतद्ध्वं-सतत्प्रागभावान्यतमाभावविशिष्टत्रिविवाहत्वेन हेतुत्वमिति न कोपि दोषः, गौरवन्तु अगत्या स्वीक्रियते इति। "योग्यता"मसत्त्वेपि तत्तुल्यताम्। एष एवार्थः तयोर्योग्यतामवलम्ब्ये-त्यादिना उक्तोऽर्थः। "निपातेऽपि" असत्त्वेऽपि।१७॥

"एवञ्चे"ति पितृबन्धुमातृबन्धुविरहेपि तयोर्योग्यतामवलम्ब्य सप्तमीपर्यन्तायाः पञ्चमी-पर्यन्तायाश्च कन्यायाः परिहारे चेत्यर्थः। "कन्यान्तरसत्त्वे" पुत्ररहितकन्यान्तरसत्त्वे। "तस्याः" पुत्ररहितायाः। "तस्य" वरस्य। "अप्रतियोगित्वात्" असम्बन्धित्वात्। "मर्यादे"ति, पित्रादिचतुष्टयस्य गोत्रेभ्यस्त्रिगोत्रात् परतः कन्यामुद्वहेदिति विधौ गोत्रपदोत्तरपञ्चम्याः मर्यादाभिविध्यर्थसन्देहे इत्यर्थः। मर्यादा सीमा, अभिविधिरभिव्याप्तिः। "कार्यान्विते"ति पित्रादिचतुष्टयगोत्रेभ्यः त्रिगोत्रात् परतो विवहेदित्यत्र पित्रादिगोत्रचतुष्टयगोत्रेभ्यस्त्रिगोत्रात् परतो विवाहविषयकं कार्यमिति शाब्दबोधस्तत्र च पित्रादिचतुष्टयगोत्रं परित्यज्य त्रिगोत्रमादाय पित्रादिचतुष्टयगोत्रस्य न कार्या-न्वितत्वं पित्रादिगोत्रमादाय त्रिगोत्रगणने तु परम्परया पित्रादिगोत्रस्य कार्यान्वितत्वम्। यद्यपि सीमायामपि परम्परया कार्यान्वितत्वमस्त्येव तथापि सीमायामधिकपदार्थघटितपरम्परयेति मर्यादा नोचिता। तथाहि पित्रादिगोत्रघटितं त्रिगोत्रं परित्यज्य विवहेदिति विधिरभिविधौ, मर्यादायान्तु पित्रादिगोत्राघटितं त्रिगोत्रं विवहेदिति विधिरत्र च घटितत्वस्याभावोऽधिको निविष्टः। मीमांसकै-र्विधिप्रत्ययस्य कार्यत्वावच्छिन्नेऽपूर्वे शक्तिः स्वीक्रियते; तदुक्तं "कार्यभेदोऽथवा विधि"रिति, विषयत्वं च जन्यत्वम्। तद्यथा प्रतिप्रसववचनं यथा कर्तव्यं परिणयनमिति शेषः ॥१८॥

"प्रतियोगिचतुष्टयेति" पितृमातृपितृबन्धुमातामहमातृबन्धुरूपगणनाप्रतियोगिचतुष्टय इत्यर्थः। "सप्तमपञ्चमगणने" इति, अयं क्रम इति शेषः। "पूर्वत्र" ऊर्ध्वे। "परत्र" अधः। "तच्चतुष्टयं" पितृपितृबन्धुमातामहमातृबन्धुरूपप्रतियोगिचतुष्टयम्। 'सन्तानो भिद्यते' इत्यस्य तत्रेत्यादिः। "उभयत्र" पितृपक्षे मातृपक्षे च। "गणेत्" गणयेत्। "सप्तमपञ्चमोर्ध्वत्वं" सप्तमपञ्चमसन्तानपरत्वम्। सपिण्ड-

स्थलेऽप्येवंरूपगणनेत्याह "एवं यस्ये"ति। "तस्य तद्गणनायां" तस्य तत्सन्ततिगणनायाम्। "पूर्वेषा"-मिति प्रकृते वरस्य पितामहादीनां षण्णामित्यर्थः। यतो वरपितुः सापिण्ड्यं विविच्यते इति ध्येयम्। तत्परजातसप्तमान्तर्भावः, अर्थात् कन्यायाः। "स्वमात्रे"ति प्रकृते स्वं वरपिता, अन्यथा परेषामिति, षण्णां प्रत्येकापेक्षया गणनायां सापिण्ड्यं स्यादिति प्रकृते वरपितुः सापिण्ड्यं स्यादित्यर्थः। ननु स्वापेक्षयाधस्तनाष्टमस्य सापिण्ड्यं भवेत् को दोषस्तत्राह "अत एवे"ति स्वापेक्षयाधस्तनाष्टमस्य सापिण्ड्याभावादेवेत्यर्थः। ननु प्राक्तनाष्टमस्यापि सापिण्ड्यं भवतु को दोषस्तत्राह "सापिण्ड्ये"ति। तथा च 'दातृत्वभोक्तृत्वान्यतरसम्बन्धेन पिण्डलेपान्यतरवत्वं सापिण्ड्य'मित्यत्र तु पिण्डपदं पिण्डपरं लेपपरञ्च। एवं च प्राक्तनस्याधस्तनस्य वाष्टमस्य सापिण्ड्य इष्टापत्तिः कर्तुं न युज्यत इति भावः। "अत एव" अधस्तनाष्टमे सापिण्ड्याभावादेव। "बीजिनं" पितृमातृमहादिकम्, तथा च पुत्रादिकमारभ्य गणयेदिति भावः। एवं मातामहपक्षेऽपि विधेयविशेषणस्यैव; अतः 'एकत्र दृष्टः शास्त्रार्थो बाधकं विना अन्यत्रापि तथे'ति न्याय एव बीजम्॥१९॥

"पुंस्त्वस्ये"ति। आसप्तमात् पञ्चमाच्चेत्यत्र सप्तम-पञ्चम-शब्दयोः पुंस्त्वस्य इत्यर्थः। "विधेये"ति। विधेयविशेषणस्यैव विवक्षा क्रियते न तूद्देश्यविशेषणस्य। अतो ग्रहं संमार्ष्टि इत्यत्र उद्देश्यविशेषणमेकत्वं न विवक्ष्यते, उद्देश्यत्वं च विधेयभिन्नत्वम्, दशग्रहा गृह्यन्ते इति श्रुत्यन्तरेण ग्रहस्य प्राप्तत्वाद्, ग्रहांशे अप्राप्तप्रापकरूपविधिविषयत्वं नास्ति किं तु मार्जनांश एव विधिरिति प्रसङ्गादुक्तम्। "पितृसपिण्डत्वेन" वरस्य पितृसपिण्डत्वेन। "तदपेक्षया" बन्ध्वपेक्षया। "मातामहसपिण्डत्वेन" वरस्य मातामहसपिण्डत्वेन। "अत एव" सप्तमपञ्च-मान्तर्गतायाः कन्याया अविवाह्यत्वादेव॥२०॥

"पितृबन्धुप्रभृती"ति। पितृबन्धुसम्बन्धबीजीभूतानां पितृमातुलपुत्रेतरपितृबन्धो र्मातृमातामह-प्रमातामहादीनामिति यावत्, न तु पितृमातुलपुत्रेतरपितृबन्धोः पितामहादीनामित्यर्थः। पितृ-मातुलपुत्ररूपबन्धोस्तु पितृपितामहादीनां सन्ततिः सप्तमीपर्यन्ता नोद्वाह्या, तेषामेव सम्बन्ध-घटकत्वात्। बन्धुतन्मात्रोरसत्त्वेऽपि अत्र योग्यतावलम्बनादिति भावः। "कन्यान्तरसत्त्वे" अपुत्र-कन्यान्तरसत्त्वे। "तामादाय" अपुत्रकन्यामादाय। "बन्ध्वपेक्षया" बन्धुतन्मात्रापेक्षया इत्यर्थः। "स्वापेक्षया" पितुर्मातुश्च मातुलपुत्ररूपबन्धुगोत्रापेक्षया। "त्रिगोत्रगणनं" पूर्वतस्त्रिगोत्रगणनम्। सर्वसामञ्जस्यमेव दर्शयति "अन्यथे"ति, बन्ध्वपेक्षया त्रिगोत्रगणनेत्यर्थ। "पितामहीभ्रातृपुत्रे"ति। वरस्य पितामहीभ्रातृपुत्रेत्यर्थः। तस्य पितुर्मातुलपुत्रत्वाद् बन्धुत्वम्। "मातामहभगिनीपुत्रे"ति। वरस्य मातामहभगिनीपुत्रेत्यर्थः। "मातामहापेक्षया" वरस्य मातामहापेक्षया। "मातामही-भगिनीपुत्रे"ति वरस्य मातामहीभगिनीपुत्रेत्यर्थः। "मातामहीभातृपुत्रे"ति वरस्य मातामही-भातृपुत्रेत्यर्थः। तस्य मातुर्मातुलपुत्रत्वेन बन्धुत्वं बोध्यम्। सुमन्तुसूत्रस्थमन्यथापदं व्याचष्टे "एताः कन्यकाः परिणीता" इति। "सङ्करात्मकेति", नवविधपापान्तर्गतसङ्करीकरणाख्यपाप-विशेषकारिण्य इत्यर्थः। यथा विष्णुः, 'अथ पुरुषस्य कामक्रोधलोभाख्यं रिपुत्रयं सुघोरं भवति परिग्रहप्रसङ्गाद्विशेषेण गृहाश्रमिणस्तेनायमाक्रान्तोऽतिपातकमहापातकानुपातकोपपातकेषु वर्तते जातिभ्रंशकरेषु सङ्करीकरणेषु मलावहेषु अपात्रीकरणेषु प्रकीर्णेषु चे'ति॥२१॥

"अत एव" गुरोः कन्याया अविवाह्यत्वादेव। ननु न दोषत इति कथं सङ्गच्छतां गुरुपुत्रीविवाहे दुरदृष्टरूपदोषसत्त्वादतो व्याचष्टे "दृष्टदोषत" इति, दृष्टदोषो वैरूप्यादिः। "ब्रह्मदातु" र्गायत्रीदातुः। पौनर्भवा इति पुनर्भूशब्दात् स्वार्थेऽणविधानात् सिद्धम्। "निर्विशन्" विवाहमग्निहोत्रञ्च कुर्वन्।

परिवेत्तादौ परिर्वर्जनार्थः, वर्जग्रत्वञ्चात्र ज्येष्ठस्येति बोध्यम्। लाभार्थो विधिरत्र विवाहार्थः अग्न्याधानार्थश्च। "बहिर्वर्णेषु" ब्राह्मणादिवर्णचतुष्टयभिन्नेषु, "चारित्रग्रात्" सच्चारित्रग्रात् ज्येष्ठत्वं ज्ञेयम्। ब्राह्मणादिवर्णचतुष्टयस्य तु जन्मप्राथम्यात् ज्यैष्ठम्। तथा चोक्तं 'ज्यैष्ठं गुणवयःकृतमिति'; बहिर्वर्णेषु गुणकृतं ब्राह्मणादिचतुष्टये च वयःकृतं ज्यैष्ठमित्यर्थः। कुम्भपूरणन्यायेन पश्चात् जातस्य निषेकप्राथम्येऽपि ज्यैष्ठग्रमित्याह जन्मप्राथम्यादिति भूमिसम्बन्धप्राथम्यादित्यर्थः। "निष्ठानिर्देशात्" 'क्त'प्रत्ययनिर्देशात् ।।२२।।

"परिविन्द"न्निति, देशान्तरस्थादीन् वर्जनीयत्वेन लक्षीकृत्य विन्दन् विवाहमग्न्याधानञ्च कुर्वन् न दुष्यतीत्यर्थः। अत्र परिर्न केवलं वर्जनार्थः, तथात्वे द्वितीया न स्यादिति। "अशृण्वानं" अश्रूयमाणम्। "अब्दात्" अब्दं प्रतीक्ष्य। "पादं" परिवेदनप्रायश्चित्तस्य चतुर्थांशम्। ननु देशान्तरस्थेत्यत्र देशान्तरपदेन कियद्दूरदेशोऽभिधीयते तत्राह "देशान्तरपरिभाषाया"मिति। महानद्यन्तरं महानदीव्यवहितम्। निकटेऽपीति पाठे देशान्तरत्वं भवेदित्यर्थः। "षष्ठी"ति षष्ठीयोजनमतीत्येत्यर्थः। एवं चत्वारिंशद्योजनाद्यतीत्य इत्याद्यपि बोध्यम्। "त्रितये"ति वाणीगिरिमहानदीरूपत्रितयेत्यर्थः। "त्रिंशद्योजनाभ्यन्तरे" इत्यादे"र्वदेश्य"मिति परेणान्वयः। "वार्धुषिकांश्चैवे"त्यनेन वार्धुषिकस्य शूद्रतुल्यत्वाभिधानाद् वर्जनप्राप्तौ पूर्ववचने धनवृद्धीत्यादिना यत् पृथङ्निषेधः कृतस्तद्धनवार्धुषिकमिति वचने वर्षत्रयप्रतीक्षार्थमिति बोध्यम् ।।२३।।

"नैष्ठिके"ति, निष्ठा नाशस्तत्पर्यन्तमकर्तव्यत्वेन स्वीकृतभार्यासम्बन्धो नैष्ठिकब्रह्मचारी 'निष्ठा निष्पत्तिनाशान्ता' इत्यमरः। "दत्तकः"दत्तकपुत्रः। "ततश्चे"ति, वर्षत्रयप्रतीक्षानन्तरं विवाहे दोषाभावाच्च इत्यर्थः। "वर्षत्रयादूर्ध्व"मिति दोषाभाव इति शेषः। "विद्ये"ति विद्याद्यर्थे प्रोषिते तु द्वादशादिवर्षप्रतीक्षणम्। प्रत्ययव्यत्ययेन यक्प्रत्ययस्थाने नुत्प्रत्ययेन। "तदभिगमने" पतिकर्तृकाभिगमने। "यवीयसा" कनिष्ठभ्रात्रा ।।२४।।

"वृत्तिहीनं" विषयासक्तिहीनम्। "क्षेत्रज्ञं" जीवात्मानम्। "न परिविदन्ति" परिवेदनत्वे दोषं कनिष्ठस्य न जनयन्ति। एतच्च ज्येष्ठानुमत्या बोध्यम्। "आधानं" अग्न्याधानम्। नैव कारयेत् कनिष्ठेनैव कुर्यात्। एतद्व्यतिरिक्तायां विरूपज्येष्ठाव्यतिरिक्तायां ज्येष्ठायामनूढायां सत्याम्। "आवृत्ते तीर्थगमने" द्वितीयादितीर्थगमने। "प्रतिज्ञाते" आरब्धे। "रजस्वला" पारिभाषिकीरजस्वला न तु वास्तविकी। राजमार्तण्डीये 'अयुग्मे दुर्भगा नारी'त्यादि राजमार्तण्डीये ।।२५।।

"तस्या" इति पञ्चमी तादृश्याः कन्याया हेतोः पितुर्ब्रह्महत्यासदृशं पापं सम्भवेत्। वरयेत् स्वयम्बरा भवेत्। "नग्निका"मदृष्टरजस्काम्। नग्निकानागतार्तवेत्यमरः। रजसि वास्तवे। "महदेनः" महापापम्। "एनं" कन्यापितरम्। 'वर्षेणैकगुणां भार्यामुद्वहेत् त्रिगुणः पुमान्' इत्यादि च बोध्यम्। "अन्यथा" वास्तवे रजसि प्रवृत्ते सति। "स्वोक्ते"ति मनूक्तेत्यर्थः। स्वोक्तगुणहीनश्च गायत्रीहीनः सार्थगायत्रीहीन इति केचित्। विवाहप्रशस्तकालमाह "सप्ते"ति, गर्भकालमारभ्य सप्तवत्सरादूर्ध्वं जन्मकालमारभ्य मासत्रयाधिकषड्वर्षानन्तरमित्यर्थः। अत एवोक्तं 'पतिसेवा गुरौ वास' इति। "अयुग्मवर्षे" इति, जन्ममासादिति ल्यब्लोपे पञ्चमी, जन्ममासमादाय अयुग्मवर्षे, एवं जन्ममासमादाय युग्मे वर्षे इत्यर्थः। विवाहशुद्धिं तावत्कालस्य विवाहे दुष्टत्वाभावः। ।।२६।।

"प्रेतवती" मृतपतिका। "नानुकूल्यं" कालादेर्नानुकूल्यम्। "अविशुद्धापि" कालादेरविशुद्धापि। "ग्रहशुद्धि"मिति। ग्रहशुद्धिर्ग्रहाणां गोचरादिशुद्धिः। "अब्दशुद्धिः" अब्दानां युग्मायुग्मत्वविचारः।

"मासशुद्धिः" श्रावणादिराहित्यम्। "अयनशुद्धिः" दक्षिणायनराहित्यम्। "ऋतुशुद्धिः" स्त्रीलिङ्गऋतुवाचकशरदादिपदवाच्यऋतुत्यागः। "दिवसशुद्धिः" शनिमङ्गलवारादित्यागः। एतद्विचारश्च दशवर्षाभ्यन्तरवर्तिन्यामेव कन्यायां करणीयः न त्वेतदूर्ध्ववर्तिन्याम्। चैत्रपौषविचारस्तु सर्वदा कर्तव्यस्तयोः पर्युदासत्वादिति। तावन्मात्रानियमः कन्यायाः कालात्यये अर्कशुद्ध्यादिमात्रस्यैव अनियमः मलमासादिराहित्यनियमस्तु अस्त्येव इति स्मार्तमतम्। प्राञ्चस्तु 'आवृत्ते तीर्थगमने प्रतिज्ञाते च कर्मणि। कालात्यये च कन्यायाः कालोदोषो न विद्यते ॥' इत्यङ्गिरसो वचने आवृत्ततीर्थगमनादौ मलमासादिरूपतादृक्कालदोषाभावः प्रतीयते तादृक्कालदोषाभाव एव कन्यायाः कालात्यये इति वदन्ति इति भावः। "अत्रैव विषये" कन्यायाः कालात्ययविषये। "माङ्गल्येष्वि"ति आश्रमप्रयोजकेषु कन्यासम्वरणेषु कन्याया ऋतुशङ्कया क्रियमाणेषु विवाहेषु श्रावणादयो न दूषणावहाः। अत एवोक्तं "चैत्रपौषविवर्जिता" इति। एतादृशविशेषणद्वयानास्कन्दितविवाहेषु श्रावणादयो न दूषणावहाः एवेति भावः। तस्याः मलमासादिरूपसमयाशुद्धेः। "स्त्रीपुंसे"ति तथा चोक्तं 'मलमासादिकालानां विवाहादौ प्रयत्नतः। पुंसः प्रति सदा दोषात् सर्वदैव हि वर्ज्यता ॥' इति। "तथैव" प्रकरणभेदेनैव उपादेयम्। "गोदानं" साग्निकर्तव्यकर्मविशेषः। "स्वोक्ते"ति आश्वलायनोक्त इत्यर्थः, न तु मलमासादेरनियम इति भावः ॥२७॥

"भाविनो"ऽवश्यंभाविनः अनुपपदादावश्यके इति णिन्। "विवाहात् प्राक् कर्तव्य"मिति। तथा च अमुकस्य अमुकाया वा विवाहे जोटकादिदोषसूचनीयपापक्षयकाम इति दानादौ प्रयोक्तव्यमिति संस्कारतत्वम्। "रक्षा"मनिष्टनिवृत्त्यनुकूलव्यापारम्। अस्मिन् जन्मनि "तद्विघाताय" पुराकृतपापविघाताय। "अभिव्यक्तं" फलोन्मूखीभूतं दैवमुच्यते। "शनैश्चराये"ति शनैश्चराय, एवं 'शन्नो देवीति' शन्नो देवीति मन्त्रेण। "भूकम्पादे"रिति, एवं वृद्धिश्राद्धे कृते सूतकमपि न दोषावहम्। यथा विष्णुः, 'व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे। आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥ आरम्भो वरणं यज्ञे संकल्पो व्रतजापयोः। नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिष्क्रियेति' ॥२८॥

अथ कन्यादाने"ति। "अस्वातन्त्र्यस्य हेतुत" इति हेतुयुक्तात् हेतोरिरिति षष्ठीस्थाने तसि। "वाग्दानादिक"मिति, विवाहात् पूर्वं यदि वाग्दानं करोति तदा ॐ अद्येत्यादि अमुकगोत्रस्य अमुकदेवशर्मणो वरस्य अरोगिणोऽव्यङ्गस्यापतितस्य अक्लीवस्य विवाहाय अमुकगोत्राममुकीं देवीं कन्यां दातुं तवाहं प्रतिजाने इति पिता ब्रूयात्। 'अस्मिन् कालेऽग्निसान्निध्ये स्नातः स्नाते ह्यरोगिणि अव्यङ्गेऽपतितेऽक्लीवे पिता तुभ्यं प्रदास्यति', इति पितुरसन्निधाने भ्रात्रादिभिरेवं प्रतिज्ञा कार्या। तत्सन्निधाने तु पूर्वोक्तं वाक्यम्। पितुरभावे कर्त्रन्तरस्यापि। "तस्य" प्रधानस्य। यथा—प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पूनः। तदङ्गस्याक्रियायान्तु नावृत्ति र्न च तत्क्रिया ॥ नावृत्ति र्न च साङ्गप्रधानावृत्तिः, न च तत्क्रिया न च तावन्मात्रस्याङ्गस्य करणम्। विष्णुवचने 'पूर्वाभावे परः पर' इति शब्देनैव क्रम उक्तः। नारदवचने तु क्रमविधायकशब्दाभावात् पाठक्रम एवेति। माता त्वभावे सर्वेषामित्यनेन मातुः पूर्वं मातुलस्याधिकारः शब्देनैवोपपत्तेः। "अन्यथा" पूर्वसंस्कृतैरित्यत्र संस्कृतपदेन यत्किञ्चित् संस्कारविशिष्टबोधने। "पूर्वनाशे" पूर्वपूर्वाभावे। "हर"न्निति अन्यस्मै वराय ददवित्यर्थः। दत्तामपि वागदत्तामपि हरेत् अन्यस्मै श्रेष्ठाय वराय दद्यात्। "तथेत्यनेन" जननी तथा इति वचनस्थतथेत्यनेन ॥२९॥

"अत्र" 'दत्तामपि हरेत् कन्यां श्रेयांश्चेद्वर आव्रजेदि'त्यत्र। "पञ्चसु" ब्राह्मदैवार्षप्राजापत्यगान्धर्वेषु। "त्रिषु" आसुरराक्षसपैशाचेषु। तथा च दत्तामपि हरेदित्यस्य आसुरादिविवाहत्रयमेव विषय इति।

प्रतिश्रुत्येत्या दिवचनस्य तु ब्राह्मादिविवाहाष्टकमेव विषय इति। "षण्डादि" नपुंसकादि। "विधर्मस्ये"ति विधर्मोऽत्र दानानर्हताप्रयोजकपापवान्। "दत्तामपि" वाग्दत्तामपि, "सगोत्रोढ़ां" सगोत्राय वाग्दत्ताम्। "प्रतिगृह्येत्र"ति वाग्दत्तां कन्यां विवाहत्रत्वेन स्वीकृत्य। "तज्जः" ब्राह्मविवाहिताजन्यः। "प्रथमजः" दैवविवाहिताजन्यः। "उत्तरजः" आर्षविवाहिताजन्यः। "चरता"मिति भवता सह इयं कन्या धर्मं चरतामित्युक्त्वा अथवा भवान् अनया सह धर्मं चरतामित्युक्त्वा महात्मना या दीयते तज्ज इत्यर्थः। सहात्मना इति पाठे आत्मना सह षड्वंश्यान् पावयेदित्यर्थः। तेनैव सह वराद्गृहीतगोद्वयेनैव सह कन्यादानं आर्ष इति यस्मिन् विवाहे एवंभूतकन्यादानं स विवाह आर्ष इत्यर्थः। एवमन्यत्रापि बोध्यम्। "यत्र विवाहे", विवाहानां मध्ये स पापिष्ठो विवाहः ॥३०॥

"क्षतयोन्या अपी"ति। यथा हरिवंशे क्षतयोन्या ऊषाया विवाहार्थं श्रीकृष्णं प्रति नारदवाक्यम्। 'अनिरुद्धस्य वीर्याख्यो विवाहः क्रियतां विभो। जम्बूलमालिकां द्रष्टुं श्रद्धा हि मम जायते॥' इति। "नियोगे"ति, कर्तव्यत्वेन शास्त्रप्रतिपादितो धर्मो नियोगधर्मः। "वाचा सत्ये कृते" वाग्दाने कृते, "पति"रत्र वरः। अनेन विधानेन घृताभ्यक्तत्वादिना। शुक्लवस्त्रामित्यनेन रक्तवस्त्र-परिधानादिरूपसधवाधर्मो निराकृतः, कन्याया अनुमत्यसत्त्वे तु सा अन्यस्मै देयेत्याह "अद्भि"रिति। "प्राग्वचनं" कन्यायां दत्तशुल्कायामिति वचनम्। "पितुरेवे"ति षष्ठ्यर्थसम्बन्धं पुरःसरीकृत्य व्याचष्टे "अन्यस्मै" इति, एवकारेण कन्याया अनुमत्यसत्त्वे शुल्कदसम्बन्धो नास्तीति सूचितम्। "एतत् परमेव" कन्याया अनुमत्यसत्त्वपरमेव, अस्य च यमवचनमित्यनेनान्वयः। "सकृद्दानन्त्वि"ति 'सकृत् प्रदीयते कन्या' इत्यादि प्रतिपादितं सकृद्दानन्त्वित्यर्थः। "दत्तायां" वाग्दत्तायामनूढायामनुत्पन्नपाणिग्रहण-संस्कारायाम्। "वरागमः" वराणामागमो भवति, तत्र सर्वेषां वराणां मध्ये आद्यवरस्तां लभते इत्यर्थः। समूढायां कृतपाणिग्रहणायाम्। ननु विवाहकर्तृत्वाभावात् कथं तस्य वरत्वं तत्राह "विवाहार्थोपस्थित" इति। "गच्छेत्" दूरदेशं गच्छेत्। 'देयान्यस्मै इति तदनन्तरं अन्यस्मै देयेत्यर्थः। "समात्रयं" वत्सरत्रयम्। तासां विवाहेष्वित्यन्वयः। "दारलक्षणं" भार्यात्वेन सम्पादकम्। "तेषा"मिति पञ्चम्यर्थे षष्ठी। 'कुशलेन" इति कुशलेन कालातिवाहनं हेतुर्निमित्तं प्रवृत्तिजनकं यत्र तत्तदिच्छयैव कणकधारणादौ प्रवृत्तेः। "करणसाधना"दिति, स्वस्ति कुशलेन कालातिवाहनं ईयते प्राप्यते येन तत् स्वस्त्ययनमित्यर्थः ॥३१॥

प्रतिपादकवचनमिति। यथा—'संस्थितायान्तु भार्यायां सपिण्डीकरणान्तिकम्। पैतृकं भजते गोत्रमूर्ध्वन्तु पतिपैतृक'मिति कात्यायनीयम्। ननु सामगग्रन्थकर्तृकात्यायनवचनस्य सामगपरत्वं कथं नोच्यते तत्राह "शिष्टे"ति। "अत एव" तादृशवचनस्य शाखान्तरपरत्वादेव। "गुरुं" पतिं, यथा 'पतिरेको गुरुः स्त्रीणा'मिति। "एतेने"ति शिष्टव्यवहाराभावेन भट्टनारायणव्याख्यानेन चेत्यर्थः। सरला गोभिलीयटीकाविशेषः। "ब्रह्मचारिणौ" मैथुनत्यागिनौ, विवाहकर्मण ऊर्ध्वमिति व्याख्यानादेतत्-पूर्वं विवाहो वृत्त इति लभ्यते इति भावः। "अत एव" पत्यभिवादनान्तस्यैव विवाहत्वादेव। "तदनन्तरं" प्रेक्षकाभिमन्त्रणानडुच्चर्मोपवेशनानन्तरम्। वरशब्दवाच्येति तथा चोक्तं 'गौर्विशिष्टतमा लोके वेदेष्वपि निगद्यते। न ततोऽन्यद्वरं यस्मात् तस्माद् गौर्वरमुच्यते'॥ इति। "अत एव" पत्यभिवादनान्तस्यैव विवाहत्वेन तदनन्तरकर्तव्यसमशनीयचरुहोमादेर्विवाहभिन्नत्वादेव। तथा च समशनीयचरुहोमादेर्विवाहभिन्नत्वादिपदेन ग्रहणं कृतमिति भावः। "विवाहादौ" विवाहस्यादौ "ततश्च" समशनीयचरुहोमादेः साङ्गविवाहभिन्नत्वाच्च। पूर्वसम्भृतयोरारब्धयोः। "तत्र" दर्शश्राद्धे। "तस्य" साग्नेः। "तदुद्धरणस्य" अग्न्युद्धरणस्य। तथाहि नित्यहोमीयाग्निमुद्धृत्य तेनैव श्राद्धीयान्नपाकः

साग्निना क्रियते इति। "सर्वेषां" विवाहादिर्गर्भाधानान्तरपातिनां समशनीयचरुहोमादीनाम्। "उद्देश्यते"ति, तथा च यदुद्दिश्य वृद्धिश्राद्धादिकं क्रियते तस्यैवारम्भो जायते नान्यस्य इत्यर्थः। "अन्यथा" आरम्भस्य उद्देश्यत्वगर्भत्वाभावे। "तस्यापि" अक्षभङ्गसमाधानार्थहोमस्यापि। "प्रत्यवाय" इति। यथा—आरब्धस्यासमाप्तौ स्याच्चाण्डालत्वं श्वता ततः। "ततो" जन्मान्तरे। "श्वता" कुक्कुरता इत्यर्थः। "अक्षभङ्गाभावे" तदर्थहोमाकरणे च। 'निर्निमित्तकृता शान्तिः निमित्तमुपपादयेदि'ति दोषान्तरं स्यादिति। "अत एव" आरम्भस्य उद्देश्यतागर्भत्वादेव। "एवञ्चे"ति आरम्भस्य उद्देश्यगर्भत्वाद्विवाहोद्देश्यकश्राद्धकरणेन समशनीयहोमादेरारम्भाभावे च इत्यर्थः। "प्रायश्चित्तं" मुख्यकालाकरणप्रायश्चित्तम्। प्रायश्चित्तप्रकरणेति, "किन्त्वि"त्यादि। "निष्कृतिं" महाव्याहृतिहोमरूपं प्रायश्चित्तम् ॥३२

"यद्वे"ति मुनेः पक्षान्तरं, प्रथमपक्षश्च एवमागामियागीय इत्यादिना वक्ष्यमाणः। "अधस्तनः" प्राक्तनः। एतेन अन्तरालकालस्य च गौणकालत्वमायाति। "एवञ्च" वृद्धिश्राद्धस्य विवाहारम्भत्वे च। अस्य तदादौ वृद्धिश्राद्धमवश्यं कर्तव्यमित्यनेनान्वयः। "सर्वाणी"ति अन्वाहार्यवत्तया अनिषिद्धानि गृह्यकर्माणि इति शेषः। "द्वितीय"मिति साग्निकर्तव्यस्य पिण्डपितृयज्ञस्य अनन्तरं साग्निनिरग्निभ्यां कर्तव्यं पार्वणश्राद्धमित्यर्थः। "नियमाभिधाना"दित्यस्य गोभिलगृह्येनेत्यनेन पूर्वेणान्वयः। "ओद्वहनात्" आ उद्वहनात्। "तेषां" पितृणामित्यर्थः। चतुर्थ्यर्थे षष्ठीविधानात् पितृभ्य इत्यर्थः। "तदजनकत्वात्" संस्काराजनकत्वात्, सकृत्कृते कृतः शास्त्रार्थ इति न्यायात् इत्यन्तो हेतुः। वृहद्राजमार्तण्डे। या नार्यकृतसीमन्ता प्रसूते च कदाचन। अङ्के निधाय तं बालं पुनः संस्कारमर्हति॥ एवं 'सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता।' "सुतपदं" सुतसंस्कारकर्मस्वित्येतदीयसुतपदम्। "अन्यः" संस्कार्यपितुरन्यः स च संस्कार्यः सपिण्डादिर्वा॥३३॥

"तत्क्रमा"दिति। ननु तत्पदस्य प्रधानपरामर्शकत्वं व्युत्पत्तिसिद्धम्। अत्र च कस्य प्राधान्यं तत्राह 'चित्रं कर्मे'ति, प्रधानस्य संस्कार्यस्य क्रमात्—प्रक्रान्तसंस्कार्यकर्तृकश्राद्धक्रमात्। तेन संस्कार्यस्य पित्रादित्रयस्य मातामहादित्रयस्य च लाभः। ननु तत्पदस्य प्रक्रान्तपरामर्शकत्वमपि व्युत्पत्तिसिद्धं, तथा च तत्क्रमादित्यत्र तत्पदेन संस्कार्यपितुर्लाभः। एवं तेषामित्यनेन पूर्वोक्तानां संस्कार्यपितुः पित्रादीनां लाभ इति नारायणोपाध्यायमतं शङ्कते, "न चे"ति। "पितुः प्रवेशात्" तत्क्रमादित्यनेन पितुः प्रवेशात्। "तन्मातामहपक्षस्यैव" संस्कार्यमातामहपक्षस्यैव। "सपिण्डादिः" संस्कर्ता तत् पितृणामित्यर्थः। तत्शब्दात् तत्क्रमात् इति तच्छब्दादित्यादिपक्षस्य। "निर्विशेषे"ति, स्वपितृभ्य इत्येतदीयस्वपदार्थेन संस्कार्यपित्रादेरेव ग्राह्यत्वे चेत्वर्थः। "पर्युदस्तत्वा"दिति छन्दोगेतरो योषिद्भ्योऽपृथग्दद्यादित्येतादृशत्वादित्यर्थः॥३४॥

"परिप्राप्त" इति अवसानदिनादन्यत्र परिप्राप्तेत्यर्थः। "अनूद्य" अनुवादं कृत्वा, 'मात्रं कार्तस्नेऽवधारणे' इति। "तर्पणव"दिति, तर्पणे तु तत्पत्नीश्च तर्पयेदिति पृथग्विधानात् पत्नी निरपेक्षस्यैव दृष्टान्तितम्। ननु 'असावेतत्ते' इत्यादिश्रुतेः 'त्रयाणामुदक'मिति वचनाच्च पित्रादित्रयस्यैव ग्राह्यत्वे कथं मातामहादिलाभस्तत्राह, "मातामहादिलाभस्त्वि"ति, तथाच उपलक्षणतया न मातामहादिलाभः। किन्तु—

"पितरो यत्र पूज्यन्ते तत्र मातामहा ध्रुवम्।
अविशेषेण कर्तव्यं विशेषान्नरकं व्रजेत्॥ इत्यादि।
अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम।
भूमौ दत्तेन तृप्तन्तु तृप्ता यान्तु परां गतिम्" ॥

"दद्यादित्यत्रे"ति, 'येषां न माता न पिते'ति मन्त्रस्य सूचकम्। आदिशब्दबहुवचनयोस्तु गणसूचकं प्रचुररूपमेव। "श्राद्धे"ति, इतिकर्तव्यतापरिपाट्याम्। "अवसानदिनादृते" इति, "व्यर्थं स्या"दिति, योषिद्भ्योऽपृथक्त्वमपि मृताहनि दद्यादित्यस्यैव सम्यक्त्वादिति भावः। ननु तर्हि अवसानदिनेऽपि योषिद्भ्योऽपृथक् दद्यात् तत्राह "अवसानदिने त्वि"ति। ननु ध्रुवाणीत्यादिवचनस्य छन्दोगपरिशिष्टीयत्वेन छन्दोगमात्रपरत्वं व्यक्तमिति चेत्, तत्राह "सर्वशाखे"ति। अयञ्च पाठः क्वाचित्कः। "नृणां यद्व"दिति, पुरुषाणां यादृक्परिपाट्या स्त्रीणामपि तादृक्परिपाट्या अवसानदिने पुरुषाणां यथा पृथक् श्राद्धं योषितामपि तथा, न तु अपृथक्श्राद्धमिति भावः। 'पुरुषाः पूरुषा नर' इत्यमरः। "विशिष्टविधित्वे"ति अपृथक्त्वविशिष्टविधित्वेत्यर्थः। तथाहि योषिद्भ्योऽपृथक् दद्यादिति सामान्यविधिस्वीकारोऽपि प्रमीताहनि दद्यात् इत्यादिविधेर्विशेषत्वात्, परिहृत्यापवादविषयमुत्सर्गोऽभिविशते इत्यस्यात्र प्रसक्त्या अवसानदिनादृते इत्यभिधानं व्यर्थं स्यादिति भावः।

ननु छन्दोगोऽवसानदिनादृते योषिद्भ्यो न दद्यादित्याकारविधिस्वीकारेण न पृथक्पदं सार्थकमन्यथा पृथक्पदादाने तु छन्दोगोऽवसानदिनादृते योषिद्भ्यो न दद्यादित्याकारविधौ पर्यवसाने दानसामान्याभावोऽप्रसक्तो योषिच्छ्राद्धमात्रे स्यादतः पृथक्पददाने तु अवसानदिनादृते पृथक् दद्यादिति विधिस्वीकारे तु अवसानदिनादृते इत्यस्य सार्थकत्वेऽपि पृथक्पदमनुवादः स्यात्तथा च एकस्या वैयर्थ्यमात्रम् तत्राह—"तस्मादि"ति। विशिष्टादवसानदिनादृते इत्यस्य वैयर्थ्यपातादित्यर्थः। वैपरीत्यमिति पृथगित्यस्य सार्थकत्वाय अवसानदिनादृते इत्यस्य अनुवादकत्वमस्त्वित्यर्थः। "तथात्वे" वैपरीत्ये। ननु समर्थपदकदम्बत्वं वाक्यत्वं पदत्वञ्च अर्थवत्त्वमिति तल्लक्षणात् अर्थवत्त्वरूपतादृशपदत्वञ्च प्रकृतौ विभक्तौ व्यापि। तथा च विभक्तिमादाय पृथगित्यस्यापि वाक्यत्वं, तत्राह—"अव्ययपदोत्तरविभक्तिः पदसाधुत्वमात्रप्रयोजनिका, न तु सार्थकत्वाय" इति न तस्याः पदत्वमिति भावः ॥३५॥

"तस्मादि"ति अवसानदिनेतरश्राद्धे छन्दोगस्य पर्युदस्तत्वादित्यर्थः। "मात्रादि" मातृपुर्वकम्। "उत्तरार्ध्वे"ति, स्वभर्तृपिण्डमात्राभ्यस्तृप्तिरासां यतः स्मृतेत्युत्तरार्धम्। एतदर्थं वृद्धयादौ योषिद्भ्यः पृथक् श्राद्धं केषाञ्चिद्विद्यते केषाञ्चिन्न विद्यते इत्येतदर्थम्। पतिना सहेत्यत्र भोग्यमिति पूरयित्वा व्याचष्टे, "पतिना सह भोग्य"मिति। "अग्ना"विति ग्रहणं अन्वष्टकाग्रहणनियमार्थमिति। नियमश्च साग्नीनामेवाधिकारः इत्याकारकः। "विप्रपाणी"ति, 'अग्न्यभावे तु विप्रस्य पाणावेव जलेऽपि वा' इति। "प्रकृतीभूते"ति प्रकृतीभूतं श्राद्धमष्टकाश्राद्धं, तत्र विप्रपाण्यादिरूपस्य विकृतीभूतश्राद्धविशेषोऽन्वष्टकाश्राद्धं, तत्र विहिताधारेणाग्निना बाधादिति विकृतिविहितेन शरमयबर्हिषा प्रकृतीभूतदर्शपौर्णमासयागविहितस्य कुशमयबर्हिषो बाधस्तथा इत्यर्थः। "पैत्रयज्ञः" श्राद्धम्। "पर्युदासादि"ति न योषिद्भ्य इत्यत्र नञश्छन्दोगेन अन्वयात् छन्दोगेतरलाभात् पर्युदासः। कल्पतरुकारेणात्र योषिद्भ्योऽपृथक्दानमुक्तं 'षड्भ्यः पितृभ्य' इति वचनस्याऽसंगतिमाशङ्क्य विषयत्वेन साधनञ्च कृतं तद्दूषयति। "एतेने"ति वक्ष्यमाणदोषेण इत्यर्थः। "जीवन्त"मिति, "विशेषेणत्वेन" उद्देश्यीभूतपित्रादिविशेषणत्वेन विधेयविशेषणत्वाभावेनेति यावत् ॥३६॥

"अत एव" जीवन्तामित्यस्याविवक्षणादेव। "तस्मिन् सति" स्वभर्तरि जीवति। "तस्या"मिति, एतेन स्त्रीमपि जीवन्तीमतिक्रम्य दद्यादिति न्यायः। "काम"मिति चिन्तनक्रियाविशेषणम्। दीने वृद्धे। विट्पतिर्जामाता। "स्वयंप्रवृत्तस्यापी"ति तथा च पितुर्देशान्तरगमनेऽपि स्वयं प्रवृत्तेन पुत्रादिना वृद्धिश्राद्धादिकं कर्तव्यम्। एतच्च ग्रन्थकृता शुद्धितत्त्वे विवृतम्। नचानिश्चये कथं प्रतिनिधित्वमिति वाच्यम्,

'ऋत्विक् च त्रिविधो दृष्टः पूर्वैर्जुष्टः स्वयं कृतः।
यदृच्छयापि यः कुर्यादार्त्विज्यं प्रीतिपूर्वकम्॥'

इत्यनेन प्रतिनिधित्वाकरणेऽपि तृतीयर्त्विजः स्वेच्छया तद्दर्शनादिति। "पूर्वैः" पूर्वपुरुषैः। "मरणे"ति मरणप्रव्रज्यावानप्रस्थत्वानि ग्राह्यानि। अवश्यं श्राद्धं कर्तव्यमित्यत्राशुद्धत्वप्रतीतेरित्यन्तेनावश्यं वृद्धिश्राद्धं कार्यमित्यन्वयः। श्राद्धेन विवाहस्य शुद्धत्वाभिधानात् श्राद्धस्य जीवत्पितृकस्य द्वितीयादिविवाहादिवत् स्वपुत्रसंस्कारादावपि कर्तव्यत्वं बोध्यम्। अत्र जीवत्पितृकपितुः पितृपक्षमात्रपरं न तु पितुः मातामहपक्षपरम्। मातामहपक्षस्तु स्वकीयो ग्राह्यः। पितुरित्याद्यभिलापे स्वारसिकवाक्ये न तु मन्त्रे। अत्रेदं बोध्यम्। प्रतिनिधिभूतेन पुत्रादिना श्राद्धादौ देवदत्तपितुरित्यादिकमेव प्रयोज्यम्। स्वपितृभ्यः पिता दद्यादिति वचने देवदत्तादेर्निधनत्वादिना श्राद्धानधिकारे देवतात्वप्रतिपादनात् तत्र स्वपदस्य देवदत्तादिपरत्वं चैत्रः स्वपुत्रं पश्यतीत्यादौ स्वपदस्य चैत्रादिपरत्वान्न तु पितुरित्यादिकं प्रयोज्यं पितृत्वादिना देवदत्तत्वाभावात् न तथा न आयान्तु नो देवदत्तस्य पितर इत्यादिकम्। "तद्विकृतित्वात्" पार्वणविकृतित्वात्। जीवत्पितृकस्य पार्वणाधिकारश्च प्रायश्चित्तस्थले बोध्यः।

जीवे पितरि वै पुत्रः श्राद्धकालं विवर्जयेत्।
येषां वापि पिता दद्यात् तेषामेके प्रचक्षते॥

इति हारीतवचनोत्तरार्धेन प्रधानसाङ्गतार्थं श्राद्धविधानात्। प्रतिसंवत्सरमित्यनेन उत्तरक्रियालाभः। "प्रकरणात्" स्त्रीकर्तृकश्राद्धप्रकरणात्॥३७॥

ननु क्षारलवणाद्युपक्रम्य तद्धुतमहुतञ्चेत्यापस्तम्बवचनाद्धोमे स्त्रिया अधिकाराभावेन व्रतप्रतिष्ठादौ होमकरणस्यैव युक्तत्वात् इत्याह "नन्वेव"मिति। एवं यत्रानधिकारस्तदकरणस्यैव युक्तत्वे तत्र व्रतप्रतिष्ठादौ तद्विधानात् हावनाय स्त्रियामधिकारः कल्प्यते। एवं 'लाजैस्त्रिमधुरोपेतैर्होमैः कन्यां प्रयच्छति'। अत इत्यादौ स्त्रीणां होमाधिकारो ब्राह्मणद्वारा बोध्यः। त्रिमधुरञ्च घृतमधुशर्करात्मकम्।

"प्रणवोच्चारणात् होमात् शालग्रामशिलार्चनात्।
ब्राह्मणीगमनाच्चैव शूद्रश्चाण्डालतां व्रजेदित्यादिवचनात्।

"हावयेदि"ति गोभिलीयात् हावनायामधिकारो भवतु इत्यत्र इष्टापत्तिं करोति। एवं वैश्यस्यापि हावनायामधिकारित्वम्। "तेषां" क्षत्रियादीनाम्। तदुपादानमजातस्त्रीसम्पर्करूपब्रह्मचार्युपादानम्। तत्फलमाह वाचकादिफलमाह॥३८॥

स्वर्गप्राप्तिहेतुत्वादेव। "बहुद्वार"मिति कन्यादाने फलं ततो दौहित्रे जाते फलान्तरम्। यथा 'ततो दौहित्रजाल्लोकादवाह्योऽसौ पतिर्मम' इत्यादिफलान्तरमिति क्रमेण बहुद्वारत्वं बोध्यम्। भविष्ये—तिलराशिः क्षितौ यावत् दिवाकरसमुच्छ्रितः। तस्य वर्षप्रदाता च यो नरो धर्मतत्परः। कन्यादानप्रसक्तश्च समं यान्ति त्रयो यथा। कृत्वा कन्याप्रदानन्तु पितरः प्रपितामहाः। मुक्ता वै सर्वपापेभ्यः स्वर्गलोके महीयते। फलमुक्तमादिपुराणे—

"गान्धर्वेन विवाहेन यस्तु कन्यां प्रयच्छति।
गान्धर्वलोकं व्रजति गन्धर्वैः पूज्यते नरः।
शुल्केन दद्याद् यः कन्यां वराय सदृशाय च।
किन्नरैः सह गीयते गान्धर्वं लोकमेति च"॥

एतच्च वैश्यशूद्रविषयमेव, तेषां द्वितीयविवाहस्य विहितत्वादन्येषां निषिद्धत्वादिति प्राञ्चः। "अत एव" कन्याया दशपुत्रसमकथनादेव। "सामान्यतः" द्रव्यविशेषपुरस्कारबलेन। "प्रतिपूजितः" सात्विकादिपित्रनुसारेण विधात्रा अनुगृहीतः। "परमनुपहत्य" परस्य पीडामजनयित्वा। "सुखोदर्क"-मिति आदावन्ते च सुखदमित्यर्थः। उदर्कः फलमुत्तरमित्यर्थः। "प्रेत्य" परलोके प्रेत्यामूत्र भवान्तरे इत्यमरः। एतयोर्यमवचनयोः। "प्रागुक्तं" 'तां दद्याच्च पिता कन्या'मित्यादिना उक्तम्। "औत्सर्गिकं" प्रायिकम्। दातृ पित्रादिरित्यर्थः। तथा च दानादीनां कृतिसामानाधिकरण्येण फलजनकत्वञ्च, ततश्चोद्देश्यादिवचनबलसमानाधिकरण्येनापि फलजनकत्वञ्च स्वीक्रियते इति भावः॥३९॥

"अन्तेवासी" शिष्यः, उपलक्षणत्वात् पुत्रादिरपि बोध्यः। अदृष्टार्थमदृष्टद्वारा पित्रादेर्भोगं जनयति न तु यदन्नादिकं पुत्रादिना दीयते तदन्नादिकम्। "अत एव" पित्रादेरदृष्टद्वारा स्वर्गभोगादि-रूपफलजनकत्वादेव। "एकैव गतिः" एकमेव प्रधानं फलम्। विपत्तयः तदीयधर्मार्थं प्रयोजनस्य शास्त्रेन प्रतिपादने च। तद्धनस्वामिना पुत्रादिना। महारोगीतररोगिना, महारोगिणस्तु दाने अनधिकारः। 'एषां मध्ये तु यः कुष्ठी गर्हितः सर्वकर्मसु' इति भविष्यपुराणे। दत्तं दात्तमनुमतं श्रावितं, मया इदं धनं धर्मार्थं स्थापितमिति श्रावितमेतावता धनेन पुष्करिण्यादिकम्। दाप्यः अर्थाद्राज्ञा। "एवञ्च" आत्मकर्तृकदानस्य शास्त्रबोधित्वे च। तामसं यश्चापहृतं ददाति, एतेन दानोपसर्गा-योपसृष्टं दानमप्रसिद्धमप्येकफलं वा। "तद्धर्मे"ति स्नेहादियुक्तदानपरमित्यर्थः। एवञ्च पित्रा-द्युद्देश्यकदानस्य शास्त्रादिना कर्तरि, ऋत्विगादीनाञ्च न यजनादौ कर्तृत्वं किन्तु यजनादौ अनुष्ठातरि इति पाठेऽप्ययमेवार्थः। प्रभृतय इति पूर्वेणान्वितम्। "अतएव" शास्त्रदेशितफले ऋत्विगादेर्व्यावर्तनीय-त्वादेव। इतरेषामपि धनार्थित्वमात्रमिति मात्रपदेन शास्त्रदेशितफलभागित्वव्यवच्छेदः। "घ्नन्ति" नरकभागिणं कुर्वन्ति; अर्हणार्थं कन्यालङ्कारार्थं विवाहे यासां कन्यानां शुल्कं पणं नाददते किन्तु अर्हणमाददते, तादृशग्रहणं विक्रयो न इत्यर्थः। मूल्यग्रहणस्यैव विक्रयपदार्थत्वादिति किञ्चित् पूरयित्वा। प्राञ्चस्तु सर्वाशी सर्वविक्रयीति शूद्रप्रकरणीयवचनात् कन्याशुल्कग्रहणे दोषाभावं वदन्ति। 'शुल्केन ये प्रयच्छन्तीति' काश्यपवचनात सर्ववर्णसाधारण्यादेवेत्यर्थः। मनुरपि॥४०॥

"एवञ्चे"ति शूद्रस्य कन्यास्वत्वविनाशकीभुतविक्रयस्य निषिद्धत्वेन स्वत्वनाशकीभूतदानस्य स्वीकार्यत्वे चेत्यर्थः। "समगुण"मिति शास्त्रीयतद्द्रव्यस्य दानं तत्फलकमित्यर्थः। वैश्यसम्प्रदानक-दाने तत्फलवैगुण्यादिकं बोध्यम्। "अत एव" कन्यादानेन स्वत्वादेव। "साधारणं" सर्ववर्णसाधारणम्। "क्रमागतं" पैतृकम्। "प्रीतिदानं" प्रीत्या दानम्। एतस्य सर्वसाधारण्यं स्यादिति बोध्यम्। "आद्यान्" ब्राह्मदैवार्षप्राजापत्यविवाहान्। "कवयः" पण्डिताः मुनयः इति यावत्। राक्षसं प्रशस्तमासुरमपि प्रशस्तम्। "व्ययं" वरदत्तं यत् व्ययं कन्यासम्बन्धाद्यर्थं गमनागमनानीति वरस्य रोगपातित्यादिकं विना। "बलिकर्मणि" दैवकर्मणि। "अन्यत्र" आसनशयनाद्यनत्रत्र। क्षुतदुष्टत्वात् तत्र नामसंकीर्तनं कर्तव्यमिति शेषः। "वियोगं" नाशमाप्नोतीत्यर्थः। "अत एव" विष्णोरिति माहात्म्यादेव। "विवाहे" विवाहनिमित्तकम्। "दानान्तरं" कन्यातिरिक्तद्रव्यप्रदानम्॥४१॥

"दिवाभाग" इति। अत्र भाग इत्युक्तेः दिवामात्रे विवाहो न निषिद्धः किन्तु भागस्वरसात् गोधूलिकालस्य रात्रिदण्डे विवाहः। गोधूलिकालस्य दिवादण्डातिरिक्तदिवाकाले च विवाहं कुर्वन्ति। "उपांशु" परश्रवणायोग्यम्। "तिलक"मिति हस्तलेपोऽपि हयशीर्षे उक्तः।

'हस्तलेपमत्र वक्ष्ये कन्यायाश्चैव धारणे।
कृताञ्जलिशिखाकान्तं कर्पूरं कुङ्कुमन्तथा।
मधुकपुष्पं सर्जरसं गुञ्जां जातिफलं तथा।
एकैकं प्रतिगृह्य तत् समस्तं वा विचक्षणः।
यस्या विवाहसमये योजयेदगदानिमान्।
न दौर्भाग्यं न वैधव्यं सा कन्या प्राप्नुयात् क्वचित्'।

कृताञ्जलिः लाजानुया इति ख्यातो वृक्षः। शिखा लाङ्गलिका इति ख्यातो वृक्षः कान्तोऽपि। तथा च--

'शिखा चाग्रे शिखाचूड़ा ज्वाला लाङ्गलिकाद्रुमे।
कान्तो हेम्नि प्रिये रस्ये लौहेऽपि च निगद्यते'

इति। "अत्र" विवाहसमये। "देवर्षि" र्नारदः। "तामाह" जम्बूलमालिकामाह। केचित्तु अद्येति विवाहवाक्ये नोल्लेख इत्याहुस्तद्दूषयति "वाक्ये त्वि"त्यादिना। "अन्यत्र" सोमग्रहादाविति ॥४२॥

"विवाहादा"वित्यादिपदं यात्राग्रहचारपरं यत् कर्म सूर्यभोग्यराश्युल्लेखेन श्रुयते यच्च विशिष्य उदगयनादिना विहितं तत् परञ्चायनस्य सौरमासघटित्वात् तच्च चूड़ोपनयनादि। "यज्ञादा"विति, अत्रादिपदं भूतिवृद्धिपुंसवनसीमन्तोन्नयननामकरणान्नप्राशनचूड़ादिपरम्। चूडादौ सौरग्रहणं उल्लेखनार्थम्। सावनग्रहणं गणनार्थं, विष्णुधर्मोत्तरे—'अध्वायनञ्च ग्रहचारकर्म सौरेण मासेन सदाध्यवस्येत। सत्राण्युपास्यान्यथ सावनेन लौक्यञ्च यत् स्यात् व्यवहारकर्म' इत्यादि। अध्वायनं यात्रा। "तिथिकृत्ये" जन्मतिथिकृत्यादौ। "व्रते" चान्द्रायणादौ। 'कार्तिकस्य तु यत् स्नानं माघे मासि विशेषतः। कृच्छ्रादिनियमानाञ्च चान्द्रमानप्रमाणतः।' "परिकीर्त्तिता" उल्लेख्या। "मासोल्लेखः" चान्द्रमासोल्लेखः। "इतरस्मिन्" सौरमासविहितकृत्ये। "तथा" उल्लेख्यता। ननु वरणार्थकस्य वृधातोर्गोत्रप्रवराभिधानपूर्वकदाने लक्षणा कथं क्रियते मुख्यार्थकत्वस्यैवात्र सम्भवादित्याह प्रतिगृह्णन्तीति। प्राञ्चस्तु वरयन्तीत्यत्र वृधातोर्वरणार्थकत्वे दानार्थकलक्षणापत्तेः, वरणन्तु गन्धादिदानद्वारा प्रीतिमुत्पाद्य कर्मकरणाय प्रेरणं, तथा च वरणाय दत्तग्रहणात् प्रतिगृह्णन्तीत्यस्योपपत्तिः। एवञ्च सति वरण एव दातुः प्रत्यङमुखत्वं न कन्यादाने, विवाहे तु व्यतिक्रमः इति वचनात् दातुरुदङमुखत्वमेव, प्राङमुखायाभिरूपाय इत्यादिवक्ष्यमानवचनन्तु साग्निकपरं वदन्ति। अत एव गृह्यपरिशिष्टेन न विवाहदातुः प्रत्यङमुखत्वमायाति। "तथा चे"ति, भवदेवभट्टीयसम्बन्धविवेक इति। एतच्च एतावता अग्निसन्निधानवरणसमानकन्यादानमित्यपरसमानश्चेत्यपरः; अविशेषाणामङ्गानां प्रधानदेशकालान्वयित्वनियमादिकं बोध्यम्। "दृष्टार्थत्वात्" विवाहे प्रपितामहादिपूरुषत्रयाद्यभिलापरूपदृष्टकथनप्रयोजनकत्वात्। "पुंवचसां" वाक्यानां वेदानाञ्च। वेदे तु यादृशमेव पदमुक्तं तादृशपदमेव उच्चार्यं न तु तदर्थकपदान्तरं, तथा सत्येव अदृष्टोत्पत्तेः। संप्रदत्तेति क्तप्रत्ययार्थाविवक्षा भूतकालाविवक्षा ॥४३॥

उपपदं समीपवर्त्ति नाम्नः। "दास" इति, उपपदमिति शेषः। "समुच्चये"ति, एतेन देवपूर्वकं देवताया यन्नाम पूर्वमासीत् तदा एवं 'शर्मान्तं ब्राह्मणस्य स्या'दित्यनेन शर्मान्ततैव उक्ता न तु देवशर्मान्ततेति केषाञ्चिद्व्याख्यानं निरस्तम्। "शर्मा देवश्चे"ति चकारेण समुच्चयलाभेऽपि शर्मान्तता देवान्तता वा; तत्राह "शर्मान्त"मित्यादि। "एव"मिति तथा कुलधर्माचरणमित्यर्थः। "मङ्गले"ति विवाहादिमङ्गलविशेषाचरणमित्यर्थः। "देव्यन्तास्त्वि"ति, 'देव्यन्तता हि स्त्रियः स्मृता' इत्यत्र

सामान्यश्रवणात् शूद्रस्त्रीणामपि देव्यन्ततेति केषाञ्चिन्मतमिति। प्रकरणात् द्विजातिप्रयोग-बाधाच्चेति देवपदस्य इति शेषः। वस्तुतस्तु द्विजातिपुंयोगबाधाच्चेत्यत्र हेतुर्बोध्यः, पुंनाम्नः पुंयोग इत्यनेन ईप्रत्ययः, तत्परत्वेनैवोपपत्तौ स्त्रीपरत्वानौचित्यात् न शर्मणीत्यादिप्रयोग इति भावः। तथेति प्रयोगः 'द्विजस्त्रियो हि देव्यन्ता दासप्रन्ताः शूद्रजन्मन' इति तथा दर्शनात्; अहमिति पदस्य प्रयोगदर्शनात्। प्रयोगसारदर्शनेन इत्ययं हेतुः स्त्रीशब्दादित्वं नाम्नीत्यत्र बोध्यः इत्यपि बोध्यम्। "गोत्रादी"त्यादिना नामप रिग्रहः। "तदितरत्रापि" श्राद्धादितरत्रापि। तथोल्लेखाचारः फलभागिनां गोत्रस्य। एवमिति यथा फलभागिनां गोत्राद्युल्लेखस्तथा विशेषणत्वेन एतच्छब्दप्रयोग इत्यर्थः। श्राद्धे दर्शनादित्यन्वयः॥४४॥

"पाठक्रमात्"। आश्वलायनगृह्यपरिशिष्टीयशिवदत्त-प्रपौत्रीत्यादि पाठक्रमात्। "शाब्दक्रमस्य" समुच्चार्येति ऋष्यशृङ्गवचनीयानन्तर्यबोधकत्वरूपशब्दस्य प्रतिपादितक्रमस्य। यथाह भट्टः, 'श्रुत्यर्थः पठनवृत्तिकाः क्रमा' इति एषां समवाये पारदौर्बल्यम्। श्रौतक्रमः शाब्दक्रमः। "अन्यत्र" विवाहादन्यत्र पार्वणादौ। "एतदेव त्रिरुच्चार्य" इति। अत्र प्राञ्चः एतदेव त्रिरुच्चार्येति वचनं न लिखितवन्तः। त्रींस्त्रीन् वारान् ब्रूयादिति सुमन्तुवचनात् ये च सर्वमेव वाक्यं त्रिवारं वदन्ति तन्मतमपि कालिकापुराणादिदर्शनात् दूषितवन्तः। यथा कालिकापुराणे पार्वतीवाग्दानसमये देवेशमिदमाह पुनर्गिरिः। 'दत्ता दत्ता पुनर्दत्ता उपसत्त्वेन ते विभो।' श्रीरामायणे च धनुर्भङ्गानन्तरं वाक्यम्। 'इमे कन्ये प्रयच्छामि त्रिर्ददामि न संशयः'। तथाच काठकगृह्यम्। 'समागतेषु कृत्यादिषु अहं ददे सम्प्रदाता'। अस्यार्थः प्रत्याख्यानशङ्कया साक्षिरूपेण समागतेषु ज्ञातिब्राह्मणादिषु पुरतस्त्रिरावर्तनीयः, ततश्च एतेषां वचनानामेकवाक्यतया सुमन्तुवचनमपि वाग्दानविषयं मन्तव्यं, सम्प्रदानवाक्यस्य पुनः पुनरनुष्ठानेऽदृष्टार्थकत्वकल्पनागौरवात्, वाग्दाने तु प्रत्याख्यानं दृष्टार्थकत्वेन सङ्गच्छते इति। अत एव गोभिलटीकायां यशोधरेण त्रैपुरुषिकसम्बन्धमालिख्य अमुकीं देवीमेव त्रिरावर्त्य वाग्दानप्रयोगो लिखितः। यच्च 'मुमोच तोयं तव पादपद्मे दत्तेति दत्तेति पुनः प्रदत्ता'। तद्दानस्य वर्तमानत्वात् क्तप्रत्ययस्यातीतार्थत्वासङ्गतेः। 'नामगोत्रे समुच्चार्य प्रदद्यात् श्रद्धयान्वितः'। "परितुष्टेन भावेन दद्या'दिति व्यासवचनाच्च त्रैपुरुषिकसकल-सम्बन्धोच्चारणपूर्वकमिमां कन्यां तुभ्यमहं सम्प्रददे' इति लडन्तमेव सम्प्रदानवाक्यं समाप्य इयन्ते दत्ता, इयन्ते दत्ता, इयन्ते दत्तेति त्रिरुच्चारणं कर्तव्यमित्येतत्परम्। ततश्च सुमन्तुवचनमप्येतत्परं न काचित् क्षतिरिति। एवञ्च वाग्दाने अमुकी देवी मया ते दत्ता, मया ते दत्ता, मया ते दत्तेति त्रिरावर्तनीयं, सम्प्रदाने तु लडन्तमेव सम्प्रदानवाक्यमिति संक्षेपः। नान्दी इत्यादि ब्रह्मपुराणादित्यन्तो हेतुः नान्दीमुखे पुत्रादिसमृद्धीनामादिरुपे इत्यत्र बोधः; तथा च नान्दीपदस्य ब्रह्मपुराणीयं प्रमाणत्वेनोपन्यस्तमिति। "त्वर्थ"श्चकारार्थः; अन्यत्र प्राप्तस्य पित्रादिक्रमस्य विच्छेदात् प्रपितामहपूर्वकं व्याक्ये समुच्चारयेदिति। नान्दीमुखश्राद्धे तु प्रपितामहपूर्वकं वाक्ये न समुच्चारयेदिति विधित्रयकल्पनापत्तेरिति भावः॥४५॥

"उद्धृते"ति, उल्लिख्येतरेभ्य उत्थितमृत्तिकायाः कृतोद्धरणे इत्यर्थः। "अवोक्षिते" अभ्युक्षिते उल्लिख्योद्धृत्याभ्युक्ष्य इत्यादिश्रवणात्। "निरपेक्षे"ति, चित्रादिषु विवाहाभिधानात् कार्यान्तरेऽलब्धविषयकत्वेन। "एकादशी"ति, यथा योगियाज्ञवल्क्यः 'ध्यायेन्नारायणं नित्यं स्नानादिषु च कर्मसु। प्रायश्चित्तेष्वपि सर्वस्मात् दुस्कृतान्मुच्यते पुमान्॥ प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥ तद्विष्णोरिति मन्त्रेण मज्जेदप्सु पुनः पुनः। गायत्री वैष्णवी ह्येषा विष्णोः संस्मरणाय वै॥' मन्त्रश्च ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति

सूरयः दिवीव चक्षुराततम्। वामनपुराणं। 'सर्वमङ्गलमङ्गल्यं वरेण्यं वरदं शुभम्। नारायणं नमस्कृत्य सर्वकर्माणि कारयेत्॥' इति प्रमाणानि। ॐ तत् सत् इति निर्देश इत्यादि च गीतोक्तं प्रमाणं बोध्यम्। "अमुके"ति, अमुकवेदान्तर्गतामुकशाखैकदेशाध्यायिन इति प्राचां मतमपि नोक्तं, तत्र प्रमाणाभावादिति ध्येयम्। "आर्त्ती"ति आर्त्तिः मुमूर्षुः। "हुत्वाज्यञ्चैवे"ति कन्याया ऋतु-दोषशमनार्थं कर्तव्यम्। "तन्त्रं" प्रकृतं कर्म। "स्नूषा"मनिरुद्धस्त्रियम्; "अन्नपक्त्यां" अन्नपाके। "पान"मासवादेः। पत्येति पत्या सह विरह इत्यर्थः॥४६॥

"स्त्रीणामभिमत"मिति। अन्यथा बलवद्दोषप्रसक्तिः स्यादिति भावः। ऋतुकालाभिगामीत्यत्र आवश्यकेऽर्थे णिन्, अन्यत्र अनावश्यकः किन्तु काम्य इत्यर्थः। "मण्डनं" भूषणम्। तथा स्कन्दपुराणे अगस्त्यं प्रति तद्भार्यावाक्यम्—'न ते नाम च गृह्णीयात्तवायुष्यविवृद्धये। पुरुषान्तरनामानि न गृह्णाति कदाचन॥ आकुष्टापि न चाक्रोशेत् ताडितोऽपि प्रसीदति। देहं कुरु कृतं स्वामिन् मन्यतामिति वक्ति च॥ नाचिरं तिष्ठते द्वारि न द्वारमनुसेवते। अद्यापि तं तया किञ्चित् कस्मैचित् न कदा त्वपि॥ सेवते भर्तुरुच्छिष्टमिष्टमन्नं फलादिकम्। महाप्रसादमित्युक्त्वा पतिदत्तं प्रतीच्छति॥ स्त्रीधर्मिणि त्रिरात्रन्तु स्वमुखं नैव दर्शयेत्। स्ववाक्यं श्रावयेन्नापि यावत् स्नाता न शुद्ध्यति॥ सुस्नाता भर्तृवदनमीक्षतेऽन्यं न लोकयेत्। हरिद्रां कुङ्कुमञ्चैव सिन्दुरं कज्जलं तथा॥ कूर्पासकञ्च ताम्बुलं कवरीकर्णभूषणम्। भर्तुरायुष्यमिच्छन्ती दूरयेन्न पतिव्रता॥ विना व्यवायेन समं प्रागलभ्यं न च सर्वदा। सर्पिर्लवणतैलादिक्षये चापि पतिव्रता॥ पतिं नास्तीति न ब्रूयाद्यात्रार्थेषु न योजयेत्। तीर्थस्नानार्थिनी नारी पतिपादोदकं पिबेत्॥ शङ्करादपि विष्णोर्वा पतिरेकोऽधिकः स्त्रियाः। व्रतोपवासनियमं पतिमुल्लङ्घ्य नाचरेत्॥ आयुष्यं हरते नित्यमन्ते निरयमिच्छति। मितं ददाति हि पिता मितं भ्राता मितं सुतः॥ अमितस्य हि दातारं भर्तारं पुजयेत् सदा। भर्ता देवश्च धर्मश्च तीर्थञ्च न हि संशयः। तस्मात् सर्वं परित्यज्य पतिमेकं समर्चयेत्। जीवहीनो यथा देहः क्षणादनुचितां व्रजेत्। तथा योषिद् भर्तृहीना सुस्नाताप्य-शुचिः सदा। अमङ्गलेभ्यः सर्वेभ्यो विधवा त्यक्तमङ्गला। विधवादर्शनात् सिद्धि क्वापि जातु न जायते॥ विहाय मातरं चैकां सर्वा मङ्गलवर्जिताम्। तदाशिषमपि प्राज्ञस्त्यजेदाशीविषो-पमिति'॥ "अप्रजाया"मिति कन्यायाः यावत् प्रजा न जायते तावत्पर्यन्तं जामातृगृहे न भुञ्जीत 'नाश्नीयात् तस्य वै गृहे 'इत्येकवाक्यत्वात्। अत्र प्रजापदं पुत्रपरं उत्तरार्धे दौहित्रस्येत्युपादानात्। "महासत्वे"ति रुरुप्रभृतिमहासत्वेत्यर्थः। "अत एव" दौहित्रस्य महासत्वादेव। "कनीयसी" पुत्रशतस्य कनिष्ठा। "मन्युः" क्रोधः। "तस्य" जामातुः। "सदैव" पुत्रजननात् पुर्वं परञ्च। "भुक्त्वेति" नव-वध्वागमनस्थलीयञ्च बोध्यम्। "कुलनायिकाः" देवीविशेषाः। "प्रायश्चित्तीयते" प्रायश्चित्तं कर्म-विशेषः, "सन्दंशं" साँडाशीति ख्यातम्। "अत्र" अनाश्रमिणि। रण्डाश्रमं रण्डाख्यपञ्चमाश्रमम्। दोषदृष्ट्या रजोयोगादिसम्भावनया। एवञ्च आश्रमपर्युदस्तत्वादित्यन्वयः। "स्नातकव्रत"मिति 'अमावस्यामष्टमीञ्च पौर्णमासीं चतुर्दशीम्। अलाभे चैव कन्यायाः स्नातकव्रतमाचरेत्'। स्नातको गृहस्थ इति प्रायश्चित्तविवेकः। 'तदधिकारी' सन्न्यासाधिकारी। "न विन्दति" न प्राप्नोतीत्यर्थ;। "तथा" इति सुखदुःखे न विन्दतीत्यर्थः। "कैवल्याश्रमे" सन्न्यासाश्रमे॥४७॥

मुक्त्यधिकारिणोऽन्यत्र। वशिष्टोऽपीत्यादिना पूर्वोक्तपैठीनसिग्रहणम्। गृहस्थो गार्हस्थ्य-संकल्पवानधिकारी। "अवरवयस्कां" न्यूनवयस्काम्। "तद्धर्मे"ति, तथा च प्रयोजनवतीयं लक्षणेति भावः। "पर्युदासे"ति सगोत्रादिभिन्नां भार्यां विन्देत। "वैधे"ति, केवलरागप्राप्तविषयके 'अष्टम्यां मांसं नाश्नीयादि'त्यादौ न पर्युदासतेति बोध्यम्। "प्रसज्ये"ति, तथा च सगोत्रां न विन्देतेति क्रियया

सहान्वयाच्च। न्यायमते नञो बलवदनिष्टसाधनत्वरूपबलवदनिष्टानुबन्धित्वरूपस्य विधिप्रत्ययार्थस्य अभावोऽर्थः। "पर्वणी"ति यथा पर्वणि न ऋतौ अभिगच्छेदित्यत्र पर्वभिन्ने ऋत्वभिगमनमिष्ट-साधनमिति। ऋत्वभिगमनं बलवदनिष्टाननुबन्धित्वाभाववदित्याकारको यत्र भेदेन बोधः तथेहापीति भावः। बलवदनिष्टाननुबन्धित्वमिष्टसाधनत्वं प्रत्ययार्थः। अत एव न सगोत्रामित्यादौ नञः पर्युदासपरत्वात् सगोत्रादिभिन्नाया भार्यात्वादेव। यूपेति, यथा यूपपदेन असंस्कृतं लौकिकं नाभिधीयते किन्तु वैदिकसंस्कारयुक्तं काष्ठं, यथा वा आहवनीयपदेन असंस्कृतो लौकिकसंस्कारयुक्तो वा वह्निर्नाभिधीयते किन्त्वलौकिकसंस्कारयुक्तो विशेषवह्निस्तथा सगोत्रां भार्यां विन्देत इत्यत्रापि भार्याशब्देन विवाहाख्यवैदिकसंस्कारविशेषयुक्ता स्त्री अभिधीयते। तथा च सगोत्रादिभिन्नाया एव विधिस्पृष्टत्वात् तत्रैव न तु सगोत्रादेर्भार्यात्वम्। पर्युदासपरत्वाभावे तु सदृशानाहरेद्दारान् इत्यादिवचनैः सगोत्रादेरपि भार्यात्वप्राप्तिरिति भावः। ततः सगोत्रेत्यादौ नञः पर्युदासनिषेधः। अतस्तत्र भार्यात्वानुत्पत्तिः, निषेधाच्च परित्यागप्रायश्चित्ते भवत इति भावः। अदृष्टार्थनिषिद्धाचरणात् तत्र दुरदृष्टं जायते इति भावः। ननु तत्र दुरदृष्टमेव जायते किमर्थं भाविपरित्यागप्रायश्चित्ते, न स्यातामित्यर्थः। तथा च तत्र नञो दुरदृष्टरूपानिष्टसाधनत्वं सुख-रूपेष्टस्यासम्भवात् तदसाधनत्वस्य बाधितत्वादिति भावः। तेन सगोत्रादौ विवाहानुत्पत्तिराश्रमा-सम्भवादिति भावः। "दृष्टदोष एवे"ति। तथा च दृष्टार्थकत्वसम्भवे दृष्टार्थकवाक्यमेव। "वैदिक-शब्देति" अदृष्टार्थकशब्देत्यर्थः। तथा च दृष्टार्थकाभावेन वाक्यस्य अदृष्टार्थकत्वमिति भावः। विमुच्यते सत्त्वाभाववती ॥४८॥

ननु कस्य दासीत्वमाप्नुयादित्याकाङ्क्षायामाह "पदिन्याया"दिति। 'पदपांशुना यूपमनक्ति सप्तमं पदं गृह्णाती'ति सोमयागे श्रूयते। तत्र कस्य पदं ग्राह्यमित्यनध्यवसाये सूत्रम्. 'उपस्थितत्वयोगादिति'। अरुणया एकहायन्या पिङ्गलाक्षगवा सोमं क्रीणातीत्यनेनोपस्थितायाः सोमक्रयार्थं आनीताया गोरेव सप्तमं पदचिह्नं ग्राह्यम्। ऐशानीतः संपूज्य गामग्निं परिक्रामति प्रदक्षिणावर्तार्थं प्रथमपदचालनावधि सप्तमं पदचिह्नं बोध्यमिति। तद्वदत्रापि भर्ता यस्य दासस्तस्य दासीत्वमाप्नुयादिति। "अनुमत्या" दास्याः प्रभोरनुमत्या। "दासी" दासप्रभोर्दासी। "तत्पति"र्दास्याः पतिः, तयोरिति दास्या दासस्य, न च भक्तदास इव। ओघेति 'ओघो वृन्देऽम्भसां रये' इत्यमरः। "बीजी"ति बीजिनो दासस्य यो भर्ता तस्येर्थः। "गर्भिणी"मिति अधोवर्णगा सती या गर्भिणी तामित्यार्थः। "अप्रजाः" शुद्रादनुत्पन्नगर्भाः, इतरा न शुद्ध्यन्तीति।

यं प्रासूत समस्तशास्त्रनिपुणश्रीरामकृष्णतात्मजः,
श्रीराधोत्तरवल्लभाख्यसूकृती सङ्गीरचूडामणिः।
तेन श्रीयुतकाशिरामकृतिना यत्नेन निष्पादिता,
टीका नातिसूशृङ्खलापि कृतिभिः सानुग्रहैर्दृश्यताम् ॥

इति श्रीकाशीरामवाचस्पतिभट्टाचार्यविरचिता उद्वाहतत्त्वटीका समाप्ता ॥

# उद्वाहतत्त्वम्

Commentary by Kṛṣṇa Caraṇa

नत्वा वाग्देवतां विप्रः
श्रीकृष्णचरणाभिधः ।
व्याख्यामुद्वाहतत्त्वस्य
तनुते तत्त्वबोधिनीम् ॥

मातः सरस्वति कृताञ्जलिरेष याचे
भूयोऽभिवन्द्य भवतीं प्रणतोत्तमाङ्गः ।
येयं ममाल्पविषयापि दोषलेशै-
र्भूयात् सतामुपकृते विवृतिर्विमुक्ता ॥

प्रारिप्सितग्रन्थपरिसमाप्तिपरिपन्थिप्रत्यूहनिवहविघाताय अविगीतशिष्टाचारानुमितश्रुतिपरिप्राप्तं भगवत्प्रणतिरूपं मङ्गलं शिष्यान् शिक्षयितुमादौ निबध्नाति "प्रणम्ये"ति । जगतां प्रभुं भगवन्तं प्रणम्य उद्वाहकर्मणस्तत्त्वं श्रीरघुनन्दनो वक्तीत्यन्वयः । कीदृशं तत्राह "कमलाकान्तं वागीश"मिति । अत्र कमला लक्ष्मीस्तस्याः कान्तम् (पतिं) । विशेषणमिदं विवाहस्य दाम्पत्यसम्पादकत्वं सूचयति । "वागीशं" वाग्देवतायाः ईशं स्वामिनम् । कश्चिदेतद्विशेषणस्वरसमेवमाह । लक्ष्मीसरस्वत्योः सपत्नीतया तत्र लक्ष्मीपतित्वेन नमस्कारे वाणीप्रसादो न भवेदिति तत्पतित्वेनापि नमस्कारः । वस्तुतो ग्रन्थस्य वाङ्मयतया तत्समाप्त्यर्थं वाक्पतित्वेन नमस्कारो युक्त इति भावः ।

"प्रणम्ये"ति स्वापकर्षबोधप्रयोज्यव्यापारो नमधात्वर्थः । स्वपदं नमस्यपरम् । अपकर्षो-ऽपकृष्टत्वं न्यूनत्वमिति यावत् । तत्प्रकारको यो बोधः (अस्मादहमपकृष्ट इत्याकारकं यज्ज्ञानम्) तत्प्रयोज्यव्यापार इत्यर्थः । तादृशव्यापारः कदाचिन्नमस्कर्तुः करकपालसंयोगलक्षणः कदाचिच्च तदन्यविधो ज्ञेयः । तथाच नमस्यापेक्षया यस्तावदपकर्षबोधस्तत्प्रयोज्यव्यापारो नमनमिति स्थूलार्थः ।

धात्वर्थतावच्छेदकबोधस्य नमस्कर्तृवृत्तित्वं कुत्रचिन्मध्यस्थजनवृत्तित्वं तेन बालकनमस्कारे बालकस्य तादृशबोधानुदयेऽपि न क्षतिः । अथैवं भगवतः कथं कर्मत्वं धात्वर्थतावच्छेदकतादृश-बोधरूपफलशालित्वाभावात् । सत्यं, समवायसंसर्गेण तादृशबोधाभावेऽपि विषयतासम्बन्धेन उक्त-फलाश्रयतया कर्मत्वं सुघटमेवेति भावः ।

"उद्वाहकर्मण" इति उद्वाहश्चासौ कर्म चेति उद्वाहकर्म तस्येत्यर्थः । ननूद्वाहस्य ज्ञानरूपतया कर्मणा सहाभेदः कथमिति चेत्, धात्वर्थमात्रस्य क्रियात्वात् जानातीत्यादाविव क्रियात्वेन व्यवहारो-नानुपपन्न इति । कश्चित्तु कर्मपदं संस्कारजनकपरमित्याह । वस्तुतो गृह्योक्तसेतिकर्तव्यताक-कर्मविशेषलाभाय कर्मपदं वेदितव्यम् । कर्मपदोत्तरषष्ठ्या वृत्तित्वमर्थः । तच्च तादात्म्यज्ञाप्य-त्वान्यतरसंसर्गेण ज्ञेयम् । तत्त्वमसाधारणो धर्मः 'तत्त्वं ब्रह्मणि याथार्थ्ये धर्मेऽसाधारणेऽपि चे'ति कोषोक्तेः । अत्र च तादात्म्यसम्बन्धेनोद्वाहवृत्तिधर्म उद्वाह एव, ज्ञाप्यत्वसम्बन्धेन उद्वाहधर्मः

उद्वाहज्ञापकं शास्त्रं, तथा चोद्वाहं तज्ज्ञापकशास्त्रञ्च शिष्यं वक्ति उपदेक्ष्यति। भविष्यत्सामीप्ये वर्तमानेयम्। वच्धातोर्द्विकर्मकत्वात् कर्मद्वयमुपपन्नमिति भावः। अथ मङ्गलाचरणस्य स्वकर्तृकतया वच्मि इत्येव युज्यते इति, मैवम्, 'आचार्याणामियं शैली यत् स्वाभिधेयमपि पराभिधेयमिव वर्णयन्ति' इति नियमात् नामार्थविशेष्यत्वेन शाब्दबोधोऽपि नानुपपन्न इति ध्येयम्॥१॥

"अथे"ति उद्देशानन्तरमित्यर्थः। उद्देशश्च नाम्ना वस्तुसंकीर्तनमिति निबन्धारः। उद्वाहकर्मणस्तत्त्वमित्यनेन विलक्षणसंस्कारजनककर्मण उद्वाहेति नाम प्रतीयते। तेनैव नाम्ना न तु स्वरूपादिना वस्तुनः (प्रतिपाद्यविषयस्य) ज्ञापनमिति भावः। "उद्वाहनिर्णयः" क्रियते इति शेषः। अनेन प्रतिज्ञा दर्शिता सा च भविष्यत्कर्मणः प्राक्कालकर्तव्यत्वेनावधारणरूपा। नचोद्देशान्तरं प्रतिज्ञाभिधाने उद्देशो लक्षणं परीक्षा चेति शास्त्रीयक्रमबाध इति वाच्यम्। उक्तशास्त्रीयक्रमस्य तु उद्देशानन्तर्यलक्षणस्य न तूद्देशात् प्रागिति तात्पर्यम्। अत उद्देशानन्तरकाले सत्यामपि प्रतिज्ञायां नास्त्यानन्तर्यबाध इति स्वध्वंसाधिकरणकालवृत्तित्वरूपत्वादानन्तर्यस्येति भाव्यम्। "तत्रे"ति उद्वाहनिर्णये, जनकत्वं सप्तम्यर्थः। "मनुशातातपावि"त्यस्य द्विवचनान्ततया आहतुरिति क्रियापदोध्याहारः। तदुपस्थाप्यायां कथनक्रियायां प्रोक्तसप्तम्यर्थजनकत्वस्यान्वयः। तथाचोद्वाहनिर्णायकं मनुशातातपवचनमिति सरलार्थः। असपिण्डेति वचनोपष्टम्भप्रदर्शनाय वचनमिदमवतार्यते।

गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि।<br>
उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम्॥

मनुनाभिहितस्यायमर्थः, गुरुणा दत्तानुज्ञः स्वगृह्योक्तविधिना कृतस्नानसमावर्तनः समानवर्णां शुभलक्षणां कन्यामुद्वहेत। यादृशी कन्या वोढव्या तामिदानीमा"हासपिण्डेति"। मातृपदं मातामहपरम्, लक्षणाबीजं स्फुटीभविष्यति। चकाराभ्यामुभयस्योभयत्रान्वयः। तत्प्रमाणं व्यक्तो भविष्यति। तथा च या किल मातामहसपिण्डा मातामहसगोत्रा च न भवति पितुरप्यसपिण्डा सा सर्वेषां वर्णानां दारकर्मणि प्रशस्ता, वाक्यमेतदेकम्। पितुर्या असगोत्रा सा केवलं द्विजातीनां ब्राह्मणादित्रयाणां विवाहे प्रशस्ता इत्यपरम्। वाक्यभेदकारणमवसरे वाच्यम्।

दारकर्मणीत्यस्य विवरणमाह "भार्यात्वसम्पादके कर्मणी"ति। अत्रायमाशयः। दारकर्मेत्यत्र दारपदं दारत्वपरं लुप्तविभक्त्यर्थानुसन्धाननये च सम्पादकत्वं षष्ठ्यर्थः। अथवा तत्पुरुषे राजपुरुष इत्यादिवत् पूर्वपदस्य लक्षणाया आवश्यकत्वात् दारपदस्य स्वगतसंस्कारविशेषसम्पादकत्वेन लक्षणया प्रोक्तार्थलाभः। भार्यात्वसम्पादकेति तात्पर्यमादायाभिहितम्। यच्चात्र पारिजातकृता गोबलीवर्दन्यायेन दारकर्मशब्दो मैथुनव्यतिरिक्ते यज्ञादौ वर्तते इत्युक्तं तन्न साधु, मनोरुपक्रमभङ्गापत्तेः। मैथुने इत्यनेनैव स्त्रीपुरुषसाध्ययागादिकर्मप्राप्त्या दारकर्मपदवैयर्थ्याच्च। अपि च दारकर्मणीत्युक्तौ दारसाध्यासाधारणकर्मण एवोपस्थितिर्भवेत्, असाधारण्येन हि व्यपदेशो भवतीत्युक्तेः। तच्च पाकादिकं न तु यागादिकं, यागादेः स्त्रीपुरुषोभयसाध्यत्वेन स्त्रीसाध्यत्वानपायेऽपि स्त्रीणामसाधारण्याभावात्। दारकर्मपदस्य विवाहपर्यायेषु शब्दरत्नावल्यादौ दृष्टत्वात्। अत एव दारकर्मपदयागार्थकमखपदयोरेकस्मिन् वचने पृथगुपादानं सङ्गच्छते। यथा—

आज्ञया नरपतेर्द्विजन्मनां दारकर्म मृतसुतकेषु च।<br>
बन्धमोक्षमखदीक्षणेष्वपि क्षौरमिष्टमखिलेषु चोड़ुषु॥

भार्यात्वसम्पादके कर्मणीत्युक्तं तत् कर्म कीदृशमिति विशेषतो न ज्ञायते तत्राह "तच्चेति"। अत्रोपन्यस्तानां सर्वेषामेव वचनानां विवाहतात्पर्यकत्वात् एकतात्पर्यकतारूपैकवाक्यतया कर्मणः

ग्रहणरूपत्वं वेदितव्यम्। तथाहि ईदृशी कन्या विवाहे प्रशस्ता मनुनैवं वक्तव्ये इत्यनुक्त्वा दारकर्मनीत्युक्तं यमादिभिश्च विवाहं कुर्यादिति वक्तव्ये दारान् आहरेदित्यादिकम्। अतो दारकर्म-दाराहरण-दारपरिग्रह-भार्यविदनार्थकपदानां विवाहतात्पर्यकत्वात् मनूक्तकर्मपदस्य ग्रहणरूपत्वं स्पष्टमेव प्रतीयते। "तेन" पूर्वोक्तमन्वादिवचनतात्पर्यालोचनेनेत्यर्थः।

ननु "भार्यात्वसम्पादकग्रहणं विवाह" इत्युक्तम्। अत्र ग्रहणं कीदृशम्, अपि च धातोर्ग्रहणार्थकतया फलावच्छिन्नव्यापारवाचित्वाभावात् कन्यां समुद्वहेदित्यादौ कन्यायाः कथं कर्मत्वमित्यादिकं पर्यालोच्य क्रमशः समाधत्ते "तस्येति"। भार्यात्वसम्पादकग्रहणस्येत्यर्थः। स्वीकाररूपस्येति विवरणं विवाहदानसम्पाद्यत्वमावेदयति। तथाहि दानानन्तरं दत्तवस्तुनि सम्प्रदानस्वत्वोत्पत्तौ सम्प्रदानस्य पुनस्तत्र स्वकीयतया यथेष्टविनियोगार्थं यत् ग्रहणं तत् स्वीकरणमिति, अस्वं स्वं कुर्वन् व्यापारः स्वीकार इति स्वीकारपदव्युत्पत्तेः। स्वपदस्यात्र यथेष्टविनियोज्यत्वेन लक्षणेति दायटीकायाम्। ज्ञानविशेषेति विवरणेन ममेयं भार्या इत्याकारकं वेदितव्यम्। "तस्ये"ति षष्ठ्यर्थः प्रतियोगित्वं निरूपकत्वसम्बन्धेन समवायविषयतयोरन्वयः। वरकन्ययोः कर्तृत्वकर्मत्वयोश्च यथासंख्येनान्वयः। तथा च वरे कर्तृत्वं कन्यायाञ्च कर्मत्वम्। अथ वरकन्ययोरन्यतरपक्षत्वे कर्तृत्वकर्मत्वान्यतरस्यैव साध्यत्वे उक्तभेदादिति हेतुर्व्यभिचारी स्यादिति सत्यं, भेदादित्यस्य वैलक्षण्यादित्यर्थः। अथ सम्बन्धगतवैलक्षण्यं सम्बन्धे एव न वरकन्ययोरिति पक्षे हेतोरसत्त्वात् स्वरूपासिद्धिरिति चेत् ल्यब्लोपे पञ्चमीत्यनुशासनतोऽत्र पञ्चमीति न दोषः। तथाच तादृशसंसर्गगतवैलक्षण्यमुपादाय कर्तृत्वकर्मत्वे उपपादयति ग्रन्थकार इति शेषः। कश्चितु भिद्यते पृथक् क्रियते व्यवच्छिद्यतेऽनेनेति व्युत्पत्या भेदः संसर्गः, समवायविषयतयोरित्यभेदे षष्ठी राहोः शिर इतिवत्; तथाच तादृशज्ञानप्रतियोगिकसमवायविषयतारूपसंसर्गादित्यर्थमाह।

तथाचात्र समवायसम्बन्धेन वरस्य तादृशज्ञानाश्रयतया कर्तृत्वं धातोर्ज्ञानार्थकतया विषयतारूपमेव कर्मत्वं तदादायैव कन्यामुद्वहेदित्यादिप्रयोगोपपत्तिरिति भाव्यम्। अत्रेदं विचार्यते, तादृशज्ञानीयविषयतारूपकर्मत्वे ममेयं भार्या घटश्चेत्याकारसमूहालम्बनज्ञानीयविषयतामादाय कन्यामुद्वहेदितिवत् घटमुद्वहेदित्यादिप्रयोगोपपत्तिः। सत्यं, संस्कारसामानाधिकरण्यमुक्तविषयतायां निवेश्यमिति न दोषः। न च तथापि ममेयं भार्या दासी चेत्याकारकसमूहालम्बनीयविषयतामादाय दासीमुद्वहेदित्यापत्तिः, मैवं। भार्यात्वनिष्ठप्रकारकत्वान्यप्रकारत्वानिरूपितत्वं निरुक्त-विषयतायां निवेश्यम्। अथवा भार्यात्वनिष्ठप्रकारतानिरूपकतावच्छेद्या या विशेष्यता तन्निरूपितत्वस्योक्तविषयतायां निवेशे नास्त्यनुपपत्तिलेशोऽपीति भाव्यम्। न च ममेयं भार्येत्याकारकं ज्ञानं यदोदेति परभार्यायां तदा तामुद्वहेदित्यादिप्रयोगापत्तिश्चेत् स्वीकाररुपत्वेन दानसम्पाद्यत्वाद्विवाहस्य परभार्यायां तादृशज्ञानं न स्वीकरणरूपं दानसम्पाद्यत्वविरहात्। न च पर्युदस्तपिण्डादिकन्याविषयके तथाविधग्रहणेऽतिव्याप्तिरिति वाच्यम्, विवाहस्य वैधत्वेन तत्र विध्यधीना प्रवृत्तिर्वाच्या नान्यथेति स्थिते सपिण्डेतरामुद्वहेदित्यादिविधीनां सपिण्डादिकन्याग्रहणाप्रवर्तकतया पुंसांस्तत्र प्रवृत्तिविरहेण ग्रहणानुपपत्तेः। "अत एव" उक्तान्यतरसंसर्गेण वरकन्ययोर्विवाहकर्तृत्वकर्मत्वादेव। "कन्यापुत्रविवाहेष्वि"ति, अत्र लुप्तषष्ठ्याः कर्तृत्वं कर्मत्वञ्च नार्थः सम्भवति। एकस्मिन् पदेऽनुशासनद्वयेन षष्ठ्या विधातुमशक्यत्वात्। अत्र कश्चित्—एकस्याः षष्ठ्या अपि प्रोक्तद्विविधार्थोऽगत्याङ्गीकार्यः श्राद्धविवेकटीकायां तर्कालङ्कारेण एकोद्दिष्टं स्त्रिया अपीत्यत्र तथा दर्शितत्वात्, यथा स्त्रिया अपीति

कृद्योगे षष्ठी, तस्याश्च कर्तृताख्योद्देशताख्यद्विविध एव सम्बन्धो विवक्षित इति। वस्तुतः समासलुप्तविभक्तेरर्थानुसन्धानाभावे कन्यापदस्य कन्याविषयकत्वेन पुत्रपदस्य पुत्रसमवेतत्वेन लक्षणा, तथा च कन्याविषयकपुत्रसमवेतो विवाह इति प्रतीतेर्न काचिदनुपपत्तिरिति।

अथ भार्यात्वं स्त्रीत्वे सति विवाहजन्यसंस्कारविशेषवत्त्वम्। विवाहत्वञ्च भार्यात्वसम्पादकग्रहणत्वम्। तथा च विवाहज्ञानमन्तरेण भार्यात्वज्ञानासम्भवात्, तज्ज्ञानमन्तरेण च विवाहज्ञानासम्भव इति इतरेतराश्रयदोष इत्याह "भार्यात्वस्ये"ति। तल्लक्षणञ्च स्वज्ञानापेक्षज्ञानापेक्षज्ञानविषयत्वम्। तथाहि भार्यात्वज्ञानसापेक्षं विवाहज्ञानं तज्ज्ञानापेक्षञ्च भार्यात्वज्ञानं तद्विषयत्वमास्ते भार्यात्वे। एवं विवाहज्ञानापेक्षं भार्यात्वज्ञानं भार्यात्वज्ञानसापेक्षञ्च विवाहज्ञानं तद्विषयता विवाहे विद्यते। एवं सति भार्यात्वविवाहत्वयोर्न कस्यापि ज्ञानं सम्भवति भार्यात्वज्ञानात् पूर्वं विवाहज्ञानासम्भवात्, विवाहज्ञानाच्च प्राक् भार्यात्वज्ञानविरहादिति। अत एव विवेकटीकायां तर्कालंकारेण एतस्य दुषकतावीजं ज्ञानासम्भवरूपमिति प्रतिपादितम्। उक्तदोषमुद्धरति "स्वरूपसद्विशेषणत्वेने"ति। स्वरूपसद्विशेषणत्वञ्च लक्षणाघटकत्वेनातितत्परिचायकत्वमिति पारिभाषिकमिदम्। तथा चात्र भार्यात्वेति लक्षणे न निविष्टम्। सम्पादकज्ञानविशष एव विवाह इति, कस्य सम्पादको ज्ञानविशेष इति जिज्ञासानिवर्तकरूपपरिचायकं भार्यात्वमिति भावः।

कश्चित्तु विवाहजन्यसंस्कारवन्नारीत्वमेव भार्यात्वम्। विवाहलक्षणे तु भार्यात्वेन न निवेशः, किन्तु नारीत्वसमानाधिकरणसंस्कारवत्त्वं निवेश्यम्। एवञ्च नारीत्वसम्पादकग्रहणं विवाह इत्याह। तन्न, भार्यात्वस्यैव ग्रन्थकृतः स्वरूपसद्विशेषणत्वस्योक्तेः ॥२॥

अथ ब्राह्माद्यष्टविधेषु स्वीकारत्वस्य सत्वात् कथं ब्राह्मादिभेद इत्याह अथ "विवाहसम्पादके"ति। दानादीत्यादिशब्दः प्रकारवाची। तथाच विवाहसम्पादकदानप्रकारभेदात् ब्राह्मादिविवाहभेदः।

अथ गान्धर्वराक्षसपैशाचेषु यथाक्रमं परस्पराभिलाषपूर्वकालिङ्गनकन्याहरणकन्यामैथुनं वाचनिकम्। न तु तदनन्तरकालीनदानबोधकं किमपि वचनमुपलभ्यते। ततश्च दानाभावे स्वीकारासम्भवः अदृष्टार्थत्यक्तद्रव्यग्रहणस्यैव स्वीकारपदार्थत्वात्। एवञ्च ब्राह्मादिसाधारणमेकं विवाहलक्षणमसम्भवीति। मैवम्,

ब्राह्मादिषु विवाहेषु पञ्चस्वेष विधिः स्मृतः।
गुणापेक्षं भवेद्दानमासुरादिषु च त्रिषु ॥

इत्यनेन सर्वेषामेव दानसम्पाद्यत्वस्य ज्ञाप्यत्वात्। तथा च तेषां स्वीकाररूपत्वाविशेषेऽपि विवाहविभाजकोपाधीनां दानप्रकाराणां भेदात् उपाध्यवच्छिन्नस्य भेद इति।

उपाधिभेदं दर्शयति "अत एवे"ति। उपाधिभेदेनैतेषां भिन्नत्वादेव। षष्ठीसप्तम्योरर्थस्याभेदात् याज्ञवल्क्यवचनस्येत्यर्थः। स ब्राह्माभिधान इत्यादि कन्या दीयते इत्यन्तः मिताक्षराग्रन्थः। "अध्याहृतः" यस्मिन्नित्यस्य ग्रहणे इत्यर्थः। सप्तम्यर्थो निमित्तत्वं तस्य दीयते इत्यनेनान्वय। "एवेञ्चे"ति ग्रहणस्य विवाहत्वे सतीत्यर्थः। आच्छादनमात्रस्यौचित्यप्राप्तत्वात् सविशेषवाससा कन्यावरौ आच्छाद्येत्यर्थः। "अर्चयित्वे"ति अत्रापि कन्यावरौ कर्मत्वेनान्वितौ, अर्चितं अर्चिताय दद्यादित्युक्तेः। श्रुतशीलवते इति श्रुतं अर्थाववोधकव्याकरणाद्यष्टादशशास्त्राणि, शीलं सदाचारः सत्स्वभावो वा, ताभ्यामुपेतायेत्यर्थः। "आहूये"ति सत्मारार्थ, ब्राह्मो धर्मः ब्राह्मनामकः विवाहः धर्मो धर्मजनकः

प्रकीर्तितो मन्वादिभिः परिभाषित इत्यर्थः। कृत्यलुटौ बहुलमिति कृत्यप्रत्ययः ल्युट्प्रत्ययश्चोभावेतौ वहुलमर्थं बोधयत इति शेषः। अत एव संक्षिप्तसारेऽपि—

प्रवृत्तिश्च निवृत्तिश्च विभाषोक्तविधेः क्वचित्।
अपूर्वस्य विधानञ्च बहुलं स्याच्चतुर्विधम्॥ इति।

तथाच तादृशदानप्रयोज्यं यत्ग्रहणं इति पूर्वोक्तयाज्ञवल्क्यादिसमानार्थकतेति। 'दातुरेव विवाहकर्तृतापत्ते'रिति। अत्रायमाशयः। धात्वर्थानुकूलकृतिमत्येव तृजन्ततद्धातुव्यपदेश्यत्वं नियमः, यथा भोक्ता गन्तेत्यादौ। तथाचात्र दानस्य विवाहत्वे दातरि वोढृपदव्यपदेश्यतापत्तिरिति॥३॥

न चात्र दानपदस्य भावसाधनत्वमेवास्तु भाववाच्ये एव तस्य स्वारसिकत्वादिति। तथा च तावन्मनुवचनेन ब्राह्मविवाहधर्मनिर्देश आस्तां न तु विवाहस्येति। ब्राह्मधर्मं इति पाठस्यापि बहुषु दृष्टत्वात्। ब्राह्मो धर्म इति पाठोऽपि ब्राह्मस्यायं ब्राह्म इत्यन्प्रत्ययेन तथैवावगतेश्चेति वाच्यम्। तथात्वेऽष्टाविमान् समासेन स्त्रीविवाहान् निबोधत इत्यादिना विवाहविभाजकधर्मनिर्देशवान् मनुः विवाहाङ्गकथनेऽप्रस्तुताभिधायी भवेदिति वेदितव्यम्। "श्रुतशीलवते" इति। अथात्र कथं चतुर्थी, आह्वानक्रियाकर्मत्वेन तेषां परमुभयोः प्राप्तावित्यनेन परत्वात् कर्मकारकप्राप्तेस्तन्निबन्धना द्वितीयैव युक्तेति सत्यमत्र केचित् नाव्ययकृद्विधिः क्रियान्तरकारके इत्यनेन द्वितीयानिषेधात् चतुर्थीत्याहुः। तन्न, तदनुशासनस्य क्रियाद्वयनिरूपितैककारकसम्भवे अव्ययकृन्निबन्धनं कारकं न भवतीत्यर्थकत्वात्। यथोदाहृतं भोक्तुमोदनस्य पाचकश्छात्रः, अत्र तुमुन्निबन्धनः द्वितीयानिषधेन वुन्निबन्धना षष्ठीति। अन्ये तु प्रधानशक्त्यभिधाने गुणशक्तिरभिहितवत् प्रकाशते इति न्यायात् दानयोगे चतुर्थीति प्राहुः। तन्मन्दं, उक्तस्थले तस्याविषयत्वादिति। तथाहि तन्न्यायस्यायमेवार्थः प्रत्येतव्यः शक्तिः कारकमिति। प्रधानक्रियाकारकस्याभिधाने उक्तत्वे इति यावत्, गुणशक्तिर्गुणक्रियानिबन्धनं कारकम्, अभिहितवत् उक्तवत् प्रकाशते यथा हस्तेन पचता भुज्यते शाक इत्युदाहृतं शब्दशक्तिप्रकाशिकायाम्।

वस्तुतः गुणप्रधानक्रियाद्वयकारकविभक्त्याः प्राप्तौ प्रधानक्रियाकारकनिबन्धनाया विभक्तेरेव युक्तत्वात् अत्र चाह्वानक्रियापेक्षया दानक्रियाया विशेष्यत्वेन प्राधान्यात् प्रधानीभूतदानक्रियाकारकनिबन्धना चतुर्थी गरीयसीति। अत एव प्रकाशिकायां जगदीशेन—

गौणप्रधानक्रिययोः प्रकारीभूतकारके।
एकस्मिन् वा विभिन्ने वा प्रधानापेक्षया स्थितिः॥

प्रधानक्रियामपेक्ष्यैव कारकविभक्तेर्व्यवस्थितिरिति व्याख्याय ब्राह्मणायाहूय ददातीत्युदाहृतम्। न च तेषां परमित्याद्यनुशासनविरोध इति वाच्यं प्राप्तिग्रहणात्तुल्यतया उभयप्राप्तिस्थल एव तद्विषयत्वात् न गौणप्रधानभावस्थले। अत एव ग्रामाय दत्त्वा तीर्थं गत इत्यादौ तिष्ठतीति क्रियापदमध्याहृतम्। स्थितिक्रियापेक्षया तयोर्गौणत्वादिति ध्येयम्।

दानपदस्य दानप्रयोज्यग्रहणपरत्वे आहुयेत्यनेनैककर्तृकतानुपपत्तिमाशङ्क्य समाधत्ते अत्रेति। नन्वेवं पदार्थः पदार्थेनान्वीयते न तु पदार्थैकदेशेनेति व्युत्पत्तिभङ्गः, दानपदोपस्थापितार्थैकदेशेनैककर्तृकत्वात्। अत आह 'स्थितादि' कश्चित्, तन्न चारु। नात्रैकदेशान्वयः। तथाहि पदार्थत्वं पदशक्यत्वं पदार्थैकदेशत्वं पदशक्यतावच्छेदकम्। अत्र च दाधातोः शक्तिप्रतिपाद्ये अर्थे एव आह्वानानन्तर्यान्वियात् एकदेशान्वयाभावात्। वस्तुतो यद्धातूत्तरकालबोधकः प्रत्ययः तद्धात्वर्थेन सहैककर्तृकत्वे एव क्त्वाप्रत्ययनियमः। एष चैककर्तृकयोः पूर्वकाले क्त्वा इत्यनुशासनपर्यालोचनयावगम्यते। तथाहि पूर्वकालस्योत्तरकालसापेक्षत्वात् उत्तरकालबोधकप्रत्ययाभावे पूर्वकालबोधाभावात्

क्त्वाप्रत्ययो दुर्घट एव स्यादिति। अत एव भुक्त्वा गच्छतीत्यादिकमुदाहृतम्। अत एव दायभाग असम्भूय सुतान् सर्वान् न दानं न च विक्रय इति वचनमुपन्यस्य कर्तव्यपदमवश्यमध्याहार्यमित्युक्तम्। तेन दानविक्रयकर्तव्यतानिषेधात् तत्करणाद्विध्यतिक्रमो भवतीति। अत्र तर्कालंकारेण न च सिध्यति सम्भवतीत्येव कुतो नाध्याह्रियते तथात्वे क्त्वान्तेन सहैककर्तृकतानुपपत्तेरित्यभिहितम्॥४॥

स्वीकाररूपज्ञानविशेषस्यैव भार्यात्वसम्पादकत्वे मन्त्रविशेषाणां भार्यात्वसम्पादकताविरोध इत्याह "यत्त्वि"ति। पाणिग्रहनिका मन्त्रा इत्यस्यायमर्थः। वहुवचनात् पाणिग्रहणसप्तपदीगमनान्तमन्त्राः, नियतं निश्चितं भार्यात्वे निमित्तमिति कुल्लूकभट्टः। दारा भार्या तस्या निमित्तमिति मेधातिथिः, तन्न साधु भार्याशब्दस्यालौकिकसंस्कारयुक्तावचनत्वात् तन्निमित्ततानुपपत्तेः। किन्तु मुख्यार्थबाधादेव दारत्वलाक्षणिकं दारपदम्। अथवा लक्षणं चिह्नं ज्ञापकमिति यावत्। सखा सप्तपदी भवेति मन्त्रेण कन्यायाः सप्तमपदे दत्ते। तथा चैते मन्त्राः भार्यापाणिग्रहणबोधकतया भार्यामपि बोधयन्ति। तथाच पाणिग्रहणात् प्रागेव भार्यात्वनिष्पत्तिः। गृभ्णामि ते सौभगत्वाय हस्तं मया पत्येति मन्त्रलिङ्गेन तथैवावगतेः। "तेषां" मन्त्राणां "निष्ठा" निष्पत्तिः (निष्ठानिष्पत्तिनाशान्ता इति कोषोक्तेरिति कश्चित्) तेषामिति पञ्चम्यर्थे षष्ठी, तेभ्यो मन्त्रेभ्य इत्यपरः। निष्ठेति भार्यात्वस्येति शेषः। एतेन सप्तपदीगमनात् भार्यात्वस्य पूर्णा निष्पत्तिर्विज्ञेया। अनेन च पाणिग्रहणानन्तरं सप्तपदीगमनं प्रतीयते तच्च छन्दोगेतरेषां पारस्कराश्वलायनादिभिः स्वस्वगृह्ये पाणिग्रहणमभिधाय सप्तपदीगमनोक्तेः। छन्दोगानान्तु सप्तपदीगमनानन्तरं पाणिग्रहणं गोभिलगृह्येऽभिहितम्। तद्विवाहगतेति यन्मनुवचनं तदिति सम्वन्धः। विवाहगतानां दाराणां संस्कारविशेषार्थमिति कश्चित्। अथवा संस्कारस्य विशेषः विशेषसंस्कारः। तथा च विवाहादागतः यः संस्कारस्तन्निष्ठो वैलक्षण्यं प्राशस्त्यमिति यावत्। "तदर्थं" तन्निमित्तमित्यर्थः। अङ्गप्रकर्षात् फलप्रकर्ष इति न्यायात्। अत एव विवाहकर्मणि तादृशमन्त्रस्य संस्कारगतवैलक्षण्यार्थत्वादेव। निष्ठेति भार्यात्ववैलक्षण्योत्पत्तिरूपा। पाणिग्रहणावधि सप्तपदीगमनान्तमन्त्राणां विवाहकर्माङ्गत्वं विशेषयति "तथा चे"ति। रत्नाकरवाक्यस्य मुनिवाक्यत्वाभावात् मुनिवाक्येनैवोक्तार्थं द्रढयति "व्यक्तमाहे"ति। तत्रापि पाणिग्रहणे इति अपिना विवाहकर्मणः पूर्वाङ्गं समुच्चीयते। "न जायापतित्व"मिति, कृत्स्नमिति शेषः। अन्यथा अङ्गानां प्रधानोपकारकत्वं व्याहन्येत। सप्तमे पदे कृत्स्नमित्यनेन सप्तपदीगमनमुदीच्याङ्गमिति सूचयति। भार्यात्वनिष्पत्तेस्तथावगतेः। एतच्च लघुहारीतवचनं छन्दोगेतरविषयकमिति वोध्यम्। न त्वेतावता प्रमाणेनापि पाणिग्रहणस्योद्वाहत्वं न निराकृतमिति तत्राह विवाहस्त्विवति। वृत्तः सञ्जात इत्यर्थः। पाणिग्रहणमन्त्राणामित्यस्यायमर्थः। परस्येति तृतीयार्थे षष्ठी, तथाच परेण कृतोद्वाहा भार्या येन त्रिशंकुना पाणिग्रहणात् पूर्वं हृता स दुर्मतिः पाणिग्रहणमन्त्राणां विघ्नं चक्रे। तथा चात्र पाणिग्रहणात् प्रागप्युद्वाहपदप्रयोगात् पाणिग्रहणं न विवाह इति सुव्यक्तीकृतम्। 'उद्वाहकर्मणी'ति नान्दीश्राद्धं विवाहादावित्यत्रेवाङ्गाङ्गीभावः सप्तम्यर्थः। तथा च उद्वाहकर्माङ्गं यः पाणिग्रहणसंस्कारः सवर्णासु समानजातीयासु उपदिश्यते गृह्योक्तशास्त्रेण विधीयते, असवर्णासु ब्राह्मणादेः क्षत्रियादिषु पुनः पाणिग्रहणस्थानेऽयं वक्ष्यमानो विधिर्ज्ञेयः। तमाह "शर" इति; उत्कृष्टवेदने इत्यस्य सर्वत्रान्वयः। तथाहि ब्राह्मणकर्तृकक्षत्रियाविवाहे क्षत्रियया परिगृहीत काण्डैकदेशो ब्राह्मणेन पाणिग्रहणस्थाने ग्राह्यः। एवमन्यत्रापि। प्रतोदो दण्डः, वलीवर्दानामायासः क्रियते येन। वाह्यमानाः पीडयन्ते हस्तीनामिवांकुशः। उत्कृष्टवेदने इत्यनेन अनुलोमविवाहः सूच्यते। प्रागुक्तमनुवचनप्रतीकं व्याकुरुते

'मैथुने' इति। "स्त्रीपुंसौ मिथुनं द्वन्द्वम्"इत्यमरोक्तेः मिथुनं स्त्रीपुंसौ, तदुभयसाध्यं कर्म अग्न्याधानं पुत्रोत्पत्त्यादि च। तथा च श्रुतिः 'तौ दम्पती क्षौमे वसानावग्निमादधीयाता'मिति। "से"ति असपिण्डा असगोत्रा च। अत्रासपिण्डायाः प्राशस्त्यकीर्तनात् सपिण्डानामप्राशस्त्यमेवायाति। सैवं प्रशस्ता विहितेति कश्चित्। वस्तुतस्त्रिगोत्रान्तरितामपेक्ष्य प्रशस्ता इत्यर्थः। अग्न्याधानादेः स्त्रीपुरुष-साध्यत्वं स्मृत्यापि प्रमाणयति "अत एवे"ति। आधानादेः मिथुनत्वादेव। न गृहमिति गृहस्थशब्द-घटकगृहपदं न तृणकाष्ठादिरचितगृहपरमपि तु गृहिनीपरम्। अत्र हेतुमाह "तयाही" ति। पुरुषार्थान् धर्मकामार्थमोक्षान्। 'पुत्रोत्पत्त्यादा'विति यदुक्तं तत् प्रमाणयति "लोकानन्त्य"मिति। लोकनामक-स्वर्गः, आनन्त्यं ब्रह्मस्थानं स्वर्गविशेषः। आनन्त्यमव्ययशब्दः। आनन्त्येति पाठान्तरं तत्रापि स एवार्थः। दिवशब्दः सूर्यलोकमभिधत्ते, एषु पुत्रादीनां यथासंख्यमन्वयः। तथा च मनुः

पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति पिष्टपम्॥

पिष्टपम् लोकम्। ब्रध्नस्य सूर्यस्य। "स्त्रियः सेव्या" इत्यादि। सेव्याः सन्तोषयितव्याः। सुरक्षिताः कृत्वा भर्तव्याः यथाशक्ति वस्त्रालंकारादिभिरिति शेषः।५॥

साापिण्ड्यज्ञानं विना सपिण्डेतरज्ञानं न सम्भवति। सापिण्ड्यं मुख्यमतोऽभिधाय वैवाहिकसापिण्ड्यं प्रतिपिपादयिषुराह सापिण्ड्यमिति। लेप इति पिण्डप्रदानानन्तरं करसंसृष्टं पिण्डांशरूपं लेपभुजः पितरः प्रीयन्तामित्यनेन यद्दीयते। चतुर्थ इति पित्रपेक्षया। तथा च

पिता पितामहश्चैव तथैव प्रपितामहः।
लेपभाजश्चतुर्थाद्याः सापिण्ड्यं साप्तपौरुषम्।

पित्रादिप्रपितामहान्ताः पिण्डभागिनः। वृद्धप्रपितामहावधिका अत्यतिवृद्धप्रपितामहाः लेपभागिनः। तेषामिति उद्देश्यतासम्बन्धे षष्ठी। पिण्डद इति। पिण्डपदेन पिण्डलेपौ लक्ष्येते। तथाच प्रोक्तषट्पुरुषोद्देशेन यथाक्रमं पिण्डपिण्डांशदः सप्तमः। एतत् साप्तपौरुषं सप्तपुरुषत्वव्यापकं सापिण्ड्यमित्यर्थः।

सपिण्डलक्षणञ्च समानोदकत्वे सति सप्तमान्तर्गतत्वे च सति पिण्डलेपदातृत्वभोक्तृत्वान्यतर-योग्यत्वम्। शूद्रदौहित्रव्यावृत्तये समानोदकत्वे सति इति विशेषणम्। जीवन्तमतिदद्याद्वा इत्यनेन कदाचिदष्टमपुरुषे पिण्डादिसम्बन्धे सापिण्ड्यवारणाय सप्तमान्तर्गतत्वेति विशेषणम्। जीवद्भिः सह परस्परसापिण्ड्यलाभाय योग्यत्वं निवेश्यं तच्च शास्त्रबोधितत्वम्। अत्र भोक्तृत्व-निवेशाभावे दातुरेव सापिण्ड्यं स्यात्। अर्थात् पुत्रादिभिः सह पित्रादेः सापिण्ड्यं न स्यात्। पुत्रा-द्युद्देशेन पित्रादेः पिण्डाप्रदानात्। वैवाहिकसापिण्ड्यन्तु गौणं गुणाश्च बीजिपुरुषापेक्षया परिगणित-गतशास्त्रीयसंख्याप्रयोजकापेक्षाबुद्धिविषयतावच्छेदकत्वम्। अतो मुख्यसापिण्ड्यज्ञानमावश्यकमिति मुख्यसापिण्ड्यं प्रथमतः प्रदर्शितम्। न्यायेन विधिनेति यादृश्या विवाहे शास्त्रतो न निषेध उपलभ्यते, अपि तु लोकविद्वेषस्तथाविधोद्वाहो न कर्तव्यः। यथा विमातृभगिन्यादेः। 'अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु' इति याज्ञवल्क्यनिषेधाच्च। "अत एव" विष्णुपुराणे पित्रपेक्षया सप्तमवर्जना-देव। एकपितृकस्यापीति अपिना द्विपितृकस्य संग्रहः। असगोत्रान्वये पितृपदं निरर्थकं स्यात् पितुः सगोत्रायाः स्वस्यापि सगोत्रत्वात् निजगोत्रावर्जनेनैव चरितार्थत्वात् इति। तथा चात्रासगोत्रान्वये पितृपदवैकल्यं प्रदर्शयतश्चकारसमुच्चितासपिण्डान्वये एव सार्थकत्वं पितृपदस्येत्यभिप्रायः प्रतीयते।

"क्षेत्रिमात्रगोत्रस्ये'ति। ननु (तु) द्विपितृकक्षेत्रजस्य क्षेत्रिमात्रगोत्रभागित्वमप्रसिद्धमेव। तथाहि क्रियानियमे एव क्षेत्रजस्य द्विपितृकत्वं मनुनोक्तम्। यथा—

क्रियाभ्युपगमात्त्वेवं बीजार्थं यत् प्रदीयते।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च।। इति।

अपुत्राभ्यां बीजिक्षेत्रिकाभ्यां मम क्षेत्रं तव बीजं यदपत्यं तदावयोरिति नियमे तस्य द्वावपि बीजिक्षेत्रिकौ पितृत्वभागिनाविति क्रियाभ्युपगमपदार्थः श्राद्धविवेके दर्शितः। खल्वयं यथा द्विपिता तथा द्विगोत्रश्च। यथा बौधायनः—

मृतस्य च प्रसूतो यः क्लीवस्य व्याधितस्य च।
अन्येनानुमतो यस्तु स्वे क्षेत्रे क्षेत्रजो मतः।

स एव द्विपिता द्विगोत्रश्चेति। तथाविधक्रियानियमाभावे तु न द्विपितृकत्वम्। तथाच श्राद्धविवेके प्रवराध्यायसूत्रं यथा—पितृव्येन चैककार्येण जातास्ते परिग्रहीतुरेव भवन्तीति। अस्यार्थः। एककायण एकस्य क्षेत्रिण एव कार्यं अस्य तथाभूतेन। परिग्रहीतुः क्षेत्रिणः एवकारात् न तु बीजिन इति। अपि च

जाता ये त्वनियुक्तायामेकेन बहुभिस्तथा।
अऋकथभाजस्ते सर्वे बीजिनामेव ते सुताः।।
दद्युस्ते बीजिने पिण्डं माता चेत् शुल्कतो हृता
अशुल्कोपहृतायान्तु पिण्डदा वोढ़ुरेव ते।।

अऋकथभाजः क्षेत्रिणामित्यर्थः। एवकारेण द्विपितृकत्वं निरस्तमिति तत् कथं क्षेत्रिमात्रगोत्रभागिनः क्षेत्रजस्य द्विपितृकत्वम्। सत्यमत्र शूलपानेरयमभिप्रायः। शुद्धक्षेत्रजस्य क्षेत्रिमात्रगोत्रभागित्वं शास्त्रानुमोदितमेव। न च तस्यैवकारेण द्विपितृकस्य निरस्तत्वात् कथं सङ्गतिरिति वाच्यम्। द्वौ पितरौ यस्य स द्विपितृकः तस्य भावो द्विपितृकत्वं पितृद्वयोद्देश्यकश्राद्धकर्तृकत्वमिति यावत्। वोढ़ुरेव पिण्डदाः परिग्रहीतुरेव भवन्तीत्यनेनापि तथैवावगतेश्च। एतेनोत्पादकत्वरूपं पितृत्वन्तत्राप्यस्तीति भावः।

न च क्षेत्रजादेरित्यादिशब्देन दत्तकस्य परिग्रहे क्षेत्रिमात्रगोत्रभागित्वविशेषणं तत्रासङ्गतमेव। गोत्रऋक्थजनयितुरित्यादिना दत्तकस्य परिग्रहे क्षेत्रिमात्रगोत्रभागित्वानवगमात् इति वाच्यम्। मीयते दीयते अस्मै इति मात्रपदेन ग्रहीता उच्यते, तथाच क्षेत्रिगोत्रभागित्वं क्षेत्रजमात्रगोत्रभागित्वं दत्तके इति नानुपपत्तिरिति कश्चित्। वस्तुतः क्षेत्रिमात्रगोत्रस्येति क्षेत्रजविशेषणं ग्रहीतृमात्रगोत्रस्येति दत्तकांशे विशेषणं ज्ञातव्यम्। अथ तथापि क्षेत्रिमात्रगोत्रस्येत्यनुपपन्नं, तथाहि यद्गोत्रं क्षेत्रिनिरूपितं तच्च तदितरनिरूपितमिति। सत्यम्, अत्रैकस्य गोत्रपदस्य लोपस्तथाहि क्षेत्रिगोत्रमात्रं गोत्रं अस्येति बहुव्रीहिरतो नानुपपत्तिरिति ध्येयं श्रीमद्भिः। विष्णुसूत्रे निषेधाच्चेति विष्णुपुराणे पितृपक्षे सप्तमीनिषेधादिति हेत्वपेक्षया चकारो वेदितव्यः।।६।।

प्रागुक्तमनुशातातपवचनस्थमातृपदस्य लक्षणया मातामहपरत्वं सदृष्टान्तमुपन्यस्य दार्ष्टान्ते लक्षणाबीजं क्रमेण प्रपञ्चयितुं ग्रन्थमवतारयति अत्रेति। प्रागुक्तमनुशातातपवचने इत्यर्थः। लक्षणीय इति लक्षणया वृत्त्या उपस्थापनीय इत्यर्थः। दृष्टान्तमाह अथेत्यादिमातामहपरत्ववदित्यन्तेन। "अथे"ति अग्निस्वात्तादितर्पणान्तरमित्यर्थः। आत्मीयानिति वस्वादिपित्रादिव्यावृत्तये 'यजमानस्य पित्रे' इत्यादौ यजमानस्येत्यादिवत्। दृष्टान्ते मातृपदस्य मातामहपरत्वे बीजं

निर्दिशति "त्रीनि"ति। मात्रादिविशेषणत्वे तिसृरित्येव युज्यते न पुंस्त्वेन निर्देश इति। अथान्वयानुपपत्त्या 'कुशैरन्तरयन् पितॄन्' इतिवत् लिङ्गव्यत्ययेन पुंस्त्वमिति वाच्यं जनविशेषणत्वेन वा पुंस्त्वेन निर्देशो युक्त इत्याह "तत्पत्नीश्चे"ति। न च तत्पत्नीरित्यन्तेन विमातृप्रभृतीनां ग्रहणं भवेदिति कथं पृथगुपादानं व्यर्थमिति वाच्यं, गोभिलेन नित्यतर्पणप्रकरणस्योक्तत्वात् विमात्रादेस्तर्पणं न नित्यमपि तु काम्यमिति तत्पत्नीरित्यस्य पृथगुपादानं व्यर्थमेवेति भावः। तथा चात्र यथा तर्पणसूत्रस्थमातृपदस्य मातामहपरता एवमत्रापीति। अथ दृष्टान्ते मातृत इत्यस्य वैयर्थ्यापत्त्या गोभिलसूत्रस्थमातृपदं सहतां लक्षणामत्र कथमिति चेदत्रापि लक्षणां विना मातृपदवैयर्थ्यं स्फुटयति "अप्रत्ताना"मित्यादि। अप्रत्तानामदत्तानामित्यर्थः। "प्रत्ताना"मिति विवाहितानामित्यर्थः। भर्तृसापिण्ड्यमित्युक्तेर्विवाहं विना भर्तृत्वाभावात्। अत एव मातुर्विवाहेनेत्युक्तं सङ्गच्छते। सापिण्ड्यनिवृत्तेरिति भर्तृसापिण्ड्यमित्युक्तेः। "भर्तृसापिण्ड्यने"ति भर्तृसमानसापिण्डेनेत्यर्थः। तथाच विवाहानन्तरभर्तृसापिण्ड्यातिरिक्तसापिण्ड्याभावात् पितृसपिण्डावर्जनतो मातृसपिण्डावर्जनसिद्धेर्मातृपदस्यासपिण्डान्वयेनानर्थक्यं स्फुटतरमिति भाव्यम्। असगोत्रान्वयेऽपि सार्थक्याभावं दर्शयति "विवाहेने"ति। अथ विवाहस्य गोत्रापहारकत्वप्रतिपादकं किमपि वचनं नोपलभ्यते, अपि तु पाणिग्रहणादेरेवेति तत् कथं विवाहेन गोत्रनिवृत्तिरुक्तेति सत्यमत्र कश्चित् विवाहेन साङ्गविवाहक्रिययेति समाधत्ते। वस्तुतः भर्तृसापिण्डस्य भर्तृगोत्रघटिततया तत्समानसापिण्डेनास्या भर्तृगोत्रसम्बन्धः प्रतीयते इति।

'मातुरुपादानं व्यर्थं स्यादि'ति। अथ यत्र कन्या पुत्रमुत्पाद्यापरिनीतैव परेता तथाविधस्य कानीनस्य पितुर्मातुश्च सापिण्ड्यभेदादुभयोपादानं सार्थकमिति वाच्यम्। न च कानीनः कन्यकाजातो मातामहसुतो मत इति याज्ञवल्क्येन तस्य मातामहसुतत्वाभिधानात् पितुर्मातुश्च सापिण्ड्यं तत्राप्येकमिति वाच्यम्, उत्पादयितुरपि पितृत्वेन तत्सापिण्ड्यस्य मातृसापिण्ड्यस्य च परस्परं भेदात्। तदिह कथं मातुरुपादानं विफलमिति, सत्यं,

दीर्घकालं ब्रह्मचर्यं धारणञ्च कमण्डलोः।
गोत्रान्मातृसपिण्डाद्वा विवाहो गोवधस्तथा।
नराश्वमेधौ मद्यञ्च कलौ वर्ज्यं द्विजातिभिः॥

इति हलायुधशुलपाणिगृहस्थरत्नाकरधृतब्रह्मपुराणवचनान्मातृसपिण्डावर्जनं कलावेव नान्यदेति। सत्येवं कलौ कानीनसन्तानाभावात् तदन्तर्भविन मातृसपिण्डावर्जनसाफल्यं न सम्भवत्येवेति ध्येयम्। कश्चित्तु मातृपितृसम्बन्धादिति सुमन्तुवचनोक्तसप्तमगणनस्य वरापेक्षितत्वेन तदुपपत्त्यर्थं मातृपदस्य मातामहलक्षणावश्यमङ्गीकार्या। अथ मातृपदस्य प्रमातामहादौ लक्षणास्तां तथाच मातरं तत् पितरञ्चादाय सप्तमगणना बाधितैवेति चेन्मैवं लक्ष्यतावच्छेदकगौरवात्। वरं यावच्च कन्यकामिति वक्ष्यमाणवचनाद्वरस्य सप्तमगणनाप्रतियोगित्वाच्च।

"एवमेवे"ति मातृपदस्य लक्षणया मातामहपरत्वं विना मातुरुपादानस्य वैयर्थ्यमेव। "विवेककृत" इति। तथा च सम्बन्धविवेके शूलपाणिमहामहोपाध्यायैरत्र मातृपदेन मातामहो लक्षणीय इत्युपक्रम्यानतिदूरे मातुरुपादानं व्यर्थं स्यादित्यभिहितम्। मातामहपक्षे त्विति तुकारेण पितृपक्षवत् साप्तपौरुषसापिण्ड्यव्यवच्छेदः।

सप्तमे पञ्चमे वेत्यत्र गते इत्यध्याहार्यम्, अनन्तरोक्तयमवचनैकवाक्यतया मातामहपक्षविषयत्वाच्चेति हेतुद्वयं मातामहपक्षे तु सापिण्ड्यं पाञ्चपौरुषमित्यत्रान्वेति॥७॥

वरस्य पितृपक्षे साप्तपौरुषसापिण्ड्यस्य वैवाहिकत्वं प्रागुक्तविष्णुपुराणविष्णुसूत्राभ्यां व्यवस्थाप्य मातामहपक्षे तु सापिंड्यं पाञ्चपौरुषमित्युक्तम्। अत्र प्रमाणत्वेनापन्यस्तयोर्यमवचनगौतमसूत्रयो-र्विवाहनामगन्धोऽपि न श्रूयते। तदेतद्वचनपरिबोधित-मातृपक्षीयसापिण्ड्यं विवाहविषये इत्यवधार-रयितुमेवमदत्तकन्यानां 'अप्रत्तानां तथा स्त्रीणा' मिति पूर्वार्धेन पितृपक्षीयसाप्तपौरुषसापिण्ड्यस्य 'अप्रत्तानां त्रिपौरुष'मिति सूत्रेण पितृपक्षे त्रैपुरुषिकसापिण्ड्यस्य च कीर्तनादनयोर्विरोधाद्भिन्नविषयत्वं कल्पयितुञ्चाह "एवञ्चे"ति। सापिण्ड्यविधायकवचनसत्वे च। विरोधादिकं परिहरति "अदत्तकन्यानामिति"। तथाचाप्रत्तानां तथा स्त्रीणामिति वचनपूर्वार्द्धेन निर्विशेषितं यत् सापिण्ड्य-मुक्तं तस्य वैवाहिकत्वं तासान्त्रिपौरुषीयसापिण्ड्यन्तु अशौचाद्यर्थमिति न विरोधः। मात्रपदम-शौचादिव्यवच्छेदकमत एवोक्तम्।

अथ वरपितृपक्षीयसपिण्डावर्जनस्यैव मन्वादिभिरुक्तत्वात् किमिह कन्यानां पितृपक्षे वैवाहिक-सापिण्ड्यमुपदिश्यत इति, मैवं, विवाहमात्रे इत्यनेन वरसम्बन्धिपितृपक्षीयसाप्तपौरुषं सापिण्ड्यम-दत्तकन्यामित्यर्थः सिध्यति। तादृशसापिण्ड्यं अदत्ताकन्यावृत्तीति तात्पर्यम्। निर्विशेषितसापिण्ड्य-विधायकप्रमाणानां विवाहविषयत्वं कुत इत्याह "पूर्वोक्ते"ति। सप्तमीं पितृपक्षाच्चेति विष्णुपुराणं न सगोत्रामित्यादि विष्णुसूत्रम्, ताभ्यां सह असमानार्षेयीमित्यादि पैठीनसिवचनेन चैकवाक्यत्वा-दित्यर्थः। पैठिनसिवचने असमानार्षेयीमित्यस्यासमानगोत्रप्रवरामित्यर्थः। एतद्वचनस्थत्रीन् पञ्चेत्यस्य विषयं दर्शयति त्रीन् पञ्चेति। विवेकक्कतः पक्षद्वयमिदं न चारु। आसुरादिविवाह-विषयत्वे प्रमाणविरहात्। सर्ववर्णसाधारणैकरूपसापिण्ड्यस्य कीर्तनाच्च। रत्नाकरादय इति तेषामयमाशयः, सर्ववर्णेष्वयं विधिरित्युक्तत्वात् चातुर्वर्णविवाह एव सप्तम्यादिकवर्जनमास्तां किन्तु ये च न सवर्णा अपि तु वर्णान्तराला मूर्धाभिषिक्तादयस्तेषां वैवाहिकसापिण्ड्यस्याप्राप्तत्वादनेन तद्विधीयते। मूर्धाभिषिक्तः ब्राह्मणात् क्षत्रियायां जातः। आदिना अम्बष्ठादेर्ग्रहणम्।

विप्रान्मूर्धाभिषिक्तस्तु क्षत्रियायां विशः स्त्रियाम्।
जातोऽम्बष्ठस्तु वैश्यायां निषादः पारशवः स्मृतः॥

इत्यनेनाम्बष्ठादयोपि वेदितव्याः। तथाच मूर्धाभिषिक्तादिर्मातामहपक्षे त्रीन् पितृपक्षे च पञ्च वर्जयेदिति रत्नाकरमतम्।

स्पष्टस्य तु विधेर्नान्यैरुपसंहारसम्भव इति शास्त्रानुमोदितसामान्यनिषेधे विशेषनिषेधो-ऽधिकदोषार्थ इत्युक्तपक्षमनुसरन् स्वमतमाह "वस्तुतस्त्व"ति। 'अन्यथे'ति अधिकदोषार्थकत्वाभावे। "धर्मत" इति धर्मशात्रानुसारतः; तथाच धर्मशास्त्रानुसारेण यतो भगिन्योऽतस्ता वर्जयेत्। अथवा धर्मत इति धर्मनिमित्तं वर्जयेदित्यर्थः। एतेनैतासां विवाहे धर्महानिरिति तात्पर्यम्। 'का गति' रिति पैठीनसिमुनेस्त्रीन् मातृत इत्यादिना मातृस्वसृदुहित्रादीनां वर्जनप्राप्तौ पूनर्वर्जनविधायक-वचनं प्राप्तार्थविषयकतयानुवादरूपमेव स्यादिति तात्पर्यम्। 'एवञ्चे'ति अधिकवचनस्याधिक-दोषपरत्वे सतीत्यर्थः। "त्रीन्मातृत" इति पूर्ववचनं 'प्रमातामहे'ति। अथात्र मातामहं परित्यज्य प्रमातामहादिकं कथमुक्तमिति चेत् सत्यं, न मातामहपरित्यागः मातामहापेक्षयेति पश्चादुक्तेः। प्रमातामहादीनां प्राक्प्रदर्शनं तु सप्रयोजनम्। तथाहि प्रमातामहादीन् अपेक्ष्य सन्ततित्रयमधिक-दोषार्थं वर्जयेत्। अधिकदोषश्च तेषां चतुर्थसन्ततिपञ्चमसन्तत्यपेक्षया तेषां तथाविधसन्तान-त्रयापेक्षयापि मातृस्वसृदुहित्रादीनां मातामहापेक्षया त्रितयान्तर्गतानां विवाहे पुनरधिकदोष इति ज्ञापनार्थं पुनर्वचनमिति भावः। एवं पितृपक्षेऽपि। अत्र पितृस्वसृदुहितुः पित्रादिपञ्चकान्तर्ग-तत्वेऽपि अन्यापेक्षया अधिकदोषायेति भावः॥८॥

अथ पूर्वोक्तबहुतरवचनैर्मातामहपक्षे पञ्चमीकन्यावर्जनमवगम्यते। अत्र च गणनाप्रतियोगिनां सप्तमत्वकीर्तनात् प्रत्येकापेक्षया सप्तमीकन्याया विवाहे वर्ज्यता स्यादिति विरोधमपनेतुमाह "यत्त्वि"ति। "वचनान्तरैकवाक्यतये"ति मातृपक्षाच्च पञ्चमीमित्यादिनैकवाक्यतयेत्यर्थः। आपञ्चमादन्येषामिति मतमिति शेषः। "ग्राह्ये"ति अविवाह्यत्वेनेति शेषः। "अन्यथे"ति मातामहपक्षे पञ्चमीपर्यन्ताया वर्जनं विनेत्यर्थः। "नानाश्रुतिकल्पने"ति मातामहपक्षे सप्तमीं परिहरेत्, एवं पञ्चमीं परिहरेदित्येवंविधानां श्रुतीनां स्मृत्यादिनानुमानं भवेदित्यर्थः। अथासप्तमादित्यनेनैव यदि मातामहपक्षे पञ्चमीवर्जनमुपलभ्यते तर्हि मातामहपक्षे आपञ्चमादित्यभिधानं पुनरुक्तिदोषकवलितमवेति तस्य तस्य विषयान्तरं दर्शयति "एव"मिति। मातामहपक्षे सुमन्तुवचनपूर्वप्रतीकेन पञ्चमीपर्यन्ताया वर्जने इत्यर्थः। "अत्रापी"ति अपिना आसप्तमादित्यस्योपस्थितिः, तथा च यथा मातामहपक्षे सप्तमगणनायां वरस्य तन्मातुश्चापेक्षा तथात्रापीत्यपेरर्थः। "युक्तत्वा"दिति अन्यथा अन्येषामिति न सङ्गच्छते, पितृपक्षे मातामहपक्षे च तथाविधावर्जनस्यैव स्वमतसिद्धत्वात्। "एवञ्चे"ति आसप्तमादित्यस्योभयपक्षविषयकत्वे सति। "लक्षणा स्फुटैवे"ति सप्तमगणनस्य वरापेक्षितत्वेऽपि न सप्तमत्वोपपत्तिरित्यनुपपत्या लक्षणावश्यमङ्गीकार्येति स्फुटेत्युक्तम् ॥९॥

"एतेने"ति मातृपदस्य मातामहलक्षणाया आवश्यकत्वेन। 'वरापेक्षया वे'ति वाशब्दः समुच्चयार्थः। तथाच जनन्यपेक्षया तादृशत्रिपुरुषसपिण्डापेक्षया वरापेक्षया चेत्यर्थः। "अत एव" मातृपदस्य मातामहपरत्वादेव, याज्ञवल्क्यटीका दीपकलिकाख्या तस्यामित्यर्थः। 'एवञ्चे'ति सप्तमीपञ्चमीपर्यन्तायाः कन्यायाः वर्जनीयत्वे चेत्यर्थः। "परस्परजाताया" इति अनेन सगोत्रात्वव्यवच्छेदः। "अत एव" परस्परजाताया निषेधादेव। "सपिण्डारूपे"ति समानगोत्रेत्यर्थः। "व्यर्थः स्या"दिति त्रिगोत्रान्तरितत्वासम्भवादिति हेतोः। "अत्रे"ति, 'पञ्चमातृतः' इत्यादि पैठीनसिवचने 'पञ्चमात् सप्तमादूर्ध्वं मातृतः पितृतः क्रमा'दिति यमवचने चेत्यर्थः। "केवले"ति पक्षशब्दासमभिव्याहृतेत्यर्थः। "सम्बद्धित्वेने"ति अत्र पितृपदलक्ष्यतावच्छेदकसम्बन्धश्च स्वावधिकोर्ध्वतनसप्तमान्तर्गतत्वस्वबन्धुत्वैतदन्यतररूपः। मातृपदलक्ष्यतावच्छेदकसम्बन्धश्च स्वजनकावधिकोर्ध्वतनपञ्चमान्तर्गतत्वस्वबन्धुत्वैतदन्यतररूपः। ते च सन्तानिन इति ते विवाहकर्तारः सर्वे पतिता विशेषपापभागिनो भवन्ति। पापस्य वैशेष्यञ्च ज्ञानतोऽविवाह्यविवाहे चान्द्रायणद्वयस्योक्तत्वात् चान्द्रायणद्वयनाश्यत्वरूपम्। अज्ञानतस्तस्मिन् चान्द्रायणोक्तेश्चान्द्रायणैकव्रतनाश्यत्वम्। ते सन्तानिणः सन्तः शूद्रतां गताः इति निन्दा अविवाह्यायां सन्तानोत्पादने तत्परिणयापेक्षया समधिकदोषं सूचयति। अत एव प्रायश्चित्तविवेके बौधायनः प्रजाता चेत् कृच्छ्राब्दपादं चरित्वा इत्यादि पुनरग्निश्चक्षुरादित्येत्येताभ्यां जुहुयादित्यन्तेन वचनेनाज्ञानतोऽविवाह्यायां सन्तानोत्पादने चान्द्रायणपूर्वकविलक्षणहोमप्रायश्चित्तं व्यवस्थापितवान्। आसप्तमादिति नारदवचने मात्रादिपदोत्तरश्रूयमानपञ्चमीविभक्त्यर्थं प्रदर्शयितुमाह "मातृत" इत्यादि। "अत्रे"ति घटकत्वं सप्तम्यर्थः पञ्चमीविभक्तौ तस्यान्वयः। तथाच तत्तत्पदघटकीभूता पञ्चमीविभक्तिरित्यर्थः। सन्देहे चैकतरपक्षनिर्णायकं प्रमाणं विनिगमकं तदभावात् पक्षद्वयप्रमाणसद्भावादित्यर्थः। "पूर्वापरे"ति। पूर्वश्चापरश्च पूर्वापरौ तयोरवधिकोऽर्थो यस्याः सा। अर्थात् पूर्वावधिकत्वं परावधिकत्वञ्चार्थः। अवधित्वमिह सप्तमपञ्चमगणनाप्रतियोगित्वरूपम्। आसप्तादित्याद्युपस्थितसप्तपञ्चसंख्यासु तदन्वयः। तथाच तादृशप्रतियोगितानिरुपिता याः सप्तपञ्चसंख्यास्तत्तत्सम्बन्धी यस्तस्मादित्यर्थः।

एतच्च पूर्वावधित्वमेवासप्तमादित्यादिना परावधित्वरूपगणनाप्रतियोगित्वश्रुतेः। न च प्रतियोगिचतुष्टयापेक्षयाधस्तनसप्तमपञ्चमान्तर्गतानां प्रत्येकापेक्षयापि वर्जनमास्तामिति वाच्यं

सापिण्ड्योच्छेदात्। अत एव सन्तानो भिद्यते यस्मात् पूर्वजादित्यादिना प्रतियोगिचतुष्टयापेक्षया पूर्वेषां सन्तानभेदकानां प्रत्येकापेक्षयाधस्तनसप्तमादिगणनमभिहितम्।

अथैवं पितृत इत्यादौ पञ्चमी पूर्वदिग्योगलक्षणैवेति विज्ञायते तदिह कथं विनिगमकाभाव इति सत्यं, उद्वहेत् पितृमात्रोस्तु सप्तमीं पञ्चमीमित्यादिना प्रतियोग्यपेक्षयापि वर्जनस्य प्राप्तत्वादतः सिद्धमत्र पञ्चम्यर्थद्वयकल्पनमिति ।।१०।।

पुर्वमसमानगोत्रप्रवराणां विवाह्यत्वमुक्तं तदिदानीं गोत्रप्रवरौ निरुपयितुं स्मृतिं प्रमाणयति "अत्र चे"ति, गोत्रप्रवरविषये चेत्यर्थः। गोत्रकारिणः गोत्रेष्टिकारिणः। एतेनेतेषां गोत्रप्रवर्तकानां गोत्रत्वमुन्नेयम्। न च एतेषां यान्यपत्यानि तानि गोत्राणि मन्यते इत्युक्तेर्यमदग्निप्रभृती-नामपत्येष्वेव गोत्रत्वमास्तां कथन्तत्र स्मार्तपादैस्तानि गोत्राणीत्यत्र गोत्रशब्दस्य गोत्रसम्बन्धित्वेन लक्षणा कृतेति वाच्यम्। गोत्रकारिण इत्यत्र वैयर्थ्यापत्तेः। भरद्वाजाद्यपत्यानामेव गोत्रत्वे भरद्वाजादीनां गोत्रत्वानुपपत्तेश्च। एवञ्च--

विश्वामित्रो यमदग्निर्भरद्वाजोऽथ गोतमः।
अत्रिर्वशिष्ठः कश्यप इत्येते सप्तऋषयः।।

सप्तानामृषीणामगस्त्याष्टमानां यदपत्यं तद्गोत्रमित्याचक्षते इति बह्वृचगृह्यपरिशिष्टीय-बौधायनवचनेऽपि तथैवार्थः प्रत्येतव्यः। अथात्र वचने शाण्डिल्यसावर्णादीनामेतेष्वनन्तर्भावात् गोत्रत्वानुपपत्तिरिति चेदेतस्य गोत्रप्रवर्तकप्रदर्शकत्वात्। अतएव गोत्रप्रवर्तकाश्च प्राधान्येनाष्टौ ऋषय इति माधवाचार्याः। अत्र प्राधान्येनेत्यभिधानतो गोत्रप्रवर्तका अन्येऽपि सन्तीति सूचितम्। अत एव बौधायनोऽपि—

गोत्राणाञ्च सहस्राणि प्रयुतान्यर्बुदानि च।
ऊनपञ्चाशदेतेषां प्रवरा ऋषिदर्शनात्।। इति स्मरति।

गोत्रसम्बन्धश्च साक्षात्परम्परोदासीनजन्यत्वरुपो ज्ञेयः। वंशपरम्पराप्रसिद्धमिति यदभिहित-मेतदपि प्राचीनसम्मतम्। तथा च गोत्रं वंशपरम्पराप्रसिद्धमिति माधवीयमदनपारिजात-मिताक्षराप्रभृतयः। अथ तादृशादिपुरुषाणामेव गोत्रत्वे तत्तत्परम्पराजातानामिदानीन्तन-पित्रादीनां श्राद्धादौ कथममुकामुकगोत्रैतदित्यादिना गोत्रोच्चारणमिति समाधत्ते "तेने"ति। तदपत्यानां गोत्रसम्बन्धित्वेनेत्यर्थः। तथा च अमुकामुकगोत्रेत्यादौ बहुव्रीहिरेव गोत्रसम्बन्धित्वेन तदवगमयति।

गोत्रं निरुप्य प्रवरं निरुपयति "प्रवरस्त्वि"ति। "गोत्रप्रवर्तकस्ये"ति गोत्रेष्टिकारिण इति। आचारमाधवीये माधवाचार्योऽप्येवमाह। "व्यावर्तको" भेदबुद्धिजनक इत्यर्थः। यथा द्वौ घृतकौशिकौ गोत्ररुपौ, तयोः परस्परं भेदबुद्धिः प्रवरभेदेन जन्यते इति। वस्तुतः यज्ञादिषु गोत्रकारिभिन्नाः प्रवृत्ता मुनिगणाः प्रवराः। प्रव्रियन्ते ये ते प्रवराः कर्मण्यनुप्रत्ययः। अत एव ऋषयः एव यज्ञे व्रियमानाः प्रवरा इति न्यायकुसुमाञ्चलिप्रकाशे वर्धमानोपाध्यायाः। एवञ्चेति तादृशब्राह्मणस्य गोत्रत्वे चेत्यर्थः। क्षत्रियविशामिति व्यक्त्यपेक्षया बहुवचनं प्रातिस्विकं 'स्वं स्वं प्रति' (तत्तत् व्यक्तिं प्रति) प्रतिस्वं, तत्सम्बन्धि इति प्रातिस्विकम्। स्वकीयमिति यावत्। प्रवराभाव इति प्रवरस्य गोत्रघटितत्वादिति तात्पर्यम्। पुरोहितगोत्रभागित्वे प्रमाणयति तथा चेति। यजमान-स्येति कर्मणीति शेषः। "आर्षेयान्" ऋषिसम्बन्धितया गोत्रप्रवरान् इत्यर्थः। "प्रवृनीत" उच्चरेत्। "पौरोहित्यान्" पुरोहितसम्बन्धिनो गोत्रप्रवरान्। राजन्यविशां कर्मणीति शेषः। ।।११।।

"अत एव" ब्राह्मणक्षत्रियविशां गोत्रप्रवरभागित्वादेव। "तर्हि" ब्राह्मणादिवर्णत्रयस्यैव गोत्रप्रवरभागित्वे सति। "श्राद्धादावधिकारश्रुते"रिति। श्राद्धमधिकृत्य 'अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्जित' इत्यादि वराहपुराणीयवचनैरिति शेषः। श्राद्धादावित्यादिना गोत्रशब्दाभिलापाङ्गककर्मान्तरपरिग्रहः। कथमित्यापत्तिः, शुद्रस्य गोत्रसम्बन्धित्वाभावात्। अथ श्राद्धाद्यधिकारे सत्यपि गोत्रोच्चारणस्य कुत आवश्यकतेति श्राद्धादौ गोत्रोच्चारणप्रमाणमवतारयति "गोत्र"मिति। "स्वरान्त"मिति सम्बोधनान्तं सम्बोधनविभक्त्यन्तपदस्यैव स्वरवर्णान्तिमत्वादिति भङ्ग्या उक्तम्। "सर्वत्रे"ति अर्घ्यदानादौ। एवं कर्ता उच्चारयिता न मुह्यति मोहभागी न भवतीत्यर्थः। कर्ता उच्चारयिता एवं न मुह्यति न त्यजति इत्यर्थो वा। श्राद्धादौ गोत्रोच्चारणं प्रति गोभिलीयवचनदर्शनं हेतुः, "आकांक्षितत्वेने"ति शूद्रस्य किं गोत्रभागित्वमित्याकांक्षाविषयत्वेनेत्यर्थः। चकारसमुच्चितगोत्रेणास्यान्वयः। शुद्रानामित्यादिमनुवचनस्यायमर्थः। न्यायवर्तिनां शूद्राणां प्रतिमासिकं वपनं क्षौरं पिण्डनिर्वापनं वा। मासि मासि वोऽशनमिति श्रुतेरमावस्याश्राद्धमिति हारलता। न्यायवर्तित्वञ्च स्वीयमहाम्युदयहेतुदृढतरस्वधर्मबुद्ध्या तत्परेण मनसा अव्याजेन ब्राह्मणशुश्रूषानमस्कारामन्त्रकपञ्चमहायज्ञानुष्ठानमभक्ष्यभक्षणनिवृत्तिर्निषिद्धानाचरणञ्चेति हारलता। वैश्यवत् शौचकल्पः शुद्धिः, अर्थात् पञ्चदशाहे गते शुद्धिर्विज्ञेया। अत्र चकारोऽनुक्तसमुच्चयार्थकः। तर्हि पूर्वपुरुषपुरोहितगोत्रभागित्वे सति। "अत्र" विवाहे, "उपदिष्टातिदिष्टस्ये"ति—ब्राह्मणगोत्रं उपदिष्टं क्षत्रियविशोस्त्वतिदिष्टमित्यर्थः।

"गोत्रादे"रित्यादिना प्रवरस्य ग्रहणम्। अत्र हेतुमाह "अन्यथे"ति उपदिष्टातिदिष्टगोत्रनिषेधं विनेत्यर्थः। 'अतिदेशे पौरोहित्यान् राजन्यविशा'मिति सूत्रान्तरे। "व्यर्थ"मिति ब्राह्मणभिन्नानामित्येवं वक्तव्यस्यैव सम्यक्त्वादिति भावः। "प्रागुक्त" असपिण्डा च या मातुरिति वचने। उपदिष्टातिदिष्टगोत्रस्येति तद्भागित्वस्येत्यर्थः। अत्रोपदिष्टगोत्रभागित्वं गोत्रतया प्रसिद्धो य आदिपुरुषस्तन्निरूपितसाक्षात्परम्परोदासीनजन्यत्वरूपम्। अतिदिष्टगोत्रभागित्वञ्च पुरोहितसमानगोत्रभागित्वम्। वरस्य पितुरुद्वाह्यमानायाः कन्यायाश्चैतदन्यतरसमत्वे पितृसमानगोत्रतया तस्या निषध इति तात्पर्यम्। न्यायमूलकमाह "न त्वि"ति। अतिदिष्टातिदिष्टगोत्रभागित्वञ्च पुरोहितगोत्रभागिसमानगोत्रभागित्वम्। एवं स्थिते साक्षादतिदेशपरम्परातिदेशयोः परम्परातिदेशस्यानेकपदार्थघटितत्वेन विलम्बप्रतिपत्तेर्गौरवं न्यायश्चात्रैतादृश एव प्रत्येतव्यः॥१२॥

"एतन्न्यायमूल"मिति अत्र षष्ठीतत्पुरुषः। न बहुव्रीहिः, तत्पुरुषापेक्षया तस्य दुर्बलत्वात्। नन्वेकस्य द्विजातिपदस्यासगोत्रान्वये मुख्यया वृत्त्या द्विजातेरसपिण्डाद्यन्वये च लक्षणया वृत्त्या सर्ववर्णानामुपस्थापकतेति युगपद्वृत्तिद्वयविरोधः। एवं सकृदुच्चारितः शब्दः सकृदर्थं गमयतीति न्यायविरोधोऽपि। सत्यं, शब्दस्य पुनरन्वयार्थमेवानुषङ्गः, न त्वर्थसहितस्य गौरवादिति व्यवहारतत्त्वीयसन्दर्भेण अर्थसहितस्य द्विजातिपदस्यानुषङ्गापेक्षया केवलद्विजातिपदस्य लाघवादनुषङ्गः। ततश्चानुषक्तस्य पदान्तरत्वात् तेनैव सर्वेषां वर्णाणां लक्षणयोपस्थितौ नातिदोषः।

अथ शूद्रस्य सपिण्डादिवर्जनं माभूदिति वचने द्विजातिपदश्रुतेः, अनुषङ्गकल्पनस्य च प्रमाणमन्तरेणाशक्यत्वादित्याह "सपिण्डसमानोदकते"ति। न च सर्वस्मृतिप्रबलतरमनुस्मृतौ द्विजातिपदस्यानुषङ्गापेक्षया हरिनाथोपाध्यायधृतयमवचनस्थसर्वपदस्यैव सङ्कोचो न्याय्यः। युक्तिस्तु शास्त्रतो दुर्बलेति कथं सापिण्ड्यं शूद्रेऽप्यविशिष्टमिति वाच्यम्। कथं वा समानोदकता द्विजातितुल्या

सगोत्रां मातुरप्येके नेच्छन्त्युद्वाहकर्मणीति वचने द्विजातिपदाभावेऽपि 'असम्बद्धा भवेद्यातु' इत्यादि-वचनेनासमानोदकाया विवाह्यता द्विजातीनामेवोक्तेरिति वाच्यम् ।

समानगोत्रप्रवरां शूद्रामुद्वा न दोषभाक् ।
शूद्रः स्यात् शूद्रजातिस्तु सपिण्डे दोषभाग् भवेत् ।।

इति कृत्यचिन्तामणिधृतानन्यगतिकभविष्यपूराणवचनमहिम्ना प्रागुक्तमनुशातातपीयद्विजातिपदमस-पिण्डाद्यन्वये पूर्ववत् सर्ववर्णपरं वाच्यम् । अतः सिद्धं शूद्रस्यापि सपिण्डावर्जनमिति ।।१३।।

"सगोत्राञ्चेदि"ति । अत्र सगोत्रापदं लक्षणयाऽविवाह्यापरम् । "अमत्या" अज्ञानतः "उपयच्छेदु"-द्वहेदित्यर्थः । "मातृवदि"ति भरणस्यावश्यकत्वमावेदयति । नेदं वचनं सगोत्रादिकन्याविवाहोपदेशकं वक्ष्यमानसुमन्तवचने प्रायश्चित्तश्रुतेः । तथाच सुमन्तुवचनैकवाक्यतया वचनस्यायमर्थः प्रत्येतव्यः, सगोत्रां चेद्यदि अज्ञानत उपयच्छेदुद्वहेत्तदा चान्द्रायणं प्रायश्चित्तं कुर्यात् । तदुपभोगं परिहरे-त्तामवश्यं विभृयादिति च । एतच्च 'भोगतस्तां परित्यज्य पालयेज्जननीमिवे'ति स्मृत्यर्थसारधृत-वचनसंवादात् । समानार्षेयीं (समानगोत्रप्रवराम्) । समानगोत्रप्रवरामिति वचने क्तान्तपदत्रयं प्रायश्चित्तविशेषज्ञापनार्थम् । तथाहि अज्ञानतोऽविवाह्याविवाहे चान्द्रायणम् । अज्ञानतस्तत्सम्भोगे चान्द्रायणार्धम-ज्ञानात् गर्भोत्पादे कृच्छ्राब्दपाद इति बोद्धव्यम् । चाण्डालं चाण्डालसदृशं शूद्राद् ब्राह्मण्यां जातस्यैव चाण्डालत्वात् । "समानप्रवरत्वं संख्यासंज्ञयोरन्यूनानतिरिक्तत्वेने"ति । अत्र समानप्रवरत्वं प्रवरगतसमत्वमित्यर्थः । समत्वं केन इत्याह अन्यूनानतिरिक्तत्वेनेति । अत्र अन्यूनत्वं न्यूनदेश-वृत्तित्वाभावः । अनतिरिक्तत्वं अधिकदेशवृत्तित्वाभावः । एतेन व्याप्यत्वे सति व्यापकत्वं समदेश-वृत्तित्वमिति यावत् । तथा च यस्य वरस्य प्रवरे यादृशी संख्या वा संज्ञा वर्तते कन्यायाः प्रवरे यदि सैव संख्या वा संज्ञा स्यात्तदा तस्य वरस्य सा कन्या समानप्रवरेति । अत्र संज्ञाया अन्यूनातिरिक्तत्वेनेत्युक्तौ गालवगोत्रीयवरस्य काश्यपगोत्रसम्बन्धिनी कन्यापि समानप्रवरतया अविवाह्या स्यात् । 'द्विजानां गालवगोत्राणां चत्वारः प्रवरा मताः । काश्यपः काश्यपोऽपसारो नैयध्रुव इति क्रमा'दिति वचनात् गालवगोत्रीयप्रवरणां चतुष्ट्वसंख्यावत्त्वेऽपिं गालवगोत्रप्रवरकाश्यपगोत्रप्रवरगतसंज्ञानां अन्यूनानतिरिक्तत्वादिति । संख्याया अन्यूनानतिरिक्तत्वमात्रोक्तौ काश्यपगोत्रीयवरस्य शाण्डिल्यगोत्रसम्बन्धिनी कन्याप्य-विवाह्या स्यात् अतः संज्ञाया अन्यूनानतिरिक्तत्वमिति । अथैकगोत्रप्रवरभेदाभावात् समानप्रवरा-निषेधेनैव चरितार्थत्वे कथं पृथक् समानगोत्रानिषेधः इत्याह "एकगोत्रे चे"ति । सगोत्रासमानप्रवरा-ग्रहणमिति । सगोत्रासमानप्रवरयोर्ग्रहणं ज्ञानं यस्मात् समानार्षेयीपदात् तत्पदं उपलक्षणमिति भावः । "उपलक्षण"मिति । उपलक्ष्यते लक्षणया उपस्थाप्यते अर्थो येन तदुपलक्षणम् । अन्यथा उपलक्षणपदस्य पदेन सहान्वयानुपपत्तेः । सर्वपापक्षयो भवेदिति अत्र चान्द्रायणव्रतनाश्यत्वरूपेण सर्वपदस्य सङ्कोचः । "समुद्रयात्रास्वीकारः" इति समुद्रयात्रा येन जनेन कृता तस्य स्वीकारो व्यवहारः अन्यथा समुद्रयात्रानिषेधेनैव चरितार्थत्वे स्वीकारपदवैयर्थ्यापत्तेरिति केचित् । अपरे तु समुद्रयात्रा समुद्रगन्त्रा सह स्वीकारो व्यवहारः संसर्ग इति यावत् । मरणमुद्दिश्य समुद्रयात्रास्वीकारः इति कश्चित् । निर्णयसिन्धौ समुद्रयातुः स्वीकार इति पाठः । "कमण्डलुविधारण"मिति, अनेन सन्न्यासो लक्ष्यते । एतच्च क्षत्रियादिवर्णत्रयमात्रविषयकं चत्वार आश्रमाश्चैव इत्यनेन कलावपि ब्राह्मणस्य सन्न्यासाश्रमविधानात् । कमण्डलुविधारणमित्यस्य त्रिदण्डसन्न्यासग्रहणपरत्वेन सङ्कोच इति कश्चित् । 'यज्ञोपवीते द्वे धार्ये सोदकश्च कमण्डलुः' इति गृहस्थधर्मोक्तं कमण्डलुधारणमित्यपरे । "मधुपर्के"

मधुपर्काख्ययागविशेषे "पशोर्वधः" पशुघातनमिति कश्चित्। पूर्वमतिथावागते तस्मै मधुपर्कसहितं गामजं दत्त्वा तस्यैव भोजनार्थं पशुघाताचार इत्यपरे। वस्तुतस्तु गृहीतवेदाय मानवकाय आचार्यप्रदत्ते मधुपर्के गोवध इत्यर्थः। अत एव मनुना 'अर्हयेत् प्रथमं गवा' इत्यनेन गोसाधनमधुपर्केणाचार्यकर्तृकब्रह्मचारिपूजनमभिहितम्। कलावश्वमेधवर्जनं कल्पभेदादविरुद्धं युधिष्ठिरादीनां तद्दर्शनात्। "महाप्रस्थानगमनं" मरणमुद्दिश्य हिमालयगमनम्। एतदपि युधिष्ठिरादीनां महाप्रस्थानगमनस्य कलौ दृष्टत्वात्, अथवा साधुनामेष समयः युधिष्ठिरादीनां महाप्रस्थानगमनात परं वृत्त इति। "दीर्घकालं ब्रह्मचर्यमि"ति 'षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रत' मित्यनेन मनुनाभिहितम्। "वृत्ते"त्यादि, वृत्तं श्रौतहोमादि, "स्वाध्यायो" वेदाध्ययनं, तदुभयनिबन्धनम"घसङ्कोचनं" सगुणब्राह्मणानामशौचह्रासः। "शूद्रेष्वि"ति अत्र निर्द्धारणे सप्तमी शूद्रेषु मध्ये इत्यर्थः। "कुलमित्रे"ति। कुलमित्रन्तु नापित इत्यमरकोषान्नापित इत्यर्थः। अत एव प्रायश्चित्तविवेके देवलवचनं यथा—

स्वदासो नापितो गोपः कुम्भकारः कृषीवलः।
ब्राह्मणैरपि भोज्यान्नाः पञ्चैते शूद्रयोनयः॥

वस्तुतः कुलक्रमेण पुरुषपरम्परया मित्रं कुलमित्रम्। 'अतएव शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदये'दिति याज्ञवल्क्यवचनेन नापितपृथक्त्वेन कुलमित्रमुक्तम्। स्वत्वं विना स्वकीयश्रमेण भूम्यर्जितवित्तस्यार्धभागी अर्धसीरीत्यर्थः। कुम्भकारस्यापि आत्मनिवेदकत्व एव अन्नं भोज्यं यश्चात्मानं निवेदयत्यनेनैकवाक्यत्वात्। शूद्रेषु मध्ये एतेषां भोज्यान्नतेत्यर्थः। "ब्राह्मणादिषु" ब्राह्मणादिनिमित्तिका शूद्रकर्तृकपाकादिक्रियेत्यर्थः। "भृग्वग्निपतन"मिति। एतत् पतनं मरणार्थं जलप्रवेशी चानन्दमित्यादिना मरणस्यैव विहितत्वात्। अत्राग्निपतनं पीडादिना जीवनधारणासामर्थ्ये ज्ञेयं भृगुसाहर्यात्। अतः सहमरणे न दोष इति कश्चित्। अपरन्तु प्रकरणात् पुरुषपरोऽयं निषेध इत्याह। नन्वत्र पतनमिति कस्मिन् वाच्ये प्रत्ययः; भाववाच्ये चेत्तदा भृग्ववधिकपतनमग्नौ पतनञ्च न सिद्धति। अत इत्थं व्याख्यायते। पतनञ्च पतनञ्च पतने इत्येकशेषादेकस्य पतनपदस्य लोपः। अत्र पतनपदयोरेकमपादानवाचियुट्प्रत्ययसाधितम्। अपरमधिकरणवाचियुट्साधनम्। ततश्च भृग्ववधिकपतनमग्नौ पतनञ्चेत्यर्थद्वयावगमः। अन्ये तु भृग्वग्निपतनमिति वृद्धादिमरणमित्यस्य विशेषणमाहुः। एतन्मते पतनमिति भाक्तसम्प्रदानवाचियुट्प्रत्ययसाधनम्, भृग्वग्निभ्यां पतनमिति व्यासवाक्यं तृतीयार्थः प्रयोज्यत्वं, तथा च पतनजन्यं यद्वृद्धादिमरणं तद्भृग्वग्निप्रयोज्यमिति बोधः। वस्तुतो वृद्धादिमरणमिति निर्विशेषितं तदर्थश्चान्ते वार्धक्यासहिष्णुतया मरणमिति। तच्च वृद्धत्वं, तथा वृद्धः शौचस्मृतेर्लुप्तःप्रत्याख्यातभिषक्क्रियः, आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिरित्यादिना विहितम्। "एतानि" पूर्वोक्तानि। "गुप्त्यर्थं" रक्षार्थम्। १४॥

संसर्गदोषः पापेष्विति निर्धारणे सप्तमी, तेन तन्मध्ये इत्यर्थः। 'अत्र' संसर्गदोषे, 'विशेषयति' युगविशेषविशेषितसंसर्गनिषेधकवचनं वक्तीत्यर्थः। "त्यजेद्देशं कृतयुगे" इत्यादि पापियुतैकदेशवासादिरूपसंसर्गः सत्ययुगादौ निषिद्धः, कलौ तु स न निषिद्धः। "कृते सम्भाषणादेवे"ति अत्र एवशब्दस्यान्ययोगव्यवच्छेदपरत्वे गुरुतरयाजनादिभिः सद्यःपातहेतुभिः पातित्यं न स्यात्। नचेष्टापत्तिः 'याजनं योनिसम्बन्धं तथैवाध्यापनं द्विजः। कृत्वा सद्यः पतेज्जानन् सह भोजनमेव च' एवमादिवचनैर्गुरुतरयाजनादीनां सद्यःपातहेतुत्वस्य प्रतिपादितत्वात्। न च एतेषां वचनानां तदितरयुगविषयकत्वमिति वाच्यं, एकेन वचनेन सर्वेषां सङ्कोचकल्पनस्य अन्याय्यत्वात् विषमशिष्टदोषाच्च।

अत्र कश्चित् एवशब्दोऽत्र सकृदर्थद्योतकः, तेन कृते सम्भाषणरूपलघुतरसंसर्गात् सकृत्कृतात् पततीत्यर्थः सिध्यति। एवमन्यत्रापि तदेवशब्दस्यानुषङ्गेन तद्रूपार्थः प्रत्येतव्यः। अथवा एवशब्दस्य व्यत्ययेनान्वयस्तेन कृतयुग एव सम्भाषणात् पततीत्यर्थः। न च सम्भाषणादीनां लघुतरसंसर्गाणां चिरतरकालाभ्यस्तानां पातित्यजनकत्वस्य प्रायश्चित्तविवेककृद्भिर्युगसाधारणविषयकतया व्यवस्थापितत्वात् एवशब्दस्य व्यत्ययेनान्वयेऽपि कथमुपपत्तिरिति वाच्यम्, सम्भाषणात् पततीत्युक्त्या सद्यः पातः एवावगम्यते अभ्यासस्य अशब्दार्थत्वात्। एवमन्यत्राप्यूह्यम्। "वधादिकर्मणा" इति माधवाचार्यः। तस्यायमभिप्रायः—कर्त्तारं त्यजेदित्यनेनैव पापिसंसर्गमात्रवर्जनस्य प्राप्ते कर्मणा इत्यस्य संसर्गपरत्वे पौनरुक्तं भवेत्। अत एव माधवाचार्येण पूर्ववचनव्याख्यावसरे कर्तृत्यागस्तेन सह सम्भाषणादिवर्जनमिति व्याख्यातम्। स्वमतमाह वस्तुतस्त्विति। अत्रेदं तात्पर्य—कृते सम्भाषणादेवेति वचनस्य पादत्रयेणैव संसर्गस्य उक्तत्वात् कर्मणेत्यस्य संसर्गपरत्वमेव युक्तम्। न च पूर्ववचनेनैव कर्तृसंसर्गस्य निषिद्धत्वेऽपि निषेधावगमात् पौनरुक्तमिति वाच्यं पूर्ववचनेन कर्तृसंसर्गस्य निषिद्धत्वेऽपि सद्यःपातहेतुत्वस्य अनवगतत्वात्। सामान्यविधिरस्पष्टः संह्रियेत विशेषतः, आचार्याणामियं शैली यत् सामान्येन अभिधाय विशेषेण विवृणोति इत्येताभ्यां विशेषार्थं पुनरभिधानं न दोषमावहतीति मीमांसकसिद्धान्ताच्च। "सम्भाषणे"ति सत्ययुगादिनिषिद्धेत्यादिः पूरणीयः। अत्र कर्मणेत्यस्य विवरणे गुरुतरसंसर्गेति पाठः, न तु गुरुसंसर्गेति, तेषामष्टकादियज्ञयाजनादिरूपतया सद्यपातजनकत्वाभावात्, सद्यःपातहेतुसंसर्गाणामेवानेनाभिधानात्। "अत एव" गुरुतरसंसर्गेतरसंसर्गाणां शास्त्रीयचिरतरकालाभ्यस्तत्वेनैव पातित्वजनकत्वादेव। "परदाराभिगामिन"मित्यपपाठः एतैरित्यनेनान्वयानुपपत्तेः। "समायोगं" संसर्गम्। "दिने दिने" इति संसर्गस्याविच्छिन्नत्वं ज्ञापयति। एष च संसर्गः अष्टकादियज्ञयाजनादिरूपोऽज्ञानकृतः। औरसः क्षेत्रजश्चैव इत्युक्तद्वादशविधपुत्राणां मध्ये 'दत्तौरसेतरेषान्तु' इत्यादिना कलौ दत्तकपुत्रौरसपुत्रभिन्नानां पुत्रत्वं नास्तीत्यनेन दत्तकौरसयोः कलौ पुत्रीकरणस्य अवगतत्वात्तदर्थं दत्तकौरसौ वक्तुमवतारयति "याज्ञवल्क्यटीकाया"मित्यादि।

'अनेकधा'इति। अस्यार्थः, पुरातनैः प्राचीनैः, ऋषिभिः यैरुपायै अनेकधा अनेकप्रकाराः पुत्राः कृताः, अधुना कलौ इदन्तनैराधुनिकैर्जनैस्ते पुत्राः कर्तुं न शक्यन्ते, यतस्तैः शक्तिहीनैः। दत्तकपुत्रं निरूपयति याज्ञवल्क्य इति। 'मातापितरौ प्रभवत' इति वशिष्ठस्मरणात्। 'दद्यान्मातापिता वे'ति माता पत्यनुज्ञया यं पुत्रं दद्यात् परिग्रहीतुः स दत्तको भवेदित्यर्थः। तत्परिग्रहप्रकारं दत्तकविधिमित्यर्थः। 'शुक्रशोणिते'ति शुक्रशोणिताभ्यां सम्भव उत्पत्तिर्यस्येति विग्रहः। ननु गर्भोपनिषदि शरीरस्य षट्कोषजन्यत्वमुक्तं यथैतत् षाट्कौषिकं शरीरं त्रीन् पितृतः त्रीन् मातृतः अस्थिस्नायुमज्जानः पितृतः, त्वङ्मांसरुधिराणि मातृत इति। तत् कथं केवलशुक्रशोणितजन्यत्वमुक्तं, सत्यं अस्थ्यादीनां शुक्रशोणितपरिणामरूपत्वात् शुक्रशोणित इत्युक्तम्। 'शुक्रशोणितसम्भव' इति मातापित्रोर्निमित्तत्वे हेतुः, तथाच पुत्रशरीरं प्रति मातापित्रोर्निमित्तत्वं शुक्रशोणितद्वारेण इति मन्तव्यम्। 'नत्वेक'मिति, एकं मुख्यं श्राद्धाधिकारित्वेन प्रतीयमानम्। स हि सन्तानाय पूर्वेषामिति हेतुवन्निगदस्वरसात्। अनेनैव च नञः प्रसज्यवाचित्वं स्पष्टमवगम्यते। अत्र च जनकग्रहीत्रोरुभयोरेव आवयोरयं पुत्र इत्यभिसन्धानेन एकपुत्रस्य दानं शास्त्रसिद्धमेव, एकपुत्रदाननिषेधस्तु तदभिसन्धानं विना ज्ञेयः। नाद्यं पुत्रं दद्यादिति दत्तकदीधितेरपि तथैव तात्पर्यं। न प्रतिगृह्णीयात् इतिवाक्यं प्रतिग्रहकर्तुर्दोषमावेदयति। निवेशनस्य गृहस्य। बन्धूनामाह्वानं दृष्टार्थम्। एवं राजनिवेदनमपि। अत्रेति वशिष्ठवचने। एतयोः स्त्रीशूद्रयोः। होमाधिकारः पश्चादिति, जुहूयात् हावयेद्वेति गोभिलसूत्रादिना। एतेन स्त्रीशूद्रयोर्होमानधिकारात् दत्तकपुत्रकरणे अनधिकार इति मिश्रोक्तं

हेयम्। प्रपञ्चः होमाधिकारविस्तारः, पचि विस्ताररचने, इत्यस्माद्धातोर्निष्पन्नत्वात्। गोत्ररिक्थानुग इति, गोत्ररिक्थे अनुगच्छति इत्यर्थः। स्वधानिवर्तने हेतुरयम्। तथाहि यद्गोत्ररिक्थभागी यः स तत्पिण्डदो भवति। अतो ददतो जनकस्य स्वधा श्राद्धीयं व्यपैति निवर्तते, तत्पुत्रकर्तृकश्राद्धनिवृत्त्येति भावः। एतेन पूर्वं स्वधाशब्दः पितृभक्ष्यार्थक इत्यभिधाय परत्र स्वधाशब्दप्रतिपाद्यश्राद्धेति यदुक्तं तन्न दोषाय, स्वधाशब्दस्य श्राद्धीयत्वप्रतिपादनेनैव श्राद्धस्यापि प्रतिपादकत्वात्। पितुर्गोत्रेणेत्यादि वचनत्रयं कुवेरेण अमूलमुक्त्वा समूलत्वेऽपि इत्यादिना समूलत्वमङ्गीकृतं, सम्प्रति तदीयव्याखानतात्पर्यमवलम्ब्य व्याख्यायते पितुर्जनकस्य गोत्रेण आचूडान्तं संस्कृतोऽपि पुत्रो न पुत्रः न तन्मात्रपुत्रः, अत्र हेतुः यतोऽन्यतश्च अन्यस्यापि पुत्रतां याति। एतेनोभयोर्जनकग्रहीत्रोः पुत्रत्वं लब्धं तच्च जनकप्रतिग्रहीत्रोरुभयोः पुत्राभिसन्धाने सति नान्यथा। चूडाद्या इति अतद्गुणसंविज्ञानबहुव्रीहिना द्विजातीनामुपनयनलाभः। शूद्रस्य तु विवाह इति चन्द्रिका। नैतत् प्राचीनसम्मतमिति; प्राचीनैरकृतचूडस्यैव दत्तकपुत्रत्वमभ्युपेयते। तथाहि आचूडान्तमिति चूडा अन्ते यस्य संस्कारस्य इति विग्रहः तत आङः सम्बन्धः, एतेन चूडाद्या इत्यत्र तद्गुणसंविज्ञानबहुव्रीहिरेव। एतेन ग्रहीतृगोत्रेण चूडाप्रभृतिसंस्कारकरणे ग्रहीतुः पुत्रत्वं सिद्धमेव वचनद्वयोरर्थः। ऊर्ध्वन्तु पञ्चमादित्यादिकं पञ्चमाद्वर्षात् परं दत्तकादिकरणस्य अप्राशस्त्यमावेदयति, न तु पञ्चमात् परं ग्रहणनिषेधकम्। अत एव अद्विवर्षं द्विवर्षं वा पञ्चवर्षमथापि वा। अतः परं प्रकुर्वीत पूर्वं पूर्वं प्रशस्यते॥ इति कृत्यचिन्तामणिधृतवचनादिति वाचस्पतिमिश्राः।

'गृहीत्वे'ति, अथात्र त्वाबलेनैव ग्रहणान्तरं पुत्रेष्टिर्लभ्यते किमिह प्रथममित्युपादीयते, वशिष्ठेन होमानन्तरं प्रतिग्रहस्योक्तत्वात् तेन सह विरोधोऽपि; अत्र कश्चित् गृही जनस्तु प्रथमं पुत्रेष्टिं चरेत् तदनन्तरमापञ्चवर्षीयं गृह्णीयात् इत्यर्थमाह। वस्तुतः व्याहृतिभिर्हुत्वा इत्यनेन गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमञ्चरेत् इत्यस्य न कोऽपि विरोधः, नहि व्याहृतिहोम एव पुत्रेष्टिशब्देनाभिधीयते इति। अपि तु व्याहृतिहोमादन्यो यागविशेष एव, तथाच—प्रथमपदसार्थक्यायैवं व्याख्यायते प्रथमं पुत्रेष्टिं कुर्यात् अनन्तरमापञ्चवर्षीयं बालं गृहीत्वा प्रयोगविध्युक्तं कर्म कुर्यात्। दत्तकपुत्रं निर्वाच्य औरसपुत्रं विवेचयति औरसमाहेति। अत्र स्वयंपदस्य आदौ संस्कारे तत उत्पादनेऽन्वयः। असवर्णायां स्वयमुत्पादितस्य औरसत्वेऽपि सवर्णोत्पादितस्य प्राधान्यज्ञापनाय सवर्णायामित्युक्तम्। 'प्रकृत'मिति, प्रागुक्तसुमन्तुवचने मातृसगोत्राविवाहे चान्द्रायणव्रतरूपप्रायश्चित्तमुक्तं तेन मातामहसगोत्रा अविवाह्या इति प्रकृतं तमनुसरामः—उद्देश्यं सङ्कोच्य प्रतिपादयामः। शूद्रस्य पितृसमानोदकाप्यविवाह्या एव अन्यथा मातामहपक्षे समानोदका वर्जनीया पितृसगोत्रा तु विवाह्या इत्येवं बिषमशिष्टं स्यादिति भाव्यम्। १५।

मातामहसमानोदकायाः कन्याया विवाहे वर्जनीयत्वस्य "सगोत्रां मातुरप्येके नेच्छन्त्युद्वाहकर्मणी"त्यनेन व्यासेनैव प्रतिपादितत्वात्, "मातुः सपिण्डा यत्नेन" इत्यादिना पुनर्व्यासस्य सपिण्डावर्जनं पुनरुक्तिदोषकवलितमेव स्यात् इत्याह 'यत्त्वि'ति। समाधत्ते 'तदि'ति। 'अतिशये'ति मातामहसमानोदककन्याविवाहदोषापेक्षया मातामहसपिण्डाविवाहदोषस्याधिक्यमिति भावः। अतएव स्पष्टस्य तु विधेर्नान्यैरुपसंहारसम्भव इति वचनेन सामान्यनिषेधे विशेषनिषेधोऽधिकदोषार्थ इत्युक्तं स्मार्तपादैः।

'मातुर्यन्नाम गुह्यं स्यादिति'। मत्स्यसूक्ते, पितुर्ज्येष्ठःपितुश्चैव पितुश्चापि कनीयसः। नामान्वितो वरो यस्तु पितृनामा स उच्यते॥ एतद्वचनं पूर्वमभिधाय मातुर्यन्नामगुह्यमित्यादिवचनमभिहितम्। एतद्विषये एव वृद्धमनुरपि, मातृनाम्नी च या कन्या पितृनामा च यो वरः। तयोर्विवाहो

नैव स्यान्मनुराह प्रजापतिः॥ 'सपत्नीमातुर्यन्नाम तन्निषिद्धमिहोच्यते' इत्यर्धमधिकं परिभाष्य 'प्रमादाद् यदि गृह्णीयात्' इत्यनन्तरं 'प्रायश्चित्तं समाचरेत्' इत्यत्र प्राजापत्यं समाचरेत् इति लिखितम्। ततश्चान्द्रायणं कृत्वा इत्यत्र चान्द्रायणं व्रतं कृत्वा इति पाठविशेषः। 'तां कन्यां परिवर्ज्जयेदि'त्यनन्तरं प्रसिद्धनाम्नीग्रहणे त्यजेत्तां नावलोकयेत्, ऋषिचान्द्रायणान्ते तु गुप्तनाम्न्यामयं विधिरिति लिखितम्। ततश्च प्राजापत्यं सपत्नीमातृनाम्नीग्रहणविषयम्। मातुर्नाम च गुह्य-प्रसिद्धभेदाद्द्विविधं। तत्र प्रसिद्धनाम्नीग्रहणे चान्द्रायणं व्रतम्। गुप्तनाम्नीग्रहणे ऋषिचान्द्रायणम्, एतत्प्रायश्चित्तानन्तरं तत्परित्यागः तदनवलोकनञ्च।

मातुर्यन्नाम गुह्यं स्यादिति वचने गुह्यं सांस्कारिकं, सुप्रसिद्धमाह्वानार्थं लोकैः कल्पितम्। प्रायश्चित्तविशेषज्ञापनार्थं एतद्द्वयोपादानं, तच्च पूर्वं विततम्। अथ मातृनाम्नीकन्याविवाहस्य प्रायश्चित्तश्रुत्या निषेधात् प्रायश्चित्तानन्तरं परित्यागोपदेशाच्च नामान्तरकरणविधिरप्राप्तविषयतया विफल एव इत्याह 'यत्वि'ति। 'मातृनाम्नी'ति। मातृनाम्नी या कन्या सा विवाहे यदि सत्कुलजा स्यात् तदापि दोषकारिणी। अथवा मातृनाम्नी या सा यदि विवाहे विवाहविषयिनी तदाकुलजा कुलक्षयकारिणी। क्षै, जै, सै, जये इत्यस्माद्धातोर्निष्पन्नत्वात्। यद्वा मातृनाम्नी या सा यदि विवाह-विषयिणी तदा कुलजा स्वकुलजा इव सपिण्डा इव दोषकारिणी, अतो विप्रैर्नामान्तरं कार्यमित्यर्थः। वाग्दानोत्तरज्ञाने बोध्यमिति। एतेन वाग्दानात् पूर्वं मातृनाम्नीं नोद्वहेत् इत्यस्य निषेधविधेर्विषयत्व-मित्यवगमते। अथ नामान्तरकरणरूपप्रतिप्रसवस्य वाग्दानोत्तरज्ञानविषयत्वे किं बीजमिति चेत् अत्र ब्रूमः "उक्तानि प्रतिसिद्धानि पुनःसम्भावितानि च। सापेक्षनिरपेक्षानि मीमांस्यानीह कोविदै"रित्यनेन प्रतिप्रसवस्यापद्विषयतया व्यवस्थाप्यत्वाभिधानात्, "आपत्स्वपि च कष्टासु वर्तमानेन देहिना, अदेयान्या-हुराचार्याः यच्चान्यस्मै प्रतिश्रुत"मित्यनेन पित्रादिकृतवाग्दानायाः कन्यायाः उद्देश्यान्तरायादेयत्वाव-गमात्,' 'प्रतिगृह्य च यः कन्यामदुष्टामुत्सृजेद्वरः, विनेयः सोऽर्थदण्डेन कन्यान्तमेव चोद्वहेत्" इत्यनेन वरस्य परित्यागायोगाच्च, तस्यामेव आपदि नामान्तरकरणरूपप्रतिप्रसवो युक्तः शास्त्रमूलत्वात्। 'अन्यथे'ति प्रतिप्रसववचनस्य वाग्दानोत्तरज्ञानपरत्वं विना। 'निषधे'ति प्रायश्चित्तविध्यनुमित-निषेधेत्यर्थः। 'वैयर्थ्यापत्ते'रिति। ननु कथं निषेधवैयर्थ्यं प्रायश्चित्तमेव प्रयोजनमस्ति, निषेधं विना प्रायश्चित्तानुपपत्तेः। अत्रोच्यते निषिद्धाचरणजन्यपापमेव प्रायश्चित्तप्रयोजकं न तु निषेध-विधिस्तस्य तु आस्तिकपुरुषस्य निषिध्यमानकर्मणो निवृत्तिरेव प्रयोजनं, विधिर्यथा विधेये कर्मणि पुरुषं प्रवर्तयति एवं निषेधोऽपि निषिध्यमानकर्मणः पुरुषं निवर्तयति। अतः पुरुषनिवृत्तिजनकत्वेन निषेधविधेः साफल्यम्। कदाचिन्निवृत्तेरजनकत्वेऽपि निषिध्यमानानुष्ठानजन्यप्रायश्चित्तप्रयोजकत्वेन तज्ज्ञेयम्। तदभावेऽपि नरकप्रयोजकत्वेनापि सार्थक्यम्। परन्तु नञन्वितलिङो निवर्तनार्थकतया निवर्तनां विना निषेधत्वमेव न स्यात्। अतः एकत्रापि निवृत्तिजनकत्वं प्रदर्शनीयम्। तथाहि कलञ्जादिभक्षणनिषेध आस्तिकपुरुषस्य निवृत्तिमुत्पादयन् फलवान् भवति दृष्टात् सुखात् अधिकं दुःखमायत्यामिति विद्वांसं विभ्यतमास्तिकं पुरुषं शक्नोति रागतः प्रवृत्तेर्वारयितुं बलीयान् शास्त्रप्रतिषेध" इत्युक्तेः। एवं सति विवाहात् परतो निषेधविधेस्तथाविधसाफल्याभावः। अतो विवाहात् पूर्वमेव साफल्यं वाच्यम्। तथा सति नामान्तरकरणविधेरप्राप्तविषयत्वं स्यादिति वाग्दानात् पूर्वं निषेधविधेश्चरितार्थत्वं वाग्दानात् परं नामान्तरकरणविधेः प्रतिप्रसवस्य विषयत्वमिति भाव्यम्। १६॥

'त्रिविवाहमिति'। ननु विवाहशब्दस्य घञलौ पुंसि विज्ञेयौ इति प्राचीनस्वरसात् घञ-न्तत्वेन पुंस्त्वेन निर्देशो युक्तः, न नपुंसकत्वेन, सत्यं, त्रयाणां विवाहानां समाहारः, इति समाहारत्वात्

नपुंसकत्वेन निर्देशो नानुपपन्न इति। अथात्र समाहारत्वेऽपि संख्यापूर्वककर्मधारयतया पञ्चपुलीत्यादिवत् न कथमीप्रत्ययः, द्विगुसमासस्य नदादित्वस्वीकारात्, अत एव वृद्धाः स्मरन्ति, "अपात्रादिरदन्तोऽयं स्त्र्यादन्तो वा द्विगुस्तथा। अनन्तश्च समाहारो नदादिषु निगद्यते"। वाढं, आर्षत्वान्न दोषः इति। कश्चित्तु फलबलतः पात्रादिगणनिर्दिष्टोऽयमित्याह।

नच तथापि एकवचनान्तत्वेन निर्देशात् समाहारोऽवश्यमङ्गीकार्यः समाहारस्य च एकक्षणावच्छेदेनैककालवृत्तित्वस्वरूपत्वात् विलक्षणज्ञानात्मकानां विवाहानाञ्च क्षणिकत्वेन अर्थात् तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वेन यौगपद्यासम्भवादसम्भव इति वाच्यं, एतदनुपपत्त्या विवाहपदस्य विवाहजन्यसंस्कारवतीषु स्त्रीषूपलक्षकत्वात्। तथाच तासां द्रव्यतया समाहारः सङ्गच्छते इति केचित्। एतन्मूलकवचनञ्च ब्रह्मवैवर्तप्रकृतिखण्डीयं यथा—

तिस्रो भार्यास्त्रिशालाश्च त्रयो भृत्याश्च बान्धवाः।
ध्रुवं वेदविरुद्धाश्च न ह्येते मङ्गलप्रदाः॥

'न करोति चतुर्थक'मिति। येन त्रिविवाहं कृतं स यदि चतुर्थकं न करोति, चतुर्थविवाहविषयककृत्यत्यन्ताभाववान्। सप्तकुलानि पातयेत् (निरयभागीनि कुर्यात्)। भ्रूणहत्याव्रतञ्च चरेदित्यर्थः। अत्र भ्रूणोऽविज्ञातगर्भः तद्वधप्रायश्चित्तञ्च यथा मनुः "हत्वा गर्भमविज्ञातमेतदेव व्रतञ्चरेत्"। एतद्व्रतं ब्रह्महन्याव्रतं तथाच ज्ञानतोऽविज्ञातब्राह्मणगर्भवधे द्वादशवार्षिकं क्षत्रियगर्भवधे त्रैवार्षिकं, वैश्यगर्भवधे सार्धवार्षिकं, शूद्रगर्भवधे नवममासिकमिति। अथ सप्तकुलपतनं प्रति किं कारणं, चतुर्थविवाहविषयककृतेरत्यन्ताभावश्चेत् त्रिविवाहानन्तरं चतुर्थं विवाहं चिकीर्षोः कृतचतुर्थविवाहस्यापि पतनमापद्येत चतुर्थविवाहविषयककृतेरत्यन्ताभावात्। अत्र कश्चित्, अत्यन्ताभावस्य त्रितयप्रतियोगिकत्वमितिमतमवलम्ब्य एतदुक्तम्। तथाच त्रिविवाहात् परतः न सप्तकुलपतनं चतुर्थविवाहकृतेः प्रागभावसत्त्वात्, नापि चतुर्थविवाहात् परं तत्र चतुर्थविवाहकृतेः ध्वंसस्य सत्त्वात्। वस्तुतः त्रिविवाहोत्तरतच्छरीरावच्छिन्नयावत्कालावच्छेदेन चतुर्थविवाहकृतेरत्यन्ताभाव एव सप्तकुलपतनं प्रति कारणं नातः कुत्रापि दोषः, नच मतविशेषावलम्बनम्।

कश्चित्तु चतुर्थविवाहप्रागभावाभावविशिष्टत्रित्वपर्याप्त्यवच्छिन्नविवाहत्वेन सप्तकुलनरकोत्पादकत्वं चतुर्थविवाहत्वेन प्रतिबन्धकत्वञ्चाह, तन्मन्दं प्रतिबन्धकताकल्पनागौरवात्।

एतद्वर्तमानस्त्रीत्रिकपरमिति वदन्ति। नन्वत्र वदन्तीत्यनेन कोऽस्वरसो व्यज्यते विवाहानां क्षणिकानां यौगपद्यासम्भवेन समाहाराभावात् विवाहपदस्य विवाहितस्त्रीषु लक्षणा, तन्मूलकवचनञ्च पूर्वमेव प्रदर्शितमिति, सत्यमत्र ब्रूमः। विवाहपदस्य विवाहजन्यसंस्कारे लक्षणापेक्षया विवाहजन्यसंस्कारयुक्तस्त्रीत्वेन लक्षणा लक्ष्यतावच्छेदकगौरवेण पराहता एतद्गौरवमेवास्वरसबीजमिति। विवाहपदस्य विवाहितस्त्रीपरत्वे कृतमित्यन्वयानुपपत्तिरपि। 'अत्रे'ति विवाहविषये। 'योग्यता'मिति। योग्यताच बन्धुसत्त्वे तन्मातरि तन्मातामहे यत्संख्यकत्वं तदभावेऽपि तत्संख्यकत्वरूपा। 'अन्यथे'ति। योग्यतावलम्बनं विना इत्यर्थः। स्वोक्तदार्ढ्याय प्राचीनस्वरसं दर्शयति 'एष एवार्थ' इति, योग्यतावलम्बनेन पितृमातामहपक्षे मातृमातामहपक्षे च सप्तमपञ्चमान्तर्गतानां कन्यानां विवाहभावरूपः। याज्ञवल्क्यटीका दीपकलिकाख्या। एतेने'त्यादि 'न विवाह' इत्यन्तस्तु टीकासन्दर्भः। १७।

'एवेञ्चे'ति, पितृबन्धुमातृबन्धुविरहेऽपि तद्योग्यतावलम्बनेन सप्तमीपञ्चमीपर्यन्तायाः कन्यायाः परिहारे च। 'कन्यान्तरसत्त्वे'इति। पितुर्मातृभिन्ना या पितृमातामहकन्या

पितृमातृस्वसेति यावत्, पुत्ररहितायास्तस्या विद्यमानत्वे। एवं मातुर्मातृभिन्ना या मातामहकन्या मातुर्मातृस्वसेति यावत्। पुत्ररहितायास्तस्या विद्यमानत्वे च इत्यर्थः। 'अत्रे'ति **विवाहविषये**, 'तस्य' वरस्य। '**गणना**यामप्रति**योगी**त्वा'दिति। अनेन हेतुनिर्देशेन यो यः सन्तानगणनप्रतियोगी स त्रिगोत्रगणनप्रतियोगीति नियमः सिध्यति। नन्वस्मिन् नियमे किं मानमिति चेत्, उच्यते 'सन्निकर्षेऽपि कर्तव्यं त्रिगोत्रात् परतो यदि' इतिवचनस्थसन्निकर्ष-पदस्य सप्तमादिसन्तानाभ्यन्तरपरत्वस्यावश्यं वक्तव्यत्वात्, सप्तमादिसन्तानगणनायाः प्रति-योग्याकाङ्क्षायां सन्तानो भिद्यते यस्मादित्यनेन सन्तानभेदकप्रतियोगिकत्वावधारणात् त्रिगोत्र-गणनायामपि 'एकत्र दृष्टः शास्त्रार्थो बाधकमन्तरेणान्यत्रापि कल्प्यते' इति न्यायात् '**बहू**नामेकधर्मानामेकस्यापि यदुच्यते' इति **बौ**धायनोक्तेश्च तथेति भाव्य**म्**। एवं नियमे सति **ब**न्धुमातामहादिसन्तानविवाहप्रतिप्रसवे **ब**न्ध्वपेक्षया न त्रिगोत्रगणनमिति सिध्यति। **अथै**वं कथं च**तुष्टयाभिधानं सन्तानगणनप्र**तियोगिनामन्येषामपि सत्त्वात् इति सत्यं वरगोत्रापेक्षानिरासार्थमेव तत्कथनं न तु नियमार्थ**म्**। तदेव शूलपाण्युक्तमेव। 'मर्यादि'त्यादि। पित्रादिगोत्रेभ्यः त्रिगोत्रात् परतः कन्यामुद्वहेदिति विधौ गोत्रपदोत्तरपञ्चम्या मर्यादाभिविध्यर्थसन्देहे इत्यर्थः। मर्यादा सीमा। यत्पदोत्तरमर्यादार्थकपदं तदर्थसम्**ब**न्धराहित्यं स्वार्थे **बो**धयति। अभिविधिश्च अभिव्याप्तिः अर्थात् अभिविध्यर्थकं यत्पदं यत्पदोत्तरं श्रूयमानं स्वार्थे तत्पदार्थसम्**ब**न्धं बोधयति। एवञ्चात्र पञ्चम्या मर्यादार्थकत्वे त्रिगोत्रगणने पित्रादिगोत्रानामवधित्वसम्**ब**न्धो व्यावर्त्यते, अतः पित्रादिगोत्रस्य न कार्यान्वितत्वमर्थात् पित्रादिगोत्रचतुष्टयेभ्यस्त्रिगोत्रात् परतो विवाहविषयकं कार्यमिति विध्यर्थबोधे त्रिगोत्रे पित्रादिगोत्राणां स्वावधित्वसम्**ब**न्धविरहेण न कार्यान्वितत्वं स्यादिति, अभिविधौ च न तथा सम्**ब**न्धविरहः। यद्यपि मर्यादापक्षेऽपि तादृशसम्**ब**न्धविरहद्वारा कार्यान्वितत्वमक्षुण्णमेव प्रतिभाति, तथापि अभिविधौ यादृशपरम्परासम्**ब**न्धेन कार्यान्वितत्वं मर्यादायां न तथेति।

'त्रिगोत्रान्तरिता च या' इति वृहन्मनुवचने त्रिगोत्रान्तरितत्वं त्रित्वपर्याप्त्यवच्छिन्नगोत्र-सम्**ब**न्धराहित्यम्। एवञ्च यत्रैकं गोत्रं वारद्वयं निपतति तत्र गोत्रद्वयस्यैकत्वेऽपि त्रिगोत्रान्तरितत्व-त्वमव्याहतमेवेति। कश्चित्तु परस्परभिन्नानामेव त्रिगोत्राणामन्यतमसम्**ब**न्धराहित्यमेव त्रिगोत्रा-न्तरितत्वमित्याह। मैथिलास्तु "नोद्वाहय विदुषां कुले च नियतं **गो**त्रत्रयान्तापि चेदिति" कारिकां स्मरन्तो **ब्रा**ह्मणस्य त्रिगोत्रान्तरितोद्वाहं नेच्छन्ति। अत्र मूलं चिन्त्यम ॥ १८ ॥

अयं क्रमः वक्ष्यमाणक्रमः। तमाह 'पूर्वत्र' इत्यादि, पूर्वत्र ऊर्ध्वे। 'यतो यतो' यस्मात् यस्मात् पुरुषात् 'सन्तानभेदः'सन्तानपर**म्प**रा। परत्र, अधः। एवमुक्तप्रकारेणेति। अत्रैवंशब्दस्य व्यवहितेन पञ्चमादित्यनेनान्वयः। उक्तप्रकारेण पितृपक्षे मातृपक्षे च यदुक्तं तदुक्तप्रकारेण इत्यर्थः। पितृ**ब**न्धुष्विति, पञ्चम्यर्थे सप्तमी पितृ**ब**न्धुभ्य इत्यर्थः।

तथाच पितृ**ब**न्धुभ्यः सप्तमादूर्ध्वमेव विवाहयत्वं मातृ**ब**न्धुतः पञ्चमादेवं **ऊ**र्ध्वं विवाहयत्वमित्यर्थः। 'उभयत्रे'ति, पितृपक्षे मातामहपक्षे च। गणेत्, गणयेदित्यर्थः। ननु सप्तमगणनायां वरस्या-प्रतियोगित्वात् 'वरं यावदि'ति कथं सङ्गच्छते, इत्याह 'वर'मित्यादि। सुम**न्तू**क्तेति। मातृपितृ-सम्**ब**न्धादासप्तमादित्यादिसुमन्तुवच**नो**क्तेरित्यर्थः। 'सप्तमादि' इत्यादिना पञ्चमपरिग्रहः। 'सप्तमपञ्चमोर्ध्वत्व'मिति। यस्याः कन्याया विवा**हो** भवेत् तस्यां सप्तमपञ्चमसन्तानात् परजातत्वं **ज्ञे**यमिति। **ब**न्धुस्थले यादृशी गणना विश्वरूपसमुच्चये प्रतिपादिता, सपिण्डस्थलेऽप्येवंरूपा गणना **इत्याह 'एवं यस्ये'ति।** 'तस्य' जनस्य, '**तद्गणनायां**' सा**पिण्ड्यगणनायां, अन्तर्भावः** स**पिण्डत्वे**मेति

भावः। 'यस्य सापिण्ड्यं विविच्यते' इत्यादिः दातृत्वभोक्तृत्वसम्बन्धाभावादित्यन्तः सन्दर्भः मुख्यसापिण्ड्याभिप्रायेणाभिहितः। वैवाहिकसापिण्ड्येऽपि तथा कल्पनीयम्। वैवाहिकसापिण्ड्यञ्च सप्तमान्तर्गतत्वरूपं पितृपक्षे मातामहपक्षे पञ्चमान्तर्गतत्वरूपम्। 'अतएव' पिण्डलेपसम्बन्धस्य मुख्यसापिण्ड्यघटकत्वादेव, द्वैतनिर्णयो ग्रन्थः वाचस्पतिमिश्रसङ्कलितः, तस्मिन् ग्रन्थे इत्यर्थः। वीजिनं वंशप्रवर्तकं पितृमातामहादिकं। 'उक्तं' मिश्रेण इति शेषः। सम्बन्धबीजीभूतानां सम्बन्धघटकानां सम्बन्धबीजित्वायोगात् सम्बन्धघटकत्वाभावादित्वर्थः। १९॥

'पुंस्त्वस्ये'ति। आसप्तमात् पञ्चमादिति शब्दयोः पुंस्त्वस्य इत्यर्थः। 'विधेयविशेषणत्वेने'ति, अथात्र कीदृशो विधिः यत्प्रतिपाद्यविशेषणत्वेन पुंस्त्वं विवक्षितमुच्यते इति चेत्, उच्यते नञः प्रसज्यपर्युदासपरतया पितृत आसप्तमात् सप्तमीं नोद्वहेद्, एवं पितृत आसप्तमात् सप्तमीतरामुद्वहेत्। एवं द्विविध एव विधिरन्यत्रापि ज्ञेयः। उक्तविधिजन्यबोधे पुंस्त्वमपि सप्तमादिगतं विधेयस्य विवाहस्य तदभावस्य वा परम्परया विशेषणम्। 'विवक्षितत्वा'दिति। यथा पशुना यजेत इत्यादौ विधेयस्य यागस्य प्रमाणान्तराप्राप्ततया विशेषणस्य पश्वेकत्वस्यापि तथात्वेन विवक्षा निर्बाधमवधारिता तथात्रापि। अथ पुंस्त्वस्य विवक्षितत्वे बन्धूवधिकोर्ध्वतनसप्तमाः पुमांस एवेति विज्ञायते, तत्कथं तातृशसप्तमान्तर्गतत्वेन बन्धुत्वसम्बन्धघटकतया बन्धुमातृणां परिग्रह इति चेदुच्यते स्त्रीलिङ्गं पुंलिङ्गं नपुंसकलिङ्गमित्यादि त्रिधा नाम भिद्यते। तत्र स्त्रीलिङ्गत्वादिकं न स्त्रीत्वादिवाचकत्वं तटस्तटी तटमित्यादौ प्रकृत्यर्थतटादेर्योन्यादिमत्त्वादिरूपस्त्रीत्वाद्यन्वयायोग्यत्वापत्तेः, परन्तु स्त्रीलिङ्गत्वादिना परिभाषितत्वमात्रं, परिभाषायाः प्रयोजनञ्चेह पदसंस्कारः (पदसाधुता) सोऽपि तट इत्यादौ पुंस्तेन सुवादिसद्भावः तटीत्यादौ स्त्रीत्वेन ङीवादिप्रत्ययः। तटमित्यादौ क्लीवत्वेन सुवादेर्लुगादिरिति। दुन्दुभिः सुवर्णमित्यादौ तु शब्दसंस्कारस्यैव फलमर्थविशेषस्य लाभः। नह्ययं दुन्दुभिरिदं सुवर्णमित्यादितोऽक्षस्य अशीतिरत्तिकापरिमितसुवर्णादिश्च बोधः। अर्थसाधुत्वं शब्दसाधुत्वञ्च द्विधा व्यवस्थितं परिभाषाफलम्। तेनात्र सर्वथा अर्थसाधुत्वस्यासम्भवाद् विधेयविशषेणत्वेन यदंशे अर्थे साधुत्वस्य सम्भवस्तदंशे अर्थसाधुत्वं कुत्रचिद्बाधात् शब्दसाधुत्वमपि। अथ अर्थसाधुत्वे सम्भवति शब्दसाधुत्वान्याय्यत्वस्य दायभागकृतापि उक्तत्वात्। तत् किमिह बन्धुमातृग्रहणार्थं आसप्तमादित्यादावंशतः शब्दसाधुत्वं स्वीक्रीयते, सत्यं विषमशिष्टभयादेवेति ब्रूमः। तथाहि बन्ध्वपेक्षया सप्तमी पञ्चमी चाविवाह्या बन्धुमात्रपेक्षया नेति विषमशिष्टं वन्धुमातृणां सप्तमादिगणनापेक्षितत्वस्य मुनिसम्मतत्वात्। अतएव सुमन्तूक्तसप्तमगणने आसप्तमादित्यस्य वरमातरि शब्दसाधुत्वमङ्गीकृतमिति ध्येयम्। "तदपेक्षया" तयोरपेक्षया इत्यर्थः, तेन बन्धोस्तन्मातुश्च परिग्रह एवमन्यत्राप्यूह्यम्। सप्तमपञ्चममध्ये इति सप्तमे पञ्चमे वापि येषां वैवाहिकी क्रिया इत्यादिनिन्दया पुरुषेष्वेव अविवाह्यत्वमवगम्यते तच्चानुपपन्नमित्यत आह 'परम्पराजाताया' इति। 'अत एव' सप्तमपञ्चमान्तर्गतायाः कन्याया अविवाह्यत्वादेव २०॥

पितृपितामहादीनामिति। नन्वत्र पितामहपदमनभिधाय पित्रादीनामिति कथं नोक्तं। सत्यं, तथात्वे पित्रपेक्षयाधस्तनसप्तमतोऽपि सप्तम्यविवाह्या स्यात्, पितामहपदोपादानन्तु पित्रपेक्षयोर्ध्वतनपुरुषसंग्रहाय इति ध्येयम्। एवं मातामहप्रमातामहादीनामित्यत्रापि प्रमातामहपदस्य सार्थक्यं पूर्ववद्वेदितव्यं। 'सम्बन्धघटकाना'मिति। अत्र सम्बन्धघटकत्वनिवेशनाधस्तनानां व्यावृत्तिर्विज्ञेया। 'बन्धुतन्मात्रो'रिति। बन्धोरभावे तन्मातुश्चाभावे इत्यर्थः। 'पितृमातामहे'ति, योग्यतावलम्बनादिति तात्पर्यम्। बन्धोरभावे बन्धुस्थाने कन्यासत्वे किं तत्कन्यामातरमादाय सप्तमीपर्यन्ता वा पञ्चमीपर्यन्ता वर्जनीया, उत पितृमातामहमादाय मातृमातामहमादाय वेति सन्देहदूरीकरणार्थमाह

'एवञ्चे'ति विषमशिष्टभयेन योग्यतावलम्बने सति। 'मातामहकन्यान्तरे'ति पितुर्मातृभिन्ना या पुत्ररहितमातामहकन्या एवं मातुर्मातृभिन्ना या मातामहकन्या पुत्ररहिता तामादाय इत्यर्थः। मातुलपुत्रवन्धोरपि स्वापेक्षयेति यदुक्तं तद्बन्धुबन्धुपूर्वपुरुषाणां गोत्रैक्यादविरुद्धम्। ननु पितुर्मातुश्च मातामहकन्यान्तरसत्त्वे इत्यादि परिहाराय इत्यन्तसन्दर्भेण वन्धुमातृसन्तानस्यापि सप्तमपञ्चमपर्यन्तस्य वर्जनीयतया तस्या एव सन्तानगणना प्रतियोगित्वात् त्रिगोत्रगणनप्रतियोगित्वमायाति तच्च पूर्वत-स्त्रिगोत्रगणने अन्येषां बन्धूनां मातामहगोत्रापेक्षयेति पूर्वोक्तवाक्येन विरुध्यते इति चेन्न पूर्वतः पदस्य पुरुषाभिप्रायकत्वेन वन्धुमातुरनुपस्थापकत्वात्। अत एव बन्ध्वपेक्षया त्रिगोत्रगणनं परतः सर्वत्रेत्यत्र परतः पदस्य बन्धुतन्मात्रोः परत इति व्याख्येयं तयोर्गोत्रैक्यात् बन्ध्वपेक्षया त्रिगोत्रगणनमिति सर्वं समञ्जसं। एवञ्च वन्धुमातृदौहित्रीकन्यायाः परिणये वन्धुमातृगोत्रापेक्षया एव त्रिगोत्रगणनं कार्यं न तु वन्धुमातामहगोत्रापेक्षयेति सिद्धम्।

'परत'इति। वन्धोस्तन्मातुश्च। 'स्वापेक्षये'ति। वन्धुवन्धुपूर्वपुरुषाणां गौत्रैक्यात्। सर्वसामञ्जस्यमुपपादयितुमाहान्यथेति। सर्वविधबन्धुगोत्राणामेव त्रिगोत्रगणनावधित्वे इत्यर्थः। 'पितामहे'ति वरस्येति शेषः। 'बन्ध्वपेक्षये'ति, अत्र मध्यवर्तिगोत्रपदलोपस्तेन बन्धुगोत्रापेक्षया इत्यर्थः। एवमन्यत्रापि। 'पितामही' वरस्येतिपूरणीयम्। एवं परतोऽपि सम्बन्धिशब्दानां ससम्वन्ध्युपस्थापकत्वेन वरपदमन्वेष्यम्। मातृसपत्नी भ्रातृसन्ततिरपि इत्यत्र भ्रातृसन्ततिः साक्षात्परम्परासाधारणी, अपिशब्देन मातृसपत्नी परम्परासन्ततिरपि पञ्चमीपर्यन्ता नोद्वाह्या, यदाह यमः 'मातुः समानपतिका माता सापि प्रकीर्तिता। हित्वा पञ्चैव तस्याश्च विवाहः कैश्चिदिष्यते'॥ इति।

पुनर्वचनं प्रकारान्तरप्राप्तस्य पुनः कथनमित्यर्थः। 'सङ्करात्मके'ति सङ्करनामकेत्यर्थः। 'अधर्मकारिण्यः' वोढुरिति शेषः।

अन्यथा इत्यादिना सन्दर्भेण उक्तसुमन्तुवचनस्यान्यथा इत्यादि—एतदेवेत्यन्तस्य विवरणं रत्नाकरकृता कृतमिति। २१॥

अध्यापयितृशब्दस्य नियमपूर्वकविद्यादातरि गुरौ मुख्यत्वाद्ब्रह्मदातुर्गुरोश्चैव इत्यादिना मत्स्यसूक्तवचनैकवाक्यत्वाच्च। रत्नाकरव्याख्यानं न मनोरममित्यभिप्रायेण स्वमतमाह वस्तुतस्त्विति। 'अत एव' विद्यादातुर्गुरोः कन्याया अविवाह्यत्वादेव। 'प्रस्थितमि'ति आदिकर्मणि क्तः, तथाच त्रिदशावासं स्वर्गं प्रस्थातुं गन्तुमारब्धं वृहस्पतितनयं कचं प्रति देवयानी शुक्राचार्यकन्या इदं वक्ष्यमाणमब्रवीत्। किमिदमिति तत्राह उत्तरार्धम्। 'मन्त्रपुरस्कृतं मन्त्रोच्चारणपूर्वकं त्वं मम पाणिं गृहाणेत्युत्तरार्धार्थः। पुरा देवासुरसमरे निहता असुरा देवारिगुरोः शुक्राचार्यस्य सञ्जीवन्या विद्यया प्राप्तजीवना बलवन्तः प्रायः पराभवपदमुपलभमाना-स्त्रिदिवेशा वृहस्पतिमन्त्रणया तत्पुत्रं कचं शुक्राचार्यतः सञ्जीवनीविद्यामादातुं प्रस्थापयामासुरित्यस्ति पौराणिकी कथा। 'ब्रह्मदातु'रिति ब्रह्म वेदः, वेदस्तत्त्वं तपो ब्रह्मेत्यमरात्। 'पौनर्भवा' इति पुनर्भूशब्दात् स्वार्थेऽण्प्रत्ययात् सिद्धं पौनर्भवपदम्। तेनैतासां पुनर्भूसंज्ञा लब्धा। तथाच नारदः। 'कन्यैवाक्षतयोनिर्या पाणिहणदूषिता। पुनर्भूः प्रथमा प्रोक्ता पुनः संस्कारमर्हति'। एतेनैतासां विवाहो भवत्येव। 'कृतकौतुकमङ्गलेति'। कृतं कौतुकसूत्रेण मङ्गलं यस्याः सा तथा वद्धकौतुकसूत्रेत्यर्थः। 'उदक-'स्पर्शिता' उदकेन उदककरणकदानेन स्पर्शिता प्रतिग्राहितेत्यर्थः। स्पर्शनं प्रतिपादनमित्यमरोक्तेः। कृतकौतुकमङ्गलेत्यस्य रत्नाकरसम्मता व्याख्या स्मार्तपादैर्दर्शिता। तन्मते कृतं वद्धं कौतुकसूत्रेण

मङ्गलहेतु कङ्कणं यस्याः सा तथा। एतच्च विवाहात् पूर्वं निरीक्षणार्थं यद्दत्तं कङ्कणं हस्ते निवध्यते तदिति कश्चित्। उदकस्पर्शितेत्यत्रापि रत्नाकरव्याख्यानमेव प्रदर्शितम्। 'पाणिगृहीतिका' कृतपाणिग्रहणा। एतस्याश्च विवाहः कलौ निषिद्धः। तथाचादिपुराणे--उढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधन्तथा। कलौ पञ्च न कुर्वीत भातृजायाकमण्डलुमिति'। 'अग्निं परिगता' विवाहार्थमग्निसमीपमागता ततो दैवान्न विवाहिता सेत्यर्थः। 'पुनर्भूप्रसवे'ति। पुनः संस्कृता पुनर्भूस्तस्यां जातेत्यर्थः। बौधायनोऽपि वाग्दत्ता अग्निं परिगता सप्तमं पदं नीता भुक्ता गृहीतगर्भा प्रसूता चेति सप्तविधा पुनर्भूः तां गृहीत्वा न प्रजां न धर्मं विन्देदित्याह। ताः खल्वेता अन्यपुर्वा विवाहिताश्चेत् भर्तुः कुलं दहन्तीत्यर्थः। अत्र विधिनिषेधयोः समाधानं युगभेदादवसेयम्। 'ज्येष्ठ' इति। अत्र पुंस्त्वनिर्देशादनूढज्येष्ठभगिनीसत्त्वे कनिष्ठस्य विवाहो न दोषावह इति। कनीयान् कनिष्ठः युवाल्पयोः कण् वेत्यनेन तत्पदं सिद्धम्। अत्र सर्वत्र परिशब्दश्रुत्या एतेषु परिवेदनपापानि सूच्यन्ते। परिवेदनप्रायश्चित्तमाह शङ्खः--'परिवित्तिः परिवेत्ता च यया च परिविद्यते। व्रतं संवत्सरं कुर्याद्दातृयाजकपञ्चमाः'। व्रतञ्च यावकेन। इदञ्च कामत इति प्रायश्चित्तविवेकः। संवत्सरयावकपाने चतुर्विंशतिधेनवस्तदशक्तौ द्वासप्तति कार्षापणाः।

'बहिर्वर्णेष्वि'ति। वर्णा ब्राह्मणादयश्चत्वारस्तेषां बहिर्वहिर्भूता ये वर्णबाह्या वर्णसङ्करा इति यावत् तेष्वित्यर्थः। वर्णेषु कथं ज्येष्ठत्वं तत्राह 'चारित्रादिति सच्चरित्रादित्यर्थः। समयोः सन्तानयोः कथं ज्येष्ठत्वं तत्राह 'पूर्वजन्मतः' प्रागभूमिसम्बन्धतः। पूर्व-जन्मत इति प्रतीकं व्याकुरुते 'जन्मप्राथम्यादि'ति। निषेकप्राथम्यात् गर्भाधानप्राथम्यादित्यर्थः। 'नत्वित्यत्र हेतुरयं निषेकप्राथम्येन ज्येष्ठत्वे कुम्भपुरणन्यायेन पश्चाज्जातस्यैव ज्येष्ठत्वं स्यादिति। न चेष्टापत्तिर्जन्मपदस्याद्यक्षणसम्बन्धरूपार्थस्य शास्त्रीयत्वात् तत्रैव लोकव्यवहाराच्च। ज्जैष्ठं गुणवयःकृतमित्यस्याप्येष विषयभेदो ज्ञातव्यः।

अत एव "ये जाता येप्यजाताश्च ये च गर्भे व्यवस्थिताः" इत्यादौ जन्मपदस्य तादृशार्थवत्त्वं प्रदर्शितम्। 'यस्य जातस्ये'ति यमजयोर्मध्ये यस्य जातस्य प्रथमं मुखं पश्यन्ति स सन्तानः ज्येष्ठः तस्मिन् सन्ताने ज्येष्ठत्वं प्रतिष्ठितं पितरः प्रतिष्ठिता इति। तेन ज्येष्ठपुत्रेण पितुर्जन्मतः प्रभृति पितामहप्रपितामहयोरपि श्राद्धादिना परलोकोचितमहोपकारनिष्पादनेन प्राप्तपुत्रादिप्रयोजनाः। 'निष्ठानिर्देशा'दिति निरूपसर्गात् विशधातोरतीतार्थकक्तप्रत्ययनिर्देशादित्यर्थः। 'एकदापी'ति कनिष्ठविवाहाधिकरणकालवृत्तिध्वंसप्रतियोगिनि काले अर्थात् कनिष्ठविवाहात् प्राक्काले ज्येष्ठस्य विवाहाभावे कनिष्ठविवाहस्य परिवेदनदोषजनकत्वस्य वाचनिकत्वादेकदाविवाहेऽपि कनिष्ठविवाहात् पूर्वस्मिन् ज्येष्ठस्य विवाहाभावात् कनिष्ठविवाहस्य परिवेदनदोषजनकत्वं भवत्येवेत्यभिप्रायः।

'एकोदरप्रसूताना'मिति, तथाच परवचनैकवाक्यतया सोदराणां मध्ये द्वाभ्यां विवाह एकस्मिन् वासरेऽपि न कर्तव्य इत्यर्थः सिध्यति। 'युग्ममौद्वाहिक'मिति। युग्ममिति सुपां सुप् तेन युग्मस्ये-त्यर्थ। 'औद्वाहिक' मित्यत्र स्वार्थेऽन्प्रत्ययः। तेन द्वयोः सोदरयोरेकस्मिन् दिने विवाहो विषिद्ध इति भावः। 'कन्यादानद्वय'मित्यत्र सोदर इत्यनुषङ्गः। तेन वैमातृकयोः कन्ययोर्विवाहे न दोषः। तदयं निष्कर्षः—एकस्मिन्दिने सहोदरयोर्विवाहो न विधेयः। तथाविधयोः कन्ययोर्दानं न कर्तव्यम्, किन्तु कन्यापुत्रयोर्विवाहो विधेयः। अन्यथा कन्यादानद्वयमिति व्यर्थं स्यात्।२२॥

पूर्वोक्तपरिवेदनदोषप्रतिप्रसवमाह छन्दोगपरिशिष्टम्। 'असहोदरा'निति, अकृतविवाह-ज्येष्ठवैमात्रेयस्यापि एकपितृजन्यत्वेन भ्रातृत्वात् तत्सत्त्वे कनिष्ठवैमात्रेयस्यापि परिवेदनप्रसक्तौ

असहोदरानिति प्रतिप्रसवः। 'अतिरोगिन' इति "राजयक्ष्मामयावी च" इत्यादि वक्ष्यमानवचनात् राजयक्ष्मादिरोगग्रस्तानित्यर्थः। 'धनवार्द्धुषिक'मिति वृधुषिः ऋणत्वेन प्रयुक्ताद्धनात् षन्मासादि-व्यवस्थयाधिकं लब्धं वृद्धिसंज्ञकमिति यावत्, तं गृह्णातीति दुर्गटीकायाम्। पूर्ववचने धनवृद्धि-प्रसक्तपदस्याप्येष एवार्थः। 'राजसेवकं' नियतराजाज्ञासम्पादकम्। 'कर्षकं' कृषिजीविनम्। प्रोषितं विदेशस्थम्। 'वाचो यत्रेति' यद्देशवासिवाक्यापेक्षया यद्देशीयवचसां वैलक्षण्यं (तद्देशापेक्षया तद्देशो देशान्तरमिति तात्पर्यं) 'गोरक्षकानि'ति गोरक्षणजीविनः, 'वाणिजिकान्' वाणिज्यजीविनः। 'कारवः' सूपकाराद्यास्तत्कर्मजीविनः 'कुशीलवा' नटविशेषास्तदीयनृत्यगीतादिकर्मजीविनः 'प्रेष्यान्' दासकर्मजीविनः 'वार्द्धुषिकान्' प्रतिषिद्धजीविनः। ईदृशान् ब्राह्मणान् प्रकृतसाक्षिप्रश्ने शूद्रवत् पृच्छेदिति कुल्लूकभट्टः। अथैतच्छन्दोगपरिशिष्टवचने वार्द्धुषिकस्य शूद्रतुल्यत्वेन मनुना परिभाषितत्वात् शूद्रतुल्येत्यनेनैव वार्द्धुषिकस्यापि वर्जनप्राप्तौ पूर्ववचने धनवृद्धिप्रसक्तांश्चेत्यादिना यत् पृथङ्निषेधः कृतः तद्धनवार्द्धुषिकमिति वचनेन वर्षत्रयप्रतीक्षार्थमिति कश्चित्। वस्तुतः, मनूक्तपारिभाषिकवार्द्धुषिकपदं प्रतिषिद्धकर्मजीविपरम्। अत एव कुल्लूकभट्टेन तथा व्याख्यातम्। जडपदस्यार्थं प्रकटयति 'जड' इति। वेदग्रहणासमर्थो जड इति दायभागकृता व्याख्यातं मुको वर्णानुच्चारकः।२३॥

'नैष्ठिकब्रह्मचारी'ति। ब्रह्मचारी द्विविधः उपकुर्वाण एकः, नैष्ठिकोऽपरः। तत्र यस्तावदुप-नयनातन्तरं गुरोः सकाशात् वेदाध्ययनं समाप्य गुर्वनुमत्या कृतस्नानसमावर्त्तनो गृहस्थाश्रमं प्रविशति स उपकुर्वाणः। एवमखण्डितव्रतो गुरुकुले स्थित्वा यावज्जीवं ब्रह्मचर्यमनुतिष्ठति स नैष्ठिकः। तथा-चैतादृशस्य ब्रह्मचारिण एव शास्त्रतो भार्यासम्बन्धनिषेधः। भिक्षुरत्र दण्डी, चतुर्थाश्रमस्थ इति यावत्। परकुलं परगोत्रमटति गच्छति यो दत्तकः, इति नारायणोपाध्यायाभिप्रायप्रकटनेनैवं विज्ञायते सगोत्रदत्तके ज्येष्ठे सत्यनिर्विष्टे कनिष्ठो न निर्विशेदिति। परगोत्रे च तस्मिन् सति कनिष्ठस्य विवाहादिना न परिवेदनदोष इति कश्चित्। वस्तुतो भिन्नोदरे दत्तके च पितृव्य-तनयेषु च दाराग्निहोत्रसंयोगे न दोषः। परिवेदने इति दत्तकचन्द्रिकाधृतयाज्ञवल्क्यवचनात् दत्तकमात्र एव न दोष इति। अथैवं नारायणोपाध्यायाशयवर्णनं स्मार्तपादानां विरुध्येतेति नैवं दत्तकस्य पूर्वं जनकगोत्रेण सह यादृशनिरुप्यनिरूपकभावः सम्बन्ध आसीत् पश्चात् सगोत्रगृहीतस्य न तथा सम्बन्धः किन्त्वन्यविध एव, तथाच परकुलमित्यस्य परनिरूपितगोत्रं प्रतिग्रहीतृनिरूपित-गोत्रमित्यर्थः। 'ततश्चे'ति वर्षत्रयप्रतीक्षणे दोषाभावाच्च। 'नन्वेता'निति कथं द्वितोया? "पर्यपाङ्योगे पञ्चमी"त्यनुशासनेन पञ्चमीप्राप्तेरित्या'हात्रे'ति। 'अत्र' परिविन्दन्निति प्रतीके, परेः परिशब्दस्य, 'लक्षणार्थत्वा'दिति। तथाच शाब्दिकाः स्मरन्ति, 'लक्षणवीप्सेत्थम्भूतेष्वभिर्भागे च परिप्रती। अनुरेषु सहार्थे च हीने उपश्च कथ्यते'। तदनेन परेर्लक्षणार्थत्वं वेदितव्यम्। लक्षणत्वमिह परिचायकत्वं यथा वृक्षं परिविद्योतते विद्युदित्यादौ द्वितीयार्थं आधेयत्वं परिशब्दस्य परिचायकत्वमर्थः। विद्योतनं वैद्युतिकतेजःस्फुरणं तथाच तादृशालोकसम्पर्केन विद्युद्विद्योतनज्ञानात् वृक्षस्य तत्परिचायकत्वम्। तथाच वृक्षपरिचायितविद्योतनक्रियाश्रयो विद्युदिति शाब्दबोधस्त-थात्रापि। तथाहि देशान्तरस्थितत्वधर्मादिना तथाविधा ज्येष्ठाः दाराग्निहोत्रसंयोगेषु कनिष्ठस्य परिवेदनदोषाभावज्ञापकास्तथाच तत्परिचायिततादृशदूषणाभाववान् कनिष्ठ इति परिचायकत्व-लक्षणं लक्षणत्वमप्रतिहतमेवेति ध्येयम्।

'तेनेति' परिशब्दस्य लक्षणार्थत्वेन। देशान्तरस्थेति प्रोषितमित्यस्य विवरणं भागे च परि-प्रतीत्युक्तेश्चकारेण पूर्वोक्तार्थाः समुच्चीयन्ते तेन परेर्यथालक्षणार्थत्वं तथा प्रतेरपीत्याह 'प्रती'ति।

'बोद्धव्य'मिति अपरिवेदनदूषणम् । 'अत्रापी'त्यादि प्रोषितपरमित्यन्तस्य व्याख्यानमभिधीयते अत्र वचने अपिशब्दस्त्वर्थे, प्रोषिते इति विषयसप्तमी, प्रतीक्षणं कालातिक्रमणं, परं विषयः, तथाचात्र वचने प्रोषितविषयकं कनिष्ठस्य विवाहाद्यर्थं यद्वर्षत्रयकालातिक्रमणं तत् किन्तु विद्यादीतरार्थ-प्रोषितविषयकमिति। ननु श्रूयमाणः पुनः पुनरित्यादौ श्रूयमाणेऽभिमुखगमनमित्यादौ च श्रवण-कर्मत्वस्यैव बोधनात् अशृन्वानमिति ज्येष्ठविशेषणमनुपपन्नमित्याह 'प्रत्ययव्यत्ययेने'ति (प्रत्ययस्य कर्मवाचिप्रत्ययस्य व्यत्ययेन) अर्थात् यन् प्रत्ययस्थाने नुप्रत्ययेन।

परिशिष्टप्रकाशः छन्दोगपरिशिष्टटीकाविशेषः। रत्नाकरग्रन्थे अशृन्वान इति पठितं व्याख्या-तञ्च रत्नाकरकृता, तद्व्याख्यानमाह 'प्रोषितस्ये'त्यादि। प्रायश्चित्तस्य पादं कुर्यादिति पाठः समीचीनः, बहुषु ग्रन्थेषु तद्दर्शनात्। तदयमर्थः प्रायश्चित्तस्य परिवेदनप्रायश्चित्तस्य, पादः षड्धेनु-दानरूपम्। कश्चित्तु प्रायश्चित्तस्य कृच्छ्रपादं कुर्यादिति पठति, स पाठोऽसमीचीनः प्रायश्चित्त-स्येत्यस्यान्वयानुपपत्तेः। प्रायश्चित्ती भवतीति, प्रायश्चित्तञ्च द्वादशरात्रं शक्तुप्राशनं ब्राह्मण-तर्पणञ्च, यथा प्रायश्चित्तविवेके सुमन्तुः परिवित्तिपरिवेत्तृकन्यादातृयाजकानां द्वादशरात्रं शक्तु-प्राशनं ब्राह्मणतर्पणञ्च, तां पुनर्भवमाचक्षते न भूयश्चैनामभिगच्छेदित्यन्तं सुमन्तुवचनं यत्त्वित्यादिना उपक्रम्य तदनिर्विष्टे ज्येष्ठे विद्याधर्मार्थिनामन्यतमार्थं देशान्तरगते ज्येष्ठे पौनःपुण्येन वार्तया अश्रवणे अवधिकालमप्रतीक्षमाणेन कनीयसा विवाहकरणे वेदितव्यमिति धर्मप्रदीपः, इत्यन्तेन मीमांसितम्। सोयमवधिकालः वशिष्ठेनोक्तः, यथा अष्टौ दशेत्यादिः। अत्र विषये श्लोकौ वशिष्ट आह इति शेषः। 'धर्मार्थियो'रिति निमित्तसप्तमी। भ्रात्रा कनिष्ठेन। राजयक्ष्मसाहचर्या-दामयावीति पापरोगविशषवान्। पुनः पुनर्वार्तां शृण्वतोऽपि तावत् कालमप्रतीक्षमाणस्य विष्णूक्तं तद्यथा—परिवित्तिः परिवेत्ता च यया च परिविद्यते। तद्दाता याचकश्च चान्द्रायणं कुर्युरिति चान्द्रायणं प्रायश्चित्तं ज्ञेयम्। ज्यायसि ज्येष्ठे यवीयान् कनिष्ठः। गोतमवचनार्थमाह 'विद्यार्थ'मिति। 'तदभिगमने' पतिकर्तृकाभिगमने, अभिगमने अभिगमननिमित्तमित्यर्थः। एवमिति, भ्रातरि ज्येष्ठे प्रोषिते कनिष्ठो भ्राता 'कन्याग्न्युपयमेष्वि'ति, कन्या तदीयकन्यादानं, अग्निः स्वीयमग्निग्रहणम्, एव-मुपयमः निजविवाहस्तन्निमित्तं द्वादशवर्षप्रतीक्षणं कुर्यादिति भावः। 'एतेने'ति पूर्वोक्तवशिष्ठगोत-मवचनपर्यालोचनादिना, एतद्वक्ष्यमाणं अवसीयते निश्चीयते। रत्नाकरकृद्भिरित्यस्य व्याख्यातमित्यनेन परेणान्वयः। श्रूयमाणे ज्येष्ठे इत्यर्थः। अभिमुखगमनं तत्समीपगमनं। गौतमीयस्य व्याख्यानञ्च प्रोषिते इत्यादिना ज्ञेयम्। तं ज्येष्ठम् ।।२४।।

'नाग्नय' इति। अत्राग्निपदं अग्निहोत्रपरं प्रतिप्रसवशास्त्रे तथा दर्शनात्। यज्ञपदं गोयज्ञपरं गरुडपुराणे तथा दर्शनात्, यथा आधाने वा तपःश्राद्धे गोमखेऽब्दव्रते तथा, ज्येष्ठाकृते कनिष्ठस्य परिवेदनदूषणम्। 'तपः'पदं दीक्षापरं, 'दाराग्निहोत्रं दीक्षाञ्च परिवेत्ताग्रजे स्थिते। परिवित्तिस्तु तज्ज्यायान् परिविन्नो गुरुर्मतः' इति वचनात्। 'एतेनेति' पूर्वोक्तवचनतात्पर्यालोचनेन तथाच प्रायश्चित्तविवेके शूलपाणिना पूर्वोक्तवचनानि तावदेवं पठितानि, तत्र प्रथमतो हारीतवचनं यथा 'सोदरानान्तु सर्वेषां परिवेत्ता कथं भवेत्। दारैस्तु परिविन्द्यन्ते नाग्निहोत्रेण नेज्यया ।।'

तथाच छन्दोगपरिशिष्टं, कात्यायनः-'नाग्नयः परिविन्दन्ति न यज्ञा न तपांसि च। दारैस्तु परिविन्दः स्यात् पृथक्धर्माहि ब्राह्मणाः' ।। ततस्तु अग्रजोऽस्य यदानग्निरित्यादिवशिष्ठवचन-मेवं ज्येष्ठो भ्राता यदा तिष्ठेदित्याद्युशनोवचनञ्चाभिधाय एतेनेत्यादिकमभिहितम्। ततश्च हारीत-वचनान्यथापठितछन्दोगपरिशिष्टवचनाभ्यां वचनान्तरैकवाक्यतया च ज्येष्ठानुमत्या अग्निहोत्रादौ

न दोषः विवाहे तु दोष इत्यर्थः पर्यवस्यति। अतः प्रायश्चित्तविवेकोक्तः समीचीन एव प्रतिभाति। कश्चित्तु प्रायश्चित्तविवेकोक्तपक्षोऽस्वरस एव, तद्बीजन्तु दारग्रहणाग्निहोत्रयज्ञतपःश्राद्धाचरणेषु निषिद्धेषु मध्ये अग्निहोत्रादीनां चतुर्णां ज्येष्ठानुमत्या प्रतिप्रसवाद् बहूनामेकधर्मनामिति बौधायन-वचनेन एकत्र दृष्ट इति न्यायेन भुयोऽनुरोधेन च विवाहस्यापि ज्येष्ठानुमत्या प्रतिप्रसवस्य न्याय्यत्वम्। न च उक्तहारीतवचनछन्दोगपरिशिष्टवचनयोर्दारग्रहणनिषेधाग्निहोत्रादिप्रतिप्रसवयोरेकविषयत्वा-वश्यकत्वात् प्रतिप्रसवस्यानुमतिविषयत्वे निषेधस्यापि तद्विषयत्वं युक्तमिति वाच्यं निषेधस्यानुमत्य-ननुमत्युभयविषयतायाः प्रतिप्रसवस्य त्वनुमतिमात्रविषयताया भवद्भिरङ्गीकार्यतया भवन्मतेऽपि एकविषयत्वासम्भवात्। अथ तर्हि हारीतछन्दोगपरिशिष्टवचनयोः का गतिरिति चेत्, अत्रोच्यते-छन्दोगपरिशिष्टवचनोत्तरार्धे दारैस्तु परिविन्दः स्यात् पृथक्धर्माहि ब्राह्मणा इति प्रायश्चित्त-विवेकसम्मतः पाठः, परिशिष्टप्रकाशकृता च तद्वचनोत्तरार्धस्य नच, श्राद्धमित्यादिना अन्यथा पठितस्य व्याख्यातत्वात् स्मार्तपादैरपि टीकाकृत्व्याख्यातपाठस्यैव समीचीनत्वबुद्ध्या स एव पाठोऽङ्गीकृतः। अत्र पाठनिश्चयाभावात् टीकाकृदादिसम्मतपाठात्तु प्रतिप्रसव एव प्रतीयते। हारीतवचनन्तु "दारैस्तु परिविन्द्यते" इति ज्येष्ठानुमतिविषयं नाग्निहोत्रेणेत्यादि तु ज्येष्ठाननुमतिविषयमिति ग्रन्थकृदाशयं वर्णयति, तदपि न पर्याप्तम् एकस्य हारीतवचनस्य विभिन्नविषयत्वकल्पनात्। एवं हारीतवचनैक-वाक्यतया छन्दोगपरिशिष्टवचनोत्तरार्धस्यापि प्रायश्चित्तविवेककृत्पाठस्यैव साधीयस्त्वात्, न्यायस्य तु वचनात् दुर्वलतया सर्वैरेवाङ्गीकृतत्वाच्च इति ध्येयम्।

ननु या च कन्या विरूपिकाया इति छन्दोगपरिशिष्टीयं कथं सङ्गच्छते विरूपिकाया अनूढज्येष्ठायाः परिवेदनदोषजनकत्वस्य अप्राप्तेः इत्याह 'अप्रसक्ते'ति। अथ पर्युदासपक्षेऽपि सामान्यशास्त्र-प्राप्तेरङ्गत्वात् नञः कथं पर्युदासवृत्तित्वमिति सत्यं, परिशिष्टप्रकाशकारमते पर्युदासवृत्तित्वादित्यस्य सामान्यशास्त्रप्राप्त्युपजीवित्वाभावेन पर्युदासलाक्षणिकत्वादित्येवार्थः शक्तिलक्षणयोर्द्वयोरेव वृत्ति-पदवाच्यत्वात्, तेन तन्मते विरूपिकेतरा ज्येष्ठा कनिष्ठाया विवाहे परिवेदनदोषं जनयत्येव। ग्रन्थकृता तु परिशिष्टप्रकाश इत्यनेन मुख्यत्वसम्भवे लक्षणाश्रयणमन्याय्यमित्यस्वरसं सूचयता देवलस्त्वित्यादिना सामान्यशास्त्रप्राप्तिर्दर्शिता। कश्चित्तु 'अप्रसक्ते'त्यादि सन्दर्भमेवं वर्णयति, यथा--या च कन्या विरूपिका इति छन्दोगपरिशिष्टीयप्रतीकस्य निषेधविधिपरत्वाङ्गीकारे ज्येष्ठायां विद्यमानाया-मित्यादिदेवलवचनस्यापि ज्येष्ठासामान्यविषयकत्वेन उक्तनिषेधविधिविषये प्रवृत्तौ इच्छा-विकल्प एवापद्येत, अतोऽप्रसक्तो निषेधस्तद्रूपा या अनुपपत्तिस्तया नञः पर्युदासवृत्तित्वमिति।

'अनुमत्यर्थं' भरणार्थमिति। 'आवृत्ते तीर्थगमने' इति, असकृत्तीर्थगमने इति तात्पर्यम्। प्रतिज्ञाते संकल्पिते आरब्धे इति यावत्। तथाच ब्रह्मसिद्धान्ते—आरब्धं कर्म यत्किञ्चित् तत्-कार्यं हि मलिम्लुचे, 'कालात्यये' दशमवर्षोपरि। रजस्वलेति रजउद्गमयोग्या, राजमार्तण्डीये अयुग्मे दुर्भगा नारीत्यादौ ॥२५॥

'कन्याद्वादशवर्षानी'ति। निन्देयं कन्यारजोदर्शनपरा वक्ष्यमानवचनजातात्, अनागतार्तवायाः षोडशवर्षीयायाः विवाहस्य महाभारतीयवचनबोधितत्वेन तद्दानकर्तुः पितुर्दोषाभावाच्च। 'त्रिंशद्वर्ष'-इति, अथानेन षोडशवर्षीयामेवोद्वहेदिति न कथं नियमः, मैवं 'त्रिंशद्वर्षोद्वहेत् कन्यां हृद्यां द्वादश-वार्षिकी' मिति मनुवचनविरोधात्। नच त्रिंशद्वर्ष एवेति विपरीतनियमः प्रोक्तमनुवचनपरप्रतीकेन धर्मे सीदति सत्वर इत्यनेन उक्तात्पकालपरिगृहीतदारः धर्मे अवसादं गच्छतीत्यर्थकेन तथैव प्रती-तेरिति वाच्यम्, नियमे नियोज्यादिकल्पनापत्तेः, तद्वरमस्य योग्यकालप्रदर्शनपरत्वमिति। अत एवोक्त-मनुवचनव्याख्यानावसरे मेधातिथिना "इयता कालेन यवीयसी कन्या वोढव्या न पुनरेतावद्वयस एव

विवाह इत्युपदेशार्थः" इत्युक्तम्। मन्वर्थमुक्तावल्यां कुल्लूकभट्टेनापि त्रिंशद्वर्षः पुमान् द्वादशवर्षवयस्कां मनोहारिणीं कन्यामुद्वहेत्, चतुर्विंशतिवर्षो वा अष्टवर्षां गार्हस्थ्यधर्मे अवसादं गच्छति त्वरावान् मनुवचनमेवं व्याख्याय, एतच्च योग्यकालप्रदर्शनार्थं न तु नियमार्थं, प्रायेणैतावता कालेन गृहीतवेदो भवति त्रिभागवयस्का च कन्या वोढुर्युनो योग्येति। गृहीतवेदश्चोपकुर्वानको गृहस्थाश्रमं प्रति न विलम्बेत इति सत्वरं इत्यास्यार्थः इत्यभिहितम्। त्रिभागवयस्केति यदुक्तं तदपि सप्रमाणं वर्षेणैकगुणां भार्यामुद्वहेत् त्रिगुणः पुमानित्युक्तेः। 'पितुर्गेहे चे'ति। अत्र रजोयोगमात्रे कन्यायास्तत्पितुस्तद्वोढुर्वा न दोषो गुणवद्वरालाभे कुमारीणां विवाहपराङ्मुखत्वे वा रजोयोगे न दोषः। तथाच वशिष्ठः "यावत्तु कन्यामृतवः स्पृशन्ति तुल्यैः सकामामपि याच्यमानां तावन्ति भूतानि हतानि त्याभ्यां मातापितृभ्यामिति धर्मवाद" इति एवं पित्रादिप्रतिज्ञाविशेषस्य प्रतिबन्धकत्वे वाग्दत्तायाः वरप्रतीक्षायाञ्च रजोयोगे न दोषः। यत्र तु आलस्यानवधानादिना दानाभावात् रजः प्रवृत्तिस्तत्रैव दोषः। स च पित्रादेरेव भवति निषेध्यस्योल्लङ्घनात्, नतु कन्याया 'विहितस्याननुष्ठानान्निन्दितस्य च सेवनादनिग्रहाच्चेन्द्रियानां नरः पतनमृच्छति' इति याज्ञवल्क्योक्तस्य विधिनिषेधोल्लङ्घनरूपस्य प्रत्यवायहेतोरसत्त्वात्। ततश्च निषेधाविषयतया कन्याया निर्दोषत्वेन परिणयनात् संस्कारसिद्धिरवश्यम्भाविनी। न च 'यावन्नोद्भिद्येते स्तनौ तावदेव देया, अथ सा ऋतुमती भवती दाता प्रतिग्रहीता च नरकमाप्नोति, पितृपितामहप्रपितामहाश्च विष्ठायां जायन्ते, तस्मान्नग्निकादेया' इति पैठिनसीवचनेन तत्प्रतिग्रहीतुर्नरकश्रुतेः, 'अश्रद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिमिति वचने निन्दाश्रुत्या कल्पनीयस्य नञ्पदघटितवाक्यस्य विषयतया वरस्य पर्युदस्तत्वेन तत्कृतपरिणयनात् संस्कारसिद्धिर्न स्यादिति वाच्यं। निषेधाविषयत्वेनादुष्टायाः कन्यायाः परिणयप्रवृत्तं प्रति निषेधकल्पनाया अयुक्तत्वात्। एवञ्च कन्याया वृषलीत्वेन निन्दार्थवादः वरस्य च नरकादिनिन्दार्थवादश्च रजोयोगात् पूर्वं कन्यादानस्यावश्यम्भावार्थं व्यस्तनिन्दार्थवादस्य युग्मतिथिप्रशंसार्थत्ववत्। अत एव पैठिनसीवचने तस्मादित्यनेन नग्निकादानावश्यम्भावो दर्शितः। व्यक्तमाह मनुः—'त्रीणिवर्षाण्युदीक्षेत कुमार्युतुमती सती, ऊर्ध्वन्तु कालादेतस्माद्विन्देत सदृशं पतिम्। अदीयमाना भर्तारमधिगच्छेद् यदि स्वयं, नैनः किञ्चिदवाप्नोति नच यं साधिगच्छति। नैनं किञ्चिदित्यनेन कन्यायाः, न च यमित्यनेन वरस्य च दोषाभाव इति॥ तस्मादृतुमतीविवाहः शास्त्रीयमेवेति सिद्धम्। 'अतएव' गुणवते कन्यादाने दोषाभावादेव। 'उत्कृष्टाय' गुणादिना, अभिरूपाय सुरूपाय, सदृशाय सवर्णाय। 'सप्तसंवत्सरेति' मासत्रयाधिकषड्वर्षपर्यन्तेत्यर्थः। गर्भान्वितयुग्ममाह 'मासत्रये'ति। जन्ममासादिति ल्यब्लोपे पञ्चमी, तेन जन्ममासमारभ्य इत्यार्थः। तथाच जन्ममासमारभ्य परिगणितायुग्मवर्षे मासत्रयादूर्ध्वम्। एवं तदारभ्य युग्मवर्षे मासत्रयं यावदेतेषामेव द्वादशमासानां गर्भान्वितयुग्मघटकता इति।२६।

'आषाढे'ति विवाहितेत्यनेनान्वयः। एवमन्यत्रापि, 'नष्टप्रजा' मृतसन्ततिः, 'प्रजा स्यात् सन्ततौ जने' इत्यमरात्।

'इषे' इति स्यादाश्विन इष इत्यमरात् आश्विने इत्यर्थः। 'प्रेतवती' प्रेतभर्तृमती। 'वियोगबहुला' वियोगश्चात्र पत्या सह ज्ञेयः। 'राजग्रस्ते' इति राजनि चन्द्रे ग्रस्ते भविष्यति इति शेषः। अर्थाद् ग्रहणसम्भावनायां, निर्णयसिन्धौ तु राहुग्रस्ते इति पाठः। अत्रापि तथैवार्थः। वस्तुतः ग्रस्ते आक्रान्ते, तेन राजकर्तृकाक्रमणसम्भावनायामित्यर्थः। युद्धे भविष्यति इति पूरणीयम्। 'प्राणसंशये'-मरणसम्भावनायाम्। 'अतिप्रौढे'ति विवाहकालस्यात्ययात् अतिप्रौढा समतीतदशमवर्षा या कन्या, तथाच लघुहारीतः—'दशवर्षव्यतिक्रान्ता या कन्या शुद्धिवर्जिता, तस्यास्तारेन्दुलग्नानां शुद्धग्रा पाणिग्रहो मतः'। तस्या विवाहे कालस्यानुकूल्यं सहायत्वं अब्दादिशुद्धिं नापेक्षते इत्यर्थः।

'अतिवृद्धे'ति अतिप्रौढावद्वग्राख्येयम्। 'धर्मविरोधिनी'ति, अधर्मकारिणी अधर्मं जनयिष्यतीति तात्पर्यं, इत्याशङ्क्य सा देया इति भावः। 'अविशुद्धेऽ'ति ग्रहाब्दादीनां शुद्ध्यभावेन। 'चन्द्र-लग्नबलेने'ति। तथाच ज्योतिस्तत्त्वे विद्याधरीविलासे, 'पुंसामर्कः स्मृतो योनिर्योषितामममृतद्युतिः। अतः पुंयोषितोः शस्तं बलमर्कशशाङ्कजम्'। विवाह पटले—गोचरशुद्धा विन्दुं कन्यायाः यत्नतः शुभं वीक्ष्य तीग्मकिरणञ्च पुंसः शेषैरवलैरपि विवाह इत्युक्तम्।

'लग्नवलं' सुतहिवुकयोगेन इति। 'अत्रैव विषये' कन्याया दशमवर्षातिक्रमविषये। 'माङ्ग-ल्येष्वि'ति। मङ्गलेभ्यो हितेषु पुत्रादिसमृद्धीनामादिकारणीभूतेषु विशेषणन्तु विवाहादेव पुत्रादि-लाभज्ञापनाय। 'कन्यासंवरणेषु' वाग्दानेषु। 'ग्रहशुद्धि'मिति, त्रिषड्दशैकादशगोदिनेशः सूतार्थसौभाग्यशुभप्रदः स्यात्, वैधव्यदाताष्टमराशिसंस्थः शेषेषु रुग्दुःखशुचः करोति, इत्याद्युक्त-रव्यादिशुद्धिम्। अब्दशुद्धिम्—अयुग्मे दुर्भगा नारीत्याद्युक्ताम्। मासशुद्धिं 'माघे मासि भवत्यूढा कन्यासौभाग्यसंयुता, फाल्गुने च भवेत् साध्वी वैशाखे मासि पुत्रिनी'ति वात्स्यायनाद्युक्ताम्। अयन-शुद्धिम् उदगयने आपूर्यमाणपक्षे इत्याद्युक्ताम्। ऋतुशुद्धिं–वसन्ते ब्राह्मणमुपनीयत, ग्रीष्मे राजन्यं, शरदि वैश्यमित्यधिकरणमालाधृतश्रुतौ 'वसन्तसमये दद्यादब्दे गर्भाष्टमेऽपि वा, मेधावी मेखलादाने जन्ममासे च जन्मभे' इति ज्योतिःशास्त्रे चोपनयने वसन्तादेः प्राशस्त्याभिधानात् मनुना च 'वैवाहि-को विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः, पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिस्क्रिया' इति वचनेन वैदिको वेदाध्ययनार्थो यः संस्कार उपनयनाख्यः स स्त्रीणां वैवाहिको विवाहसाध्यो विधिः। विवाहादेव तासामुपनयनसंस्कारो निष्पद्यते। एवञ्च विवाहस्य उपनयनकार्ये विधानात् तन्निवृत्ति-रर्थादवगम्यते। या च पत्युः सेवा उपचारः सैव तासां गुरुकुले वासः, यश्च गृहार्थः गृहकर्मनामन्न-पाकादीनां करणं स एव तासामग्निपरिचर्या सायंप्रातः समिदाधानरूपा इत्यर्थकेन स्त्रीणां विवाह उपनयनधर्मातिदेशात् वसन्ताद्यादरणरूपाम्। दिवसशुद्धिम्, अर्कार्किभुमिपुत्रानां दिनेषु कुलटा भवेत् इत्यादुक्तां, दशवर्षेभ्योऽर्वाक् दशवर्षमध्ये इत्यर्थः। 'तावन्मात्रानियम' इति, मात्रपदं कृत्स्नार्थकं तेन प्राक् यदुक्तं तत्समुदायनियमाभावः। 'एतदेकवाक्यतये'ति। ग्रहशुद्धिमब्दशुद्धिमित्यादिभुजबल-भीमैकवाक्यतया। 'पूर्ववचने' अविशुद्धयापि सा देयेति वचने। 'तस्याः'समयाशुद्धेः। स्त्रीपुंसा-धारणत्वेनेति, अधिमासे विवाहं यात्रां चूडां तथोपनयनादि न कुर्यात् इत्यादिना। इत्यङ्गिरसोक्तमपि 'तथैवे'ति। तथैव भुजवलभीमोक्तप्रतिप्रसववचनैकवाक्यतया तावन्मात्रप्रतिप्रसवपरमेव।

'आपूर्यमाणे पक्षे' शुक्लपक्षे। आ सम्यक् पूर्यमाणश्चन्द्रमा यस्मिन् इति व्युत्पत्तेः। 'कल्याणे' ज्योतिःशास्त्राद्यनिषिद्धे। गोर्दानं यस्मिन् अथवा गावो लोमानि दीयन्ते छिद्यन्ते यस्मिन् तत्-कर्म गोदानं केशान्तसंस्कारः, गोशब्दस्य लोमार्थकतामाह गौरित्युपक्रम्य "पुंस्त्रियोः स्वर्गवज्राम्बु-रश्मिदृग्वानलोमषु" इति केशवः। अतएव केशान्तश्चैव षोडश इति याज्ञवल्क्यवचने केशान्तः पुन-र्गोदानाख्यं कर्म इति मिताक्षरा। 'स्वोक्त' इति। आश्वलायनोक्त इत्यर्थः। 'अतएव'-अतिप्रौढाविवाहे समयाशुद्धेरप्रतिप्रसवादेव। 'मलमासादिप्रतिप्रसवपर'मिति। नन्वेकस्य कालदोषो न विद्यते इत्यस्य कुत्रचित् मलमासादिप्रतिप्रसवपरता अन्यत्र च अब्दाद्यशुद्धिप्रतिप्रसवपरता कथं सम्भवति सकृदुच्चरितशब्दः सकृदर्थं गमयतीति न्यायात्, सत्यं, श्रूयमाणपदस्य पुनरन्वयार्थमेवानुसङ्गः, न त्वर्थसहितस्य गौरवादिति व्यवहारतत्त्वीयसन्दर्भेन एकस्यापि कालदोषो न विद्यते इत्यस्यानुसङ्गेन परत्रान्वये अर्थान्तरकल्पनं न दोषावहम्। 'संवादात्' एकवाक्यत्वात्॥२७॥

'भाविनोऽर्था' इति। अनिच्छतोऽपि जनस्य भाविनो'ऽनुपदादावश्यके' इति निन्प्रत्ययेन ग्रहादि-सूचितत्वेन वश्यम्भवितुमर्हा अर्थाः शुभाशुभरूपा हठेन बलात्कारेन भवन्ति उत्पद्यन्ते इत्यर्थः।

'तथा दर्शनादि'ति रुक्मिन्या विवाहात् प्राक् ग्रहादिसूचितदोषशान्त्यर्थं होमहिरण्यादिदान-दर्शनात्, 'वध्वा' रुक्मिन्या इत्यर्थः। 'रक्षाम्' अनिष्टोपशमम्। 'राजा' भीष्मकः। 'अतएव' दानादिना ग्रहादिदोषोपशमादेव। एतद्विषये मत्स्यपुराणं प्रमाणयति 'तथा'चेति। 'पुरा कृतानी'ति, अस्यायमर्थः, तृतीयाद्वयमभेदे, फलन्ति इत्यस्य परिणमन्ते इत्यर्थः। 'दौर्गत्यं' दारिद्र्यं, 'इष्टवधः' पुत्रादिविनाशः, तथाच हे तपोधनाः पूर्वजन्मकृतपापानि नरकभोगाद्यनन्तरं शेषीभूतानि रोगादि-रूपेण परिणमन्ते। अतएव पुराकृतपापस्य तथाविधपरिणमनादेव। 'पुरुषकारे' यागादौ, सप्तम्यर्थो जन्यत्वं, उत्पत्तिरूपायां कर्मसिद्धौ तदन्वयः। 'पूर्वकालीनदेहेने'ति, जन्मान्तरीनशुभाशुभकर्मयोग्यदेह-साध्यत्वलाभार्थमिदम्। 'प्रतिकूल'मिति, दुर्दैवमित्यर्थः। प्रतिकूलं यद्दैवं, 'यदे'ति प्रथमान्तमव्ययं तथाच यद्दैवं तद्विहन्यते इत्यर्थः। 'मङ्गलाचारयुक्तानां' सदाचारसम्पन्नानाम्। 'कर्मारम्भवतां' सत्कर्मारम्भवताम्। 'अत एव' ग्रहहोमीयपौराणिकमन्त्राणां सर्ववेदिसाधारणत्वादेव। 'भूकम्पादेरिति'। आदिना दिव्यनाभसोत्पातान्तरपरिग्रहः। भूकम्पादौ दोषविधायकवचनन्तु दीपिकायां यथा 'अनिष्टे त्रिविधोत्पाते सिंहिकासूनुदर्शने, सप्तरात्रं न कुर्वीत यात्रोद्वाहादिमङ्गल'मिति। एतद्विस्तारस्तु मलिम्लुचतत्त्वे अनुसन्धेयः। अत्र अपि वा शब्दाभ्यां उत्पातदोषोपशमनोपायान्तर-परिग्रहः, यथा श्रीपतिव्यवहारनिर्णये 'अथ दिवसत्रयमध्ये मृदुजलपतनं यदापि स्यात् तत्रोत्पातजदोषं शमयेदित्याहुराचार्याः'। वाढस्पत्ये—शमयन्त्यासप्ताहात् कम्पाद्विकृतनिमित्तमाश्वेव अतिवर्षणो-पवासव्रतदीक्षाजप्यहवनानि ॥२८॥

'पितामह' इत्यादि। ननु पितामहादीनां कथं दानाधिकारस्तेषां कन्यानिरूपितस्वामित्वलक्षण-स्याधिकारस्याभावात्, तादृशाधिकारमूलकत्वाच्च कन्यादानस्य। तच्च कन्यादानं मातापित्रोरेव सम्भवति शुक्रशोणितसम्भव इत्यादिवशिष्ठवचनेन शुक्रशोणितसमुद्भवतया तयोः स्वामित्वस्य बोधित्वात्। दुहितर्यपि तेनैव हेतुना स्वामित्वस्य तयोर्योग्यत्वात्। नच पितृमरणमेव सत्यपि भ्रातरि वाचनिकः पितामहस्वामित्वहेतुस्तन्मरणञ्च भ्रातृस्वामित्वहेतुरित्यादिकं कल्पनीयमिति वाच्यं, पितृमरणेऽपि मातृस्वामित्वानपायात्। सत्यां तस्यां दुहितर्यन्यस्वामित्वोत्पत्त्यनुपपत्तेः समानजातीययोर्विरोधात्। सत्यमत्र क्रमिककन्यादानाधिकारबोधकवचनजातं कन्यानिरूपित-क्रमिकपितामहादिस्वामित्वं प्रतिपादयेदिति नानुपपत्तिरिति भाव्यम्। नच मातुरपि तुल्ययुक्त्या पित्रधिकार इवाधिकाराविशेषात् पुत्रदानवत् कन्यादानेऽपि युगपदुभयाधिकार आस्तामिति वाच्यम्, माता त्वभावे सर्वेषामित्यादिवचनात् वाचनिकेऽर्थे न्यायानवतार इति स्मार्तपादैरुक्तत्वाच्च। पुत्रदाने तु "मातापितृभ्यामुत्सृष्टं" इत्यादि विशेषवचनात्तथेति भाव्यम्।

कश्चित्तु पितुरेवोक्तयुक्त्या मुख्याधिकारित्वं मातुस्तु स्त्रीत्वेन वरस्य कुलोचितत्वतदनुचितत्व-गुणवत्त्वागुणवत्त्वविवेकानर्हतया सतोऽपि मुख्यस्वामित्वस्यासत्कल्पत्वात् कन्याप्रदाने मुख्याधिकारित्व-निरासो युक्त एव। पितामहादीनां स्वामित्वन्तु गौणं मुख्यस्वामित्वगुणयोगात्, गुणन्तु अन्यदीय-यादृच्छिकग्रहणप्रतिबन्धकत्वमित्याह।

'तत्कृतं वाग्दानादिकमकृतमेवे'ति। अथात्र यदि दानमसिद्धं तदा कथं विवाहसिद्धिर्यदित्वि-त्यादिना एवंविधविषयेऽभिहिता सङ्गच्छते, दानस्य विवाहस्वरूपनिर्वाहकत्वात्। अत एव "आहूय दान" मित्यादिवचनैस्तथाविधदानप्रयुज्यग्रहणविशेषस्यैव ब्राह्म्यादिविवाहत्वमुक्तमिति।

अपिच कर्मजन्यफलस्वाम्यबोधकविधेरेवाधिकारविधित्वम्। फलस्वाम्यमत्र फलभोक्तृत्वं तच्च तस्यैव योऽधिकारविशिष्टः। अधिकारस्तावद् विधिवाक्येषु पुरुषविशेषणत्वेन यत् श्रूयते इति। एतेन विधिवाक्यश्रुतविशेषणवत एव फलभोक्तृत्वावगमात् तद्विरहे च तद्व्यतिरेकात्

प्रकृतिस्थः परःपर इत्युक्तप्रकृतिस्थत्वविशेषणविरहेण पुरुषफलोदयाभावात् तत्कृतदानस्य निष्फलत्वमेव। एतस्मादपि दानासिद्धेर्विवाहासिद्धिरावश्यकी। अतः प्रधानस्य निष्पन्नत्वेनेत्याद्युक्तं न समीचीनमिति प्रतिभाति। अत एव मदनपारिजाते "यद्यप्रकृतिस्थदत्ताया विवाहसंस्कारो निर्व्यूढस्तदा प्रधानकर्मणो निष्पन्नत्वेनाधिकारिमात्रवैकल्यात्तत्रापि न सर्वात्मना प्रत्यावर्तनीया कन्या। एवन्तर्हि अनधिकारिणा कृतमकृतमेवेत्येतद्विरुध्येत। सत्यं, तद्विरोधपरिहाराय परिवेत्तृविवाह इव तां प्रत्यावृत्य पुनस्तस्मै एवाधिकारी दद्यात्, अत्र पुनर्विवाहोऽपि परिवेत्तृविवाहाद्विज्ञेय" इत्यभिहितम्।

सत्यमत्रेयं समाधा, दानफलं द्विविधं लौकिकमलौकिकञ्च। तत्र स्वस्वत्वध्वंसपरस्वत्वोत्पत्तिरूपं लौकिकम्। अलौकिकन्तु फलं शास्त्रीयस्वर्गादि। तत्रानधिकारिकृतदानाददृष्टोत्पादाभावेन तादृशस्वर्गाद्यभावेऽपि लौकिकं फलं स्यादेव। तस्य शास्त्रशतेनापि वारयितुमशक्यत्वात्। न हि निषिद्धमानकलञ्जभक्षणादिना तृप्तिः प्रतिबध्यते। अतएव अशौचिप्रदत्तद्रव्यप्रतिग्रहीतुर्दोष इति प्रसिद्धिः, अतः प्रकृते पतितादिकृतकन्यादानस्य स्वर्गाद्यजनकत्वेपि स्वस्वत्वध्वंसपरस्वत्वजनकता स्यादेव।

नच तथापि पातित्यस्य स्वत्वनाशकतया पतितस्य कन्यायां स्वत्वं नास्तीति कथं स्वत्वमूलकदानं सम्भवतीति वाच्यम्, अत्र कश्चित् पुत्रा विभजेयुरित्युपक्रम्य विनष्टे वाप्यशरणे इत्यनेन पुत्रविभज्यधन एव पितृस्वत्वनाशस्याभ्युपेयत्वात्, कन्यादीनामतथात्वेन तत्र स्वत्वनाशकल्पनानुपपत्तेरित्याह। वस्तुतः प्रायश्चित्तप्रागभावाभावसहकृतपातित्यमेव स्वत्वनाशकं वाच्यम्, अन्यथा एकपुत्रस्थले विभागाभावात् पितुः पातित्येन तद्धने पुत्रस्वत्वापत्तिः स्यादिति। एवं सति यत्र प्रायश्चित्तप्रागभावस्तथाविधपतितपित्रादिकृतदानात् स्वस्वत्वध्वंसपरस्वत्वोत्पत्त्यवश्यम्भावे पर्युदस्तेतरेण वरेणापर्युदस्तायाः कन्यायाः यथाविधिपरिग्रहणादिकरणात् संस्कारावश्यम्भावे च "न तस्य पुनरावृत्ति"रित्यभिधानं सङ्गतमेवेति। परिवेदनस्थले तु वरकन्ययोः पर्युदस्ततया प्रतिग्रहादिना संस्कारानुदयेन पुनरावृत्तिर्युक्तैवेति ध्येयम्।

अथास्वतन्त्रदत्तस्यादत्तत्वं नारदवचनेनावगम्यते यथा नारदः—'अदत्तन्तु भयक्रोधकामशोकरुगन्वितैः। बालमूढास्वतन्त्रार्तमत्तोन्मत्तापवर्जितैः'। तत्कथमस्वतन्त्रपित्रादिकृतदानात् कन्यायां स्वामित्वं वरस्येति। सत्यमदत्तत्वकीर्तनस्य दत्ताप्रदानिकप्रकरणीयतया पुनर्ग्रहणार्हताप्रतिपादनाभिप्रायकत्वेन स्वत्वानुत्पत्त्यर्थकत्वाभावात्। अतएव 'कामक्रोधास्वतन्त्रार्तक्लीबोन्मत्तप्रमोहितैः। व्यत्यासपरिहासाभ्यां यद्दत्तं तत् पुनर्हरेदिति' विवादचिन्तामणिधृतकात्यायनवचने पुनर्हरणार्थत्वं स्पष्टमुक्तम्। दत्ताप्रदानिकमाह शुद्धितत्त्वे नारदः। 'दत्त्वा द्रव्यमसम्यक् यः पुनरादातुमिच्छति। दत्ताप्रदानिकं नाम व्यवहारपदं हि तत्'। दत्तस्याप्रदानं पुनरादानं यस्मिन् व्यवहारपदे तत् दत्ताप्रदानिकमिति मिताक्षरा।

एवञ्चास्वतन्त्रपित्रादिकृतभूम्यादिदानादुत्पन्नमपि सम्प्रदानस्वामित्वं तद्दानस्यासम्यक्त्वं विज्ञाय पुनरादातुमिच्छतां पुत्रादीनां पुनरादानान्नश्यति। अनिच्छतां पुत्रादीनां पुनरादानाभावे तु अस्वतन्त्रपित्रादिकृतदानजन्यसम्प्रदानस्वामित्वमेव चिरस्थायि भूत्वा दानक्रियादिलक्षणं यथेष्टविनियोगं जनयेत्। अदत्तपदस्य स्वामित्वानुत्पत्त्यभिप्रायकत्वे पुत्रादेः पुनरादानाभावे तत्र भूम्यादौ सम्प्रदानस्य स्वामित्वहेत्वभावाद् यथेष्टभोगानुपपत्तिः।

प्रकृते तु अस्वतन्त्रदत्तकन्यायां सम्प्रदानस्य स्वामित्वोत्पत्तेर्ग्रहणादिना संस्कारोत्पत्तेश्च पुत्रादयस्तां पुनरादातुं नेच्छन्त्येव। पाणिग्रहणसंस्कारयुक्तायाः पुनर्दाननिषेधाद्दातुमशक्यायाः

कन्याया आमरणकालपर्यन्तं स्वगृहेऽवस्थापनस्य प्रत्यवायहेतुत्वाच्च। अतः पुनरादातुमनिच्छद्भिः पुनरादानाभावे प्रागुत्पन्नं कन्यायां वरस्वामित्वमव्याहतमेवेति न तस्य पुनरावृत्तिरिति कथनं स्मार्तपादानां सङ्गतमेवेति ध्येयम्।

'मातुः पूर्व'मिति। अथ मातुः पूर्वं मातुलाधिकारे किं मानमिति चेत् मातामहो मातुलश्चेति नारदीयपाठक्रम एवेति ब्रूमः। न च मातामहो माता चेति कन्याप्रदः पूर्वाभावे प्रकृतिस्थः परः पर इति विष्णूक्तस्य पाठक्रमापेक्षया बलवतः शाब्दक्रमस्यानुरोधे मातामहात् परं मातुरेवाधिकार इति वाच्यम्, मातुलाधिकारबोधकनारदवचनस्य माता त्वभावे सर्वेषामित्यादि शाब्दक्रमेण मातुलाभावे एव मातुरधिकारस्य प्रतिपादनात्। एवं सति न विष्णूक्तशाब्दक्रमस्यापि बाधः, विष्णूना मातुलाधिकारस्यानुक्तत्वात् मातामहाभावे मातुरधिकारं वदतोऽपि विष्णोर्मातुलपर्यन्ताभावे मातुरिति स्वरसस्य नारदवचनैकवाक्यतयाऽवगतेश्च। 'विष्णुवचने'ति। पिता पितामहो भ्राता इत्यादिना विष्णुवचनस्येत्यर्थः। 'एवञ्चे'ति विष्णुवचनैकवाक्यत्वे सति। 'सकुल्ये'ति पितृपक्षीयसकुल्येत्यर्थः। 'वक्ष्यमाणे'ति पिता पितामहो भ्राता सकुल्यो जननी तथेति कथयिष्यमाणेत्यर्थः। 'शाब्दक्रमस्ये'ति पूर्वाभावे प्रकृतिस्थः परः पर इति विष्णुवचने पूर्वनाशे प्रकृतिस्थः परः पर इति, याज्ञवल्क्ये च वाचकशब्देनैवोपस्थापितस्य कन्यादानाधिकारिणां पौर्वापर्यक्रमस्येत्यर्थः। श्रुत्यर्थपठनस्थानमुख्य-प्रावर्त्तिकाः क्रमाः, एते च षट्क्रमा मीमांसकपादैरभिहिता, एतेषां षण्णां पूर्वपूर्वापेक्षया परपरस्य दौर्बल्यमपि च, दौर्बल्यकारणं नेह विस्तृतिभयेन प्रस्तूयते। अत्र श्रुतिक्रम एव शाब्दक्रमः।

तदयं कन्यादानाधिकारिनिष्कर्षः। 'पिता पितामहो भ्राता सोदरश्च तथैव च। वैमात्रेय-स्ततः पश्चात् सकुल्याः पैतृकास्तथा। मातामहो मातुलश्च माता चैव ततः परम्। मातामह-सकुल्याश्च प्रकृतिस्था यथाक्रमाः॥ कन्याप्रदाः पूर्वनाशे विद्वद्भिः परिकीर्तिताः। तदभावे प्रदद्यात्तु चात्मानं स्वयमेव हि' ।२६॥

'अत्रे'ति दत्तामपि हरेत् कन्यां श्रेयांश्चेद्वर आव्रजेदित्याद्युक्तविषये। 'विशेषं' एकस्मै वाग्दत्तायाः कन्यायाः पुनरन्यस्मै श्रेयसे वराय दानं आसुरादिविवाहत्रयमात्रविषयकमेवं विशेषम्। 'पञ्चष्वि'ति ब्राह्मदैवार्षप्राजापत्यगान्धर्वेषु। त्रिषु आसुरराक्षसपैशाचेषु। 'प्रतिश्रुत्ये'ति इयं कन्या अमुकाय दातव्येति प्रतिज्ञाय इत्यर्थः। अधर्मपदस्यासुरादिवत् नञो विरोधार्थकतया पापपरत्वमेवायाति। तथाच यत्किञ्चित् पापयुक्तायापि दानं न स्यादिति व्याचष्टेऽधर्मोऽत्रेति। अत्र गौतमवचने। विवादरत्नाकरोक्तमस्फुटं स्फुटयितुमाह 'वशिष्ठ' इति। 'कुलशीले'ति। कुलमाभिजात्यं शीलं सदाचारस्ताभ्यां परित्यक्तस्य। 'पण्डादी'ति, आदिना पङ्गुप्रभृतीनां ग्रहणं, तथाच ब्रह्मवैवर्ते-'पङ्गवे चाङ्गहीनाय अन्धाय वधिराय च। जडाय चैव मूकाय क्लीवतुल्याय पापिने। ब्रह्महत्यां लभेत् सोऽपि यः स्वकन्यां ददाति चे'त्यादि। पण्डो नपुंसकः। पण्डादि पतितेति समाहारद्वन्दः. एवमुत्तरत्रापि। अपस्मारः मृगीतिप्रसिद्धरोगस्तद्युक्तस्येत्यर्थः। 'रोगिणा'मिति। उन्मत्तः पतितः क्लीवो दुर्भगस्त्यक्तबान्धव इति वचनादुन्मादादिपापरोगवताम्। 'वेशधारिणां' धनार्जनार्थं छद्मना नानाविधवेशधारिणामिति कश्चित्। वस्तुतः गृहस्थाश्रमाविहितरक्तादिवसनधारिणां, नारसिंहे "न रक्तमुल्वनं वासो न नीलञ्च प्रशस्यते" इत्यादि वचनात्। 'तज्जः' ब्राह्मविवाहो-द्वाजपुत्रः। 'पुनाती'ति खल्वयं यदि सुकृतकृद्भवति तदैवं नान्यथेति। अत एव ब्राह्मीपुत्रः सुकृत-कृन्मोचयत्येनसः पितॄन् इति मनुवचनव्याख्यानावसरे मन्वर्थमुक्तावल्यां यदि सुकृतकृद्भवति तदा पापान्मोचयति पित्रादीन् नरकादुद्धरतीत्यभिहितम्। 'यज्ञस्थाये'ति। यज्ञपदं ज्योतिष्टोमादि-परमिति कुल्लूकभट्टाशयः। तथाच यथाविधि तादृशयज्ञकर्त्रे पुरोहितायालङ्कृत्य कन्यादानं यस्मिन्

विवाहे स दैवविवाह इत्यर्थः। 'चतुर्दश' इति, षडिति षडवंश्यानिति 'दैवोढाजः सुतश्चैव सप्त सप्तपरा वरान्, आर्षोढाजः सुतस्त्रीं स्त्रीन् षट् षट् कायोढजः सुत' इति मनुवचनाद्विज्ञेयम्। आदायार्षस्तु गोयुगमिति प्रतीकं व्याकर्तुमाह आदायेति। 'गोद्वयमि'ति स्त्रीगवी पुङ्गवश्च एतद्वयं एकमिथुनं द्वे वा मिथुने इत्यपि, एकं गोमिथुनं द्वे वा वरादादायेति मनुवचनादवसेयम्।

अत्र 'धर्मत' इति धर्मार्थं यागादिसिद्धये, कन्यायैवादातुं न तु शुल्कबुद्ध्येति कुल्लूकभटः। सह धर्मं चरतामिति नियमं कृत्वेति यदुक्तं तत् कुल्लूकभट्टव्याख्यानुसारेण, तथाच कुल्लूकभट्टेनेदमभिहितं सह युवां धर्मं कुरुतामिति सुताप्रदानकाले वचसा पूर्वं नियम्येत्यादि। कः प्रजापतिरिति। तथाचैकाक्षरकोषे–कः प्रजापतिरुद्दिष्टः को वायुरितिशब्दित इत्यादि। आसुरो द्रविणादानादित्यस्य तात्पर्यार्थमाह 'शास्त्रीये'ति। 'संख्यानियमे'ति। गोयुगमित्यादिना गोयुगमेवेति न्यूनसंख्यकव्यवच्छेदनियम उक्तः। आसुरे च तादृशनियमो नास्ति, अत एव 'ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः। कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म उच्यते'। इति मनुवचनव्याख्याने मन्वर्थमुक्तावल्यां कन्याया ज्ञातिभ्यः पित्रादिभ्यः कन्यायै वा यथाशक्ति धनं स्त्रीधनं दत्त्वा कन्याया आप्रदानं स्वीकारः, वरस्येति शेषः। स्वाच्छन्द्यात् स्वेच्छया न त्वार्ष इव शास्त्रीयधनजातिपरिमाणनियमेन, स आसुरो विवाह इत्युक्तम्। गान्धर्वविवाहधर्ममाह 'कन्यावरयोरि'ति। एतदपि मनुवचनानुसारेणोक्तं यथैतन्मनुवचनमिच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च, गान्धर्वः स तु विज्ञेयः मैथुन्यः कामसम्भवः। अत्र कुल्लूकभट्टेन––इच्छया परस्परानुरागेण। अन्योन्यसंयोगः परस्परालिङ्गनादिरूपो यत्र वर्तते स गान्धर्वः। यस्मात् कन्यावरयोरभिलाषादसौ सम्भवति अत एव मैथुन्यः मैथुनाय हितः। सर्वविवाहानामेव मैथुन्यत्वे यदस्य मैथुन्यत्वाभिधानं तद्विवाहात् पूर्वं सत्यपि मैथुने न विरोध इति प्रदर्शनार्थमभिहितम्। 'प्रसह्ये'ति प्रसह्य वलात्कारेण कन्याया हरणं राक्षसविवाह इत्यर्थः।

एतन्मनुवचनपूर्वार्धन्तु 'हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहा'दिति। यदा हननकर्तुः शक्त्यतिशयं विज्ञाय पित्रादिभिरुपेक्ष्यते तदा नावश्यकं हननादि। यदि कन्यापक्षः प्रतिपक्षतां याति तदा हननादिकमपि कर्तव्यमित्यर्थप्राप्तमनूद्यते हत्वेत्यादिना। हत्वा कन्यापक्षान् विनाश्य अथवा काष्ठादिना ताडयित्वा, छित्वा तेषामङ्गच्छेदं विधाय, खड्गादिप्रहारेण खण्डशः कृत्वा, भित्त्वा प्राकारपुरदुर्गादि, हा पितः, हा भ्रातरनाथाहं ह्रिये इति वदन्तीं रुदन्तीं अश्रुणि मुञ्चन्तीं यदर्थं कन्यामपहरति गृहादिति। अनेन कन्याया अनिच्छोक्ता गान्धर्वाद्विशेषोऽयम्।

'सुप्ता'मित्यादेरयमर्थः। सुप्तां निद्रयाभिभूतां, 'मत्तां' मद्यमदविह्वलां, 'प्रमत्तां' वातसंक्षोभेन नष्टचेतनां शीलसंरक्षणरहितामिति यावत्। रहो विजनदेशे यत्र विवाहे मैथुनधर्मेण प्रवर्तते स पैशाचो विवाहः, सर्वविवाहानां पापिष्ठः पापहेतुरधर्मः, धर्मापत्यं न ततः सम्पद्यते इति। 'एवम्भूते'ति उक्तप्रकारेत्यर्थः। 'त्यागादी'ति आदिपदेन परस्परालिङ्गनरूपसंयोगहरणोपगमा एव उच्यन्ते। ग्रहणे इति दानप्रयुज्यस्वीकरणे। एतेन स्मार्तमते संयोगाद्यनन्तरं दानमस्ति विज्ञायते चैवम्। गान्धर्वादौ न केवलं संयोगादिकमपि तु वैवाहिकेतिकर्तव्यतापि तत्रास्तीति प्रमाणयति देवल इति॥ ३०॥

'अक्षता वे'ति। अत्र वा शब्द इवार्थे तथाचाक्षतयोनिरिव क्षतयोनिः, अर्थात् लब्धपुरुषसम्पर्का संस्कृता भवेदित्येकं वाक्यमपरञ्च पुनः संस्कृता पुनरुढेति दीपकलिकायाम्। सती नारी पुनर्भूसंज्ञिता भवेदिति कश्चित्। तन्न, वाक्यद्वयकल्पनायां गौरवात्, संस्कृता भवेदित्यस्याध्याहारे गौरवाच्च। वस्तुतो या कृतविवाहा सती क्षतयोनिर्वाक्षतयोनिर्वा भर्त्रा यथाविधि पुनरुह्यते

सा पुनर्भूरित्यर्थः। याज्ञवल्क्यटीकायामपरादित्योऽप्येवमाह। मनुनापि "या गर्भिनी संष्क्रियते" इत्यादिना तथा 'वोढुः तथा कन्यासमुद्भव'मित्यादिना च क्षतयोनेरपि विवाहसंस्कारोऽभिहितः। अतएव मन्वर्थमुक्तावल्यां 'ताः क्षतयोनयो वैवाहिकमन्त्रैः संष्क्रियमाना अपि' इत्यादिना 'नासौ धर्मो विवाह इत्यन्तेन तादृशविवाहस्याधर्मत्वं' प्रतिपादितम्। एतदपि गान्धर्वेतरविषये, गान्धर्वश्चाभिगमनपूर्वकोऽपि भवति क्षत्रियविषये तस्य धर्मत्वस्य मनुनाभिहितत्वात्। 'नियोगधर्ममुपक्रम्ये'ति। विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि। एकमुत्पादयेत् पुत्रं न द्वितीयं कथञ्चनेत्यनेन मनोरुपक्रमो बोद्धव्यः। यस्या म्रियेतेत्यत्र सत्ये प्रतिज्ञायां, इयं कन्यामुकाय दातव्येति प्रतिश्रुतिरुपायामिति यावत्। पतिर्वरः, विवाहानन्तरमेव पतित्वनिष्पत्तेः। म्रियेतोर्ध्वं वरो यदीति वशिष्ठवचने वरशब्दश्रुतेश्च। तां कन्यां 'अनेन' घृताभ्यक्तत्वादिनियोगधर्मेण। प्रागुक्तनियोगधर्मबोधकवचने पुत्रोत्पादन एव घृताभ्यक्तत्वादिनियोगधर्माणां प्रयोजकत्वस्यावगते 'विन्देत'त्यस्यापत्योत्पादनार्थं गृह्णीयादित्यर्थो मन्तव्यः। तथाच तादृशनियोगधर्मेणापत्योत्पादनार्थं तत्कन्यापरिग्रह इति तात्पर्यम्। अत्र विशेषमाह 'यथाविधी'ति। स देवरो 'यथाविधि' विवाहविधिना एनां स्वीकृत्य भजेतोपेयादित्यन्वयः। को विशेषस्तत्राह 'शुक्लवस्त्रां शुचिव्रतामि'ति। अत्र शुचिव्रतां वाङ्मनःकायशौचशालिनीम्। अनुमत्यसत्त्वे तु साऽन्यस्मै देयेत्याह 'अद्भिरि'त्यादि। वचनमिदं स्वीकारात् पूर्वं वरमरणविषयकं दत्तायामित्यनेन दानस्यैवोपस्थितेरुर्ध्वमित्यत्रापि तदन्वयो युक्तः। ननु विवाहानन्तरं पाणिग्रहणात् पूर्वं तथात्वे कुमारी पितुरेव सेत्यस्यान्वयानुपपत्तिः स्यात् स्वीकारप्रागभावसहकृतदानस्यैव स्वामित्वजनकतया वरस्य तत्र स्वामित्वोत्पत्तेः प्रदानं स्वाम्यकारणमिति मनुवचनाच्च।

'पाणिग्रहणमन्त्रे'ति। अत्र च पाणिग्रहणपदमधिकरणसाधनं 'करे गृह्य तथा कन्या'मित्यादिना कन्याप्रतिग्रहेतिकर्तव्यतायां पाणिग्रहस्योक्तत्वात्। अत एवापरादित्येन याज्ञवल्क्यटीकायां "नच मन्त्रोपनीता मन्त्रवता विवाहकर्मणा उपनीता प्राप्ता संस्कृता न भवतीत्यर्थः" इत्यन्तेन तथा दर्शितम्। यदि तावत् पाणिग्रहणपदस्योक्तार्थत्वे कष्टकल्पनेति धीमद्भिरनुभूयते तथाप्यसङ्गतिरनिवार्या। तथाहि यथा युगान्तरविषये पाणिग्रहणात् पूर्वं मृते वरे पुनःसंस्कारबोधकशास्त्रमेव पुनर्दानाधिकारं प्रसञ्जयेत्तथा कृतपाणिग्रहणजन्यविलक्षणसंस्कारयुक्ताया अपि पाणिग्राहे मृते बाला केवलं मन्त्रसंस्कृता सा चेदक्षतयोनिः स्यात् पुनः संस्कारमर्हतीति वशिष्ठवचनेनापि पुनः संस्कारोपदेशाद्दातुरपि पुनर्दानाधिकारोऽव्याहत एवेति न च मन्त्रोपनीता स्यादित्युत्तरार्धं सर्वथानुपपन्नमेवेति भाव्यम्

'एतत् परमेवे'ति उक्त-वशिष्ठवचनसमानविषयकमेव यमवचनमिति परेणान्वयः। विवाहात पूर्वं वरमरणे तत्कन्याया अन्यस्मै पुनर्दानस्य शास्त्रीयतया सकृत् कन्या प्रदीयत इत्यादिवचनविरोधः स्यात्तमपनेतुमाह कन्यायाः 'सकृद्दानन्त्वि'ति। सकृद्दानं सकृदंशो निपतति इत्यादिवचनबोधितम्। मनुना सकृत्पदेन सकृदेवेति प्रतिपादनात् पुनर्दाननिषेध एवोक्तः, अन्यथा सकृत्पदस्य वैयर्थ्यापत्तिः स्यादतः सकृद्दानन्त्वित्यस्य पुनर्दाननिषेधस्त्वित्यर्थ इति कश्चित्। 'अनेकेभ्य' इति। आर्षत्वाद्बहुवचनम्, अन्यथा नञ्तत्पुरुषस्योत्तरपदवदित्यनेनैकवचनमेव साधु स्यादिति। यच्च भवन्त्यनेके जलधेरिवोर्मय इति काव्येऽनेक इति बहुवचनं तत् प्रत्येकशोऽनेकत्वविवक्षया।

अत एव यत्र सजातीयपदार्थानां प्रत्येकशोऽनेकत्वं विवक्ष्यते तदा वचनान्तरमप्ययं प्राचां प्रवादः समीचीन एवात्र भातितराम्। 'वरागम'इति। वराणामागम इति विग्रहः। उपक्रमेऽनेकेभ्य इति श्रुतेः। सर्वेषामिति षष्ठी निर्धारणे, तेषां सर्वेषां मध्ये आद्यवर इत्यर्थः।

वरशब्दस्य विवाहकर्तृपरत्वमाशङ्क्य समाधत्ते वर इति। शुल्कमिति वाग्दानव्ययनिर्वाहक धनमित्यर्थः। धार्या तदुद्देशेन दानार्थं गृहे रक्षणीया। समात्रयमिति "संवत्सरो वत्सरोऽब्दो हायणोऽस्त्रीशरत् समा" इत्यमरोक्तेः वर्षत्रयमित्यर्थः। - तदानीमिति सप्तपदीगमनान्तरकाले ॥३१॥

सपिण्डस्य गोत्रापहारित्वप्रतिपादकवचनमिति यथा श्राद्धविवेके शातातपः 'संस्थितायान्तु भार्यायां सपिण्डीकरणान्तिकं पैतृकं भजते गोत्रमूर्ध्वन्तु पतिपैतृक'मिति। संस्थितायां मृतायामित्यर्थः। 'तच्छाख्यन्तरीय'मिति। अथात्र कथं शाखिविशेषे वचनमिदं व्यवस्थापितं यत्र सप्तपदीगमनं पाणिग्रहणं वा न जातं तत्रैव विषयसम्भवात् विवाहस्य गोत्रापहारकत्वं न कुत्रचिदुपलभ्यते, नच तथात्वे विवाहेन च तस्याः पितृगोत्रतानिवृत्तेरिति स्वोक्तिः स्मार्तपादानां निर्मूलेति वाच्यं। तत्र विवाहेनेत्यस्य साङ्गविवाहेनेत्यर्थकत्वात् 'स्वगोत्राद्भ्रश्यते नारी विवाहात् सप्तमे पदे' इत्यादौ तथा दर्शनात्।

सत्यं, अप्रत्तायां पिता कुर्यात् प्रत्तायान्तु पतिस्तथा स्वेन स्वेनैव गोत्रेण संस्थितायां तिलोदकमिति श्राद्धविवेकधृतशातातपवचनान्तरतः दानानन्तरप्रतिगृहीताया अर्थाद्विवाहितायाा भर्तृगोत्रभागित्वावगमात् सपिण्डनगोत्रापहारबोधकवचनं शाख्यन्तरीयं यदुक्तं तत् साध्विति भाव्यम्। विवेककृता चान्यथा समाहितं तथाहि पितृगोत्रभजनञ्च आसुरादिनिन्दितविवाहोढाविषयमिति स्मृतिमञ्जरीकारप्रभृतयः—इति पूर्वमभिधाय एतेनासुरादिनिन्दितविवाहोढाया एकमूर्तित्वमेकगोत्रत्वञ्च न चतुर्थीहोमादिफलं किन्तु सपिण्डफलमित्यभिहितम्। अत्र तर्कालङ्कारः—आसुरादीति अतएव शङ्खधरवचनं—ब्राह्मादिषु विवाहेषु या चापि कन्यका भवेत्। भर्तृगोत्रेण कर्तव्यास्तस्याः पिण्डोदकक्रियाः। आसुरादिविवाहेषु पितृगोत्रेण धर्मविदिति वचनमत्र प्रमाणं प्रदर्शितवान्। तदयं संक्षेपः—पाणिग्रहणसप्तपदीगमनान्यतरप्रागभावे सति पाणिग्रहणानन्तरं सप्तपदीगमनानन्तरं वा गोत्रापहारस्तदभावे विवाहानन्तरमेवेति भाव्यम्।

'अत एव' सप्तपदीगमनानन्तरं भर्तृगोत्रभागित्त्वादेव। 'अनुमन्त्रिते'ति। "अथैनामनुमन्त्रयते ध्रुवाद्यौरित्येतयर्चे"ति गोभिलपूर्वसूत्रं तदयमर्थः। 'अथेति'—अरुन्धतीदर्शनानन्तरं ध्रुवा द्यौरिति, मन्त्रेण एनां पत्नीं अनुमन्त्रयेद् बोधयेत् पतिरित्यर्थः। अनन्तरमाह गोभिलः--अनुमन्त्रिता गुरुं गोत्रेणाभिवादयेत् सोऽस्या वाग्विसर्ग इति। उक्तरूपेणानुमन्त्रिता बोधिता सती गुरुं पतिं "पतिरेको गुरुः स्त्रीणा"मिति वचनात्, गोत्रेण पतिगोत्रेणाभिवादयेत् मनूक्तप्रकारेणाभिवादनं कुर्यादित्यर्थः। तदभिवादनप्रकारः विस्तृतिभयान्नेह प्रस्तूयते।

अभिवादने यः पादग्रहणविशेषो मनुनाभिहितः स इह वध्वास्तथानाचरन्नाभिहितः। सोऽस्या वाग्विसर्ग इति स एवाभिवाद एवास्या वध्वा वाग्विसर्गः, वाक्प्रसरणम्, तस्मात् पूर्वं मौनमिदानीं मौनत्यागः। एवमेव संस्कारतत्वे स्मार्तपादैरभिहितम्। 'एतेने'ति स्वगोत्राद्भ्रश्यते नारी विवाहात् सप्तमे पदे इत्यादि हारीतवचनेन शिष्टव्यवहारमूलकभट्टनारायणव्याख्यानेन चेत्यर्थः। 'पितृगोत्रेणे'ति पत्यभिवादनमिति शेषः। 'तावुभावि'ति दम्पतीत्यर्थः। 'त्रिरात्रं' दिनत्रयं क्षारलवणवर्ज्जितं भुञ्जानौ मैथुनमकुर्वाणौ 'भूमा'विति खट्टादेः प्रतिषेधार्थं न तु प्रस्तरकम्बलादीनामपीति। 'सह शयीयातां' एकशय्याशयनं कुर्यातामिति समुदयार्थः। 'तत्परसूत्रे' अभिवादनबोधकगोभिलसूत्रस्य परत्रेत्यर्थः। भट्टनारायणव्याख्यानादिति हेतोः सामगानां विवाह इति साध्येनान्वयः।

'अत एव' पत्यभिवादनान्तकर्मणा विवाहसमाप्तेरेव। 'आदिशब्देन ग्रहण'मिति समशनीयचरुहोमादेर्विवाहाङ्गत्वाभावादादिपदेन तद्ग्रहणं युक्तमिति भावः। 'विवाहादि'रिति। यो विवाहादिः कर्मगणोऽभिहितः स किमवधिक इत्याह गर्भाधानमिति प्रतीकम्। अत्र वचने

अन्तशब्दः समीपार्थो न त्ववयवार्थः, तेन सामगानामपि गर्भाधाने श्राद्धमस्तीति गोविन्दानन्दादयः। मिश्रसम्मतमप्येतत्। अत एव श्राद्धचिन्तामणिः "केचित्तु गर्भाधानमपि गणान्तर्निविश्य अत्रापि श्राद्धप्रतिषेधं वर्णयन्ति" तन्न, निषेककाले सोमे चेत्यादिना गर्भाधानोपक्रमे श्राद्धविधानादित्याह। स्मार्तपादैस्तु दशान्तः पट इतिवत् अन्तपदस्यावयवार्थमभ्युपेत्य गर्भाधाने सामगैः श्राद्धं न कार्य-मित्यभिहितम्। अतः समशनीयादीनामादिपदग्राह्यत्वात् साङ्गविवाहाद्भिन्नास्ते इति, प्रतीयन्ते इति शेषः। 'ततश्च' तेषां साङ्गविवाहभिन्नत्वाच्च। अशौचे कर्मणां त्याग इति सामान्यतः कर्मवर्जनमुक्तं तत्र विशेषयति 'नाशौच'मित्यादि। 'राजकर्मणी'ति राजकर्मव्यवहारदर्शन-शान्तिहोमादिकर्मणीत्यर्थः। विवादे वादिप्रतिवादिनोर्न्यायनिरुपणेन, दुर्भिक्षेऽन्नदानेन, उपसर्गे च शान्तिहोमादिना प्रजारक्षणाय राज्यासनेष्ववस्थानमशौचाभावकारणमिति तात्पर्यम्।

'व्रतयज्ञविवाहेष्वि'ति व्रतं व्रतत्वेन परिभाषितमनन्तव्रतादीति सङ्कल्पकौमुदी सङ्कल्पाद्यङ्गककर्मप-रमिति संस्कारतत्त्वे। चान्द्रायणादिव्रतमिति प्राञ्चः। चरुकरणकयागो यज्ञः। विवाहपदं संस्कार-मात्रोपलक्षणं—विवाहादौ च संस्कारे वृद्धिश्राद्धे कृते सति। सङ्कल्पे ग्रहशान्तौ च नाशौचं मन्वते वुधा इति संस्कारतत्त्वीयग्रहयज्ञप्रकरणे निर्णयामृतधृतवचनात्। अत उपनयनादिकं वृद्धिश्राद्धान-न्तरं अशौचे कार्यमिति। इष्टिस्तु चरुणा यागः पशुस्तु पशुना स्मृतः। एतच्छेषः क्रतुः प्रोक्तः होमोऽन्यत् पूजनं स्मृतमिति वचनात् यज्ञहोमयोर्भेदोऽवगन्तव्यः। होमार्चनयोरपि सङ्कल्प एवारम्भः सन्दंशपतितन्यायात्। जपः पुरश्चरणमिति कश्चित्। अपरस्तु महाभारतपाठादिरिति।

'आरब्धे' इति। नन्वारब्धे सूतकं न स्यात् इत्यनेनैवानारब्धे सूतकं ज्ञायते तत्कथमनारब्धे तु सूतकमिति पुनरुक्तम्? सत्यमेतद्विशेषणेनायमर्थो लभ्यते, अनारब्धे यत् सूतकं प्रतिबन्धकमारब्धे तत् सूतकं प्रतिबन्धकं न भवेदित्यर्थः। तेन यदा प्रतिनिधिना आरब्धायां क्रियायां प्रतिनिधेरशौचं जायते तदा प्रतिनिधिना क्रिया न कार्या, अनारब्धे तस्यानधिकारेण तत्सूतकस्य प्रतिबन्धकत्वा-भावात्। नन्वेवं पुत्रादिप्रतिनिधिस्थले का गतिः। अनारब्धेऽपि तत्सूतकस्य प्रतिबन्धकत्वात्। सत्यमनारब्धे यस्य कर्तुर्यस्मिन् कमणि यत् सूतकं प्रतिबन्धकं तस्य कर्तुस्तस्मिन् कर्मणि तत्सूतकं प्रतिबन्धकं नेत्यर्थः। काम्योपवासे प्रक्रान्ते त्वन्तरा मृतसूतके। तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जित-मिति कूर्मपुराणवचन-गर्भिणीसूतिकानक्तंकुमारीचेत्यादिमत्स्यपुराणवचनाभ्यामेकवाक्यतया इदं वचनं केवलमशौचमध्ये विवाहातिरिक्तकर्मणि प्रतिनिधिविधायकं विवाहे तदभावात्। कश्चित्तु कन्याविवाहपरं विवाहपदं तेन सर्वांशे प्रतिनिधिविधायकत्वं वचनस्यास्येति।

'पाकपरिष्क्रिये'ति। पाकः परिष्क्रियते सम्पाद्यते अनया अग्न्युद्धरणक्रिययेत्यर्थः। अतएव तदुद्धरणस्येति वक्ष्यमाणं सङ्गच्छते। 'तत्र'दर्शे। 'तस्ये'ति साग्नेरित्यर्थः। 'उद्देश्यतागर्भत्वा'दिति। यमुद्दिश्यारम्भतया परिभाषितं यत्कर्मानुष्ठीयते तदेव तस्यारम्भ इत्यर्थः। 'अग्न्याधानार्थे' अग्न्याधानोद्देश्यके। एतस्य श्राद्धे इत्यनेनान्वयः। 'एवञ्चे'ति। आरम्भपदार्थस्य उद्देश्यता-गर्भतया विवाहार्थकृतश्राद्धेन समशनीयादीनामारम्भाभावे सति। प्रायश्चित्तप्रकरणप्रोक्तां मुख्यकाला-करणजन्यपापक्षयाय महाव्याहृतिहोमरुपां निष्कृतिं प्रायश्चित्तक्रियाम्।३२।।

गौणेषु तेषु कालेषु इत्यादिना समशनीयादीनां गौणकालकर्तव्यत्वमुक्तं, किन्तद्गौणकालत्व-मित्याकाङ्क्षायामाह 'गौणकालमाहे'ति। यद्वेति पक्षान्तरम्, एवमागामियागीयेत्यादिवचनमभिधाय यद्वागामीत्यादेरभिधानात् पक्षान्तरमिति। अत्र मुख्यत्वमविवक्षितं संस्कारा अतिपत्येरन्नित्यत्र बहु-संस्काराणां कर्तव्यताबोधनात्। आगामिक्रियाकरणयोग्यकालस्येति पूर्वोक्तार्थः। 'प्राक्तनकर्मणी'ति

सप्तमी षष्ठ्यर्थे। आगामिक्रिया चात्र सजातीयागामिक्रियेत्यर्थः। मुख्यकालादधस्तन इति मुख्यत्वमत्र विवक्षितम्। 'अधस्तनः' पूर्वः, एतेनान्तरालस्य कालस्य गौणकालत्वमायातम्।

अथ नान्दीश्राद्धं विवाहादावित्यादिना नान्दीश्राद्धस्य विवाहारम्भत्वमुक्तमेवेति तत् किमिदानीं विवाहस्यादौ नान्दीमुखश्राद्धस्य विवाहारम्भकत्वम् 'एवञ्चे'त्यादिना पुनरभिधीयते इति मैवं, तत्-श्राद्धस्य नित्यताभिधानार्थं तत्कथनमिति।

'सर्वाणी'ति गोभिलगृह्योक्तानि कर्माणीति पूर्वोक्तार्थः। गोभिलेन संस्कारकर्माण्यभिधाय एतत् सूत्रस्योक्तत्वात्। 'विवाहमात्रस्ये'ति प्रथमविवाहस्य एवं द्वितीयविवाहस्य मात्रपदेन लाभः। 'अवश्य'मिति नियमादित्यनेन विधिनियमस्य नित्यत्वज्ञापनादिति भावः। अष्टकामाघ्यभ्युदयास्तीर्थ-पात्रोपपत्तयः। पितॄणामतिरेकोऽयं मासिकान्नात् ध्रुवः स्मृत इत्यनेनाभ्युदयपदवाच्यविवाहानिमित्तक-श्राद्धस्य ध्रुव इत्यनेनावश्यकत्वावगमाच्च। 'द्वितीयमि'ति साग्निककर्तव्यपिण्डपितृयज्ञापेक्षया।

'स्वपितृभ्य'इति। नचात्र स्वपदं व्यर्थमिति वाच्यं, पिता सुतसंस्कारकर्मसु पितृभ्यः पिण्डान् दद्यादित्युक्तौ सुतस्यापि वाक्योपस्थितत्वेन तदीयपितृगणानां अर्थात् पितामहादीनां प्राप्तौ तद्व्या-वर्तनाय स्वपदं सार्थकमेवेति। अथ पितुः प्रथमान्तोपस्थितत्वेन प्राधान्यात् तत्पितृगणस्यैव प्राप्त्या स्वपदमनर्थकमिति मैवं, सुतस्यापि संस्कारजन्यफलभागित्वेन ततोऽपि प्राधान्याङ्गीकारात् तस्यैव सम्वन्धित्वेन उपस्थितौ स्वपदेन सुतपितृगणव्यावर्तनमावश्यकमेवेति। न च पितुः पित्रादीनां सुतपितामहादीनाञ्चैक्यात् तद्व्यावर्तनमनर्थकमिति वाच्यं मातामहपक्षभेदात्, अत एव स्वपदं सुत-मातामहादिव्यावृत्त्यर्थमिति श्राद्धविवेकः। अन्ये तु स्वपदं सान्निध्यात् पितृपरमेव, तथाच वस्वादि-पितृगणव्यावृत्तये स्वेति, यजमानस्य पित्रे इत्यादिवत्।

'सुतसंस्कारग्रहणा'दिति। एतेन सुतपदस्य व्यावृत्तिर्दर्शिता। तथाहि सुतपदाभावे संस्कार-कर्मस्वित्युक्तौ पितृपदस्य सम्बन्धिशब्देन यद्यपि पुत्रसंस्कारकर्मण्येवायान्ति तथापि पुत्ररूप-सम्बन्ध्यन्तरस्य किं संस्कारकर्मणा सहान्वय उत संस्कारेणेति संशयात् पुत्रकर्तृकसंस्कारकार्येऽपि पितुराभ्युदयिककरणप्रसक्त्या द्वितीयविवाहे पुत्रस्य पितृकर्तृकाभ्युदयिकप्रसङ्गः स्यात्। सति तु सुतपदे आसत्तिवलेन संस्कारेणान्वयः न तु कर्मणेति। तथाच सुतनिष्ठा ये संस्कारास्तज्जनक-कर्मस्वित्यर्थः। तदेव स्फुटयति सुतसंस्कारग्रहणादित्यादिना। आद्येन संस्कारसिद्धौ दृष्टान्तमाह 'तथाचे'ति। 'सीमन्तोन्नयन'मिति। सीमन्तः केशरचनाविशषस्तस्योन्नयनं यत्रेति शेषः। स्थानत्रितये शुक्लेन शलवकीजन्तुकण्टकेन "यास्ते" इत्यादि मन्त्रेण सीमन्तमूर्ध्वं यत्र नयतीति तात्पर्यम्। शल्वकी जन्तुः (शेया जन्तुत्वेन ख्यातः)। प्रथमे गर्भे इत्युपादानात् द्वितीयादि गर्भे न कालनियम इति।

तथाच गोभिलः—अथ सीमन्तकरणं प्रथमे गर्भे चतुर्थे मासि, षष्ठे अष्टमे वेति। अत्र वाशब्दै-क्याच्चतुर्थमासादीनां न तुल्यवद्विकल्पः किन्तु पूर्वपूर्वकालः प्रशस्तः, समर्थस्य क्षेपायोगादिति न्यायात्। अतो नवममासादौ प्रायश्चित्तं कृत्वैव कर्तव्यम्। प्रथमगर्भे इत्युपादानात् यदि कथञ्चिद-कृत एतस्मिन् संस्कारे गर्भनाशे पुनगर्भोत्पत्तौ नायं कालनियमः, किन्तु गर्भस्पन्दने सीमन्तोन्नयनं यावन्न बालप्रसव इति शङ्खलिखितोक्तकालो ग्राह्यः। एवमेव संस्कारतत्त्वे स्मार्तपादैरभिहितम्।

तथाच यथा सीमन्तोन्नयनसंस्कारेण सकृत् कृतेन स्त्रिया आहितसंस्कारवत्त्वया न पुनस्तथा-चरणमेवमत्रापीति दृष्टान्तदार्ष्टान्तिकयोरर्थः। 'अत्रे'ति सीमन्तोन्नयने।

'पात्रजातानां'मिति पात्रं पात्राधारः स्त्रीरूपः। सुतरां सकृत्त्वमिति एकत्र दृष्टः शास्त्रार्थो बाधकमन्तरेणान्यत्रापि कल्प्यते इति तात्पर्यम्। अत्र न्यायमाह "सकृत् कृते" इत्यादि। एष द्वितीयो हेतुः प्रागुक्तसंस्काराभिधानेति हेत्वपेक्षया वेदितव्यः। न च सीमन्तोन्नयनसंस्कारस्य सकृत्कृतत्वे 'सकृच्च संस्कृता नारी' इत्यादिकं वचनमेव प्रमाणं, इह तु तथाविधवचनाभावात् कुतो नासकृत्त्व-मित्यभिप्राय एव द्वितीयहेतावधिगन्तव्यः।

न चात्र पिण्डपदस्य गयापिण्डवत् प्रधानीभूतपिण्डपरत्वमस्त्वित्याह 'पिण्डानिती'ति। 'विष्णु-पुराणवचने'ति, कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनः। नामकर्मणि बालानां चूडाकर्मादिके तथा। सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने, नान्दीमुखं पितृगणं पूजयेत् प्रयतो गृहीत्यन्तविष्णुपुराणवचने-त्यर्थः।

सुतपदं कन्यापुत्रोभयपरमिति। अथात्र यद्येकशेषात् सुतपदस्य कन्यापुत्रपरत्वं तर्हि पुत्रसंस्कार इव कन्यासंस्कारेऽपि अन्नप्राशनादौ पितृकर्तृकवृद्धिश्राद्धं स्यान्नवेति। अत्र श्राद्धविवेकटीकायां गोविन्दानन्दमतम्। गोभिलेन पुत्रजन्मोपक्रमे जातककर्मादिसंस्कारविधानात् कन्यासंस्कारेषु गृह्यानुक्ततया सर्वाण्येवान्वाहार्यवन्तीत्यनेन श्राद्धं न प्राप्यते। कुतस्तर्हि कन्यायाः संस्कारप्राप्तिरिति चेत्। तुष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रक इति याज्ञवल्क्यवचनात्, अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः। संस्कारार्थं शरीरस्य यथाकालं यथाक्रममिति मनुवचनाच्चेति ब्रुमः। नच स्त्रीसंस्कारस्य गृह्यानुक्ततया सर्वाण्येवान्वाहार्यवन्तीत्यस्याविषयत्वेऽपि स्वपितृभ्यः पिता दद्यादि-त्यनेन पितृकर्तृकस्वपित्रुद्देश्यकश्राद्धविधायकेन स्त्रीसंस्कारे श्राद्धं प्राप्नोतु तस्य गुणविधायकत्वे वाक्यभेदापत्तेरिति वाच्यम्, तद्वचनस्थसुतपदेन कन्याया अनुपस्थितेः कन्यापुत्रविवाहेष्विति विष्णु-पुराणीयैकवाक्यत्वाभावात्, अन्यथा दुःहितुः सीमन्तोन्नयने पितुर्वृद्धिश्राद्धापत्तेः। तस्यापि गार्भ-पात्रसंस्कारत्वेन गर्भाधारभूतायाः स्त्रिया अपि संस्कारवत्त्वात्। किञ्च विष्णुपुराणे नामकर्मणि बालानां चुडाकर्मादिके तथेत्यत्र बालानामित्यस्य उभयपरत्वसम्भवात् चुडाकर्मादिके इत्यादि-पदेन विवाहपर्यन्तलाभसम्भवाच्च उत्तरत्र कन्यापुत्रविवाहेष्विति कन्यापदोपादानं पुनरुक्तं स्यात्। बालानामित्यस्य पुत्रमात्रपरत्वे तु चुडाकर्मादिके इत्यनेन पुत्राणामेव विवाहप्राप्तौ विवाहान्तर्भावे कन्याया अपि प्राप्तये कन्यापुत्रविवाहेष्विति कन्यायाः पृथगुपादानं सार्थकं भवतीत्यन्तम्।

संस्कारतत्त्वे तु गोभिलः। एतयैवावृता स्त्रियास्तुष्णीं मन्त्रेण तु होमः। आवृता प्रक्रियया तुष्णीम्, अनन्तरोक्ताः सर्वे संस्काराः मन्त्रवर्जं भवन्ति। अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषत इति मनुवचनात् तुष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रक इति याज्ञवल्क्यवचनाच्च। होमस्तु मन्त्रेण, तुशब्दश्चार्थे, तेन होमो वृद्धिश्राद्धञ्च मन्त्रवदेव भवतीत्यर्थः; इति स्मार्तपादै-रभिहितम्। शूलपाणिनाप्येवमुक्तम्। प्रमाणसिद्धमप्येतन्मतं कुलाचारविरहेण गौडीयैर्नाद्रियते। प्रागुक्तगोविन्दानन्दमतन्तु कुलाचारानुरूपतया अङ्गीक्रियते।

तस्माद्गौडीयानां कुलाचारविरहेण कन्यान्नप्राशनादौ वृद्धिश्राद्धं न कार्यमिति। संस्कारमात्रे कुलाचारस्यैव प्राधान्यात्। मन्त्रहीनत्वेन लौकिककर्मतुल्यतया देहाशुद्धिप्रतिबध्यत्वाभावात् तदर्थं महागुरुसपिण्डनापकर्षोऽपि माभूदिति बहूनां स्वरसः, इति कश्चित्। 'अभिविधावि'ति कार्यान्वयानुरोधादिति हेतुरत्र। तथाहि आङोऽभिविध्यर्थत्वे पित्रुद्देश्यकत्यागरूपायां समभिव्याहृत-क्रियायामुद्वाहस्याप्यन्वयः स्यात्। मर्यादार्थकत्वे तु उद्वाहस्योपलक्षणत्वान्नोक्तक्रियायामन्वयः। पाटलिपुत्रमभिव्याप्य वृष्टो देव इत्यन्वयबोधात् वृष्टिक्रियायां पाटलिपुत्रस्याप्यन्वयः। मर्यादार्थकत्वे तु पाटलिपुत्रं विहाय वृष्टो देव इत्यन्वयात् पाटलिपुत्रस्य वृष्टिक्रियायां नान्वय इति।

संस्कारमात्रे संस्कारजन्यफलभागितया प्रधानीभूतसंस्कार्यक्रमप्राप्तावपि पिता स्वपितृभ्यः पिण्डान् दद्यात् इति विशेषविधिमहिम्ना तद्बाधोऽभ्युपेयः। एवञ्च तद्विषयस्यैव पितुः संस्कार्यक्रमबाधकत्वं वाच्यं, तथा सति मृतस्येव पतितादिपितुरपि तद्विधिविषयत्वाभावात् बाधकाभावेन संस्कार्यक्रमादेव श्राद्धं कर्तव्यमेवं पर्यालोच्याह 'संस्कार्यक्रमबाधकस्ये'ति। तेन जीवत्यपि तादृशधर्मावच्छिन्ने पितरि संस्कार्यक्रमबाधकत्वावच्छिन्नस्य पितुरभावस्यावश्यम्भावेन संस्कार्यक्रमादेव श्राद्धमव्याहृतमित्यायाति। पितुरभावे कः श्राद्धं कुर्यादित्याकाङ्क्षायामाह 'संस्कार्यः' सुतः, सपिण्डादिर्वेति।३३॥

'तत्क्रमा'दिति। तच्छब्दस्य विशेष्यतयोपस्थितपितृपरामर्श एव युक्तः। अत एव विशेष्यविधया पुर्वोपस्थापितस्यैव परामर्शकत्वं तदादिशब्दानामिति जगदीशः। ततश्च पितुरभावेऽपि पितुः पित्रादीनां तन्मातामहानाञ्च श्राद्धं प्रसज्येत इत्याह 'तत्क्रमा'दिति। तथाचात्र फलभागितया संस्कार्यस्य प्राधान्यात् स एव तच्छब्देन परामृश्यते, तदेवाह 'तस्य प्रधानस्य क्रमा'दिति। 'तेषामि'ति तत्पदस्य पितुः सम्प्रदानीभूतानां षण्णामेव परामर्शकत्वे सिद्धे तत्क्रमादित्यनेन संस्कार्यपितुस्तत्रप्रवेश आवश्यकः, अन्यथा पितुरभावेऽपि पितुः पित्रादीनां तन्मातामहानाञ्च श्राद्धे तत्क्रमादित्यस्य वैयर्थ्यमिति नारायणोपाध्यायमतं दूषयितुमाह पित्रनुप्रवेशेन इत्यादि युक्तत्वादित्यन्तम्। 'न वे'ति। वेति मतद्वयसूचकम्। तत्राद्यमते तेषामिति तच्छब्दस्य बुद्धिस्थत्वोपलक्षितधर्मावच्छिन्न एव शक्तिः। तच्च दूषितम् आद्ये संस्कर्तु रनुपात्तत्वेनेत्यादिना। तथा चासति बाधके विशेष्योपस्थापकत्वं तदादेर्व्युत्पत्तिसिद्धमिति भावः। पित्रा येषां श्राद्धं कर्तव्यं तेषामिति द्वितीयमतं तत्क्रमादित्यस्यानुवादत्वेन वैयर्थ्यापत्तितो दूषितमिति।

'निर्विशेषिते'ति। स्वपितृभ्य इत्यत्र स्वपदेन यत् स्वसम्बन्धित्वरुपं विशेषणं पितृषु बोधितं तच्छून्येत्यर्थः। 'एवञ्चे'ति, तत्क्रमादित्यनेन संस्कार्यक्रमस्य ग्राह्यत्वे सति। 'भ्रात्रापी'ति। तथाच भ्रातुः संस्कारकर्तृत्वपक्षे संस्कार्यसंस्कर्त्रोः पित्रादीनामभिन्नत्वेऽपि संस्कार्यक्रमावबोधाय तथा प्रयोज्यमिति भावः। अपि नान्यसपिण्डादेः परिग्रहः छन्दोगैर्योषितां श्राद्धं न कर्तव्यमिति। इदञ्च तात्पर्यपरिप्राप्तम्। नञर्थभेदे छन्दोगानामन्वयेन छन्दोगेतरकर्तृकत्वस्यैव प्राप्तयोषिच्छ्राद्धे विधानादत एव पर्युदस्तत्वादित्युक्तम्। पत्नीनिरपेक्षणां पित्रादीनां न देवतात्वं किन्तु सपत्नीकत्वेनेति प्राचां मतं दूषयितुमुत्थापयति 'न वे'ति।

'अपृथक् दद्या'दिति। तथा चैतन्मते पृथक्पदेन नञ्सम्बन्धादपृथगदानमायाति, ततश्च श्राद्धे सपत्नीकाय पित्रे इत्यादिकं वाक्यमुल्लेख्यम्। नच पतिविशषणत्वेन पत्न्या अपि चतुर्थ्युपात्तोद्देशान्वयात् पतिपिण्डस्य पत्न्या अपि पिण्डत्वात् स्वभर्तृपिण्डांशेभ्य इत्यस्योभयोद्देश्यकदत्तेभ्य एव योषितां तृप्तिरिति हेतुमन्निगदो न सङ्गच्छते इत्यतस्तदन्यथा व्याचष्टे यत इत्यादिना। अथ स्वभर्तृपिण्डांशेभ्य इत्यस्योभयोद्देश्यकदत्तेभ्य इत्यर्थः कथं सम्भवतीति चेत् स्वञ्च भर्त्ता च स्वभर्त्तारौ तयोः पिण्डः स्वभर्तृपिण्डः सपत्नीकोद्देशेन देयः पिण्ड इति द्वन्दगर्भतत्पुरुषसमासेन प्राप्तमर्थं व्याकुरुते उभयोद्देश्यकदत्तेभ्य एव योषितां तृप्तिरिति। ननु तथाप्युभयोद्देश्यकदत्तपिण्डांशेभ्य उभयोस्तृप्तौ कथमासामिति तत्राह 'पुरुषाणा'मित्यादि। जीवनादावित्यादिना पातित्यमरणादेरपि परिग्रहः। इति वाच्यं, नचेति पूर्वेणान्वयः। अत्र हेतुमाह 'तथात्वे' इत्यादि।३४॥

वैयर्थ्यं विशदयति 'तथाही'ति। यजमानस्य पित्रे इत्यादौ यजमानपदेभ्यः पित्रादीनां जनकत्वावसीयते। तेन च वसुरुद्रादितिसुताः पितरः श्राद्धदेवता इत्याद्युक्तवस्वादीनां व्यावृत्तिर्ज्ञेया। 'तर्पणव'दिति। तर्पणे "अथात्मीयां स्त्रीन् पितृत इत्युपक्रम्य तत्पत्नीश्चेति पृथग्विधानात् पत्नी-

निरपेक्षाणां पित्रादीनां देवतात्वमिति दृष्टान्तार्थः। अपृथक्त्वविशिष्टं श्राद्धं विधीयते इत्यन्तिमपक्षं निराकर्तुमाह नान्त्य इति। अवसानदिने तु इत्यस्य श्राद्धप्राप्त्येति परेणान्वयः। 'ध्रुवाणी'ति। छन्दोगपरिशिष्टकृता ध्रुवाणि तु प्रकुर्वीत प्रमीताहनि सर्वदेत्यभिधाय द्वादशप्रतिमास्यानीत्यादिना षोडशश्राद्धानि परिगणितानि। अत्र ध्रुवशब्देनैव षोडशश्राद्धानां नित्यताप्राप्त्या पुनः सर्वदा-पदोपादानं विफलमिति, अपि च आद्यश्राद्धषान्मासिकश्राद्धयोर्मृततिथिकर्तव्यत्वाभावात् प्रमीताह-नीत्यनेन सर्वेषामन्वयानुपपत्तिश्चेति।

अत्र स्मार्तसमाधानानुसारेणैवं व्याख्यायते, यथा—एतानि षोडशश्राद्धानि ध्रुवाणि नित्यानि सर्वदा मृतधनालाभेऽपि अर्थात् मृतधनालाभदशायामपि मृततिथौ आद्यश्राद्धषाण्मासिकश्राद्धद्वयेतर-श्राद्धानि कार्याणि इति। अथवा प्रमीताहनि मरणनिरुप्यकाले, तेषां श्राद्धानामपि तदादितदन्त-न्यायात् मृततिथिकरणयोग्यत्वान्मरणनिरुप्यतिथाविति वा। एतच्च नैमित्तिकश्राद्धोपाधिप्रदर्शनावसरे तर्कालङ्कारेणाभिहितम्। ननु ध्रुवानीतिवचनस्य छन्दोगपरिशिष्टीयत्वेन न सर्वयोषिद्गोचरत्वम्। अपृथक्श्राद्धन्तु छन्दोगयोषिद्भिन्नयोषित्परमेव वाच्यं, ततश्च तासामपृथक्श्राद्धमवसानदिनेऽपि स्यादतस्तद्व्यावर्तनायावसानदिनादृते इत्यस्य सार्थक्यमित्याह 'सर्वशाखेति'। शाखाविशेषे उक्तमेकं कर्म सर्वशाखाप्रतीतिगोचरमित्यर्थः। 'यन्नाम्नात'मिति। यत्कर्म स्वशाखायां स्वगृह्यशास्त्रे न कथितं तत् परोक्तं परशाखोक्तम्। अपिचाविरोधिचकारादाकाङ्क्षितञ्चेत्, तदा सर्वैस्तदनुष्ठेयमिति छन्दोगपरिशिष्टीयं पूर्ववचनं साधारणयोषिद्गोचरमित्यवश्यं वाच्यं तत् कथमवसानदिनादृते इत्यस्य सार्थक्यमिति। अथ उक्तच्छन्दोगपरिशिष्टवचनेन पारशाखिककर्मानुष्ठानं छन्दोगानामिति बोधितं न तु ध्रुवाणीति वचनस्य छन्दोगान्ययोषिद्गोचरत्वमपीत्याह 'स्त्रीणामि'ति। तथाच पुराणवचनस्य वेदविशेषविषयकत्वाभावेन सर्वशाखियोषितामेवावसानदिने पृथक्श्राद्धप्राप्त्या अपृथक्श्राद्धविधेरवसान-दिनेतरविषयकत्वस्यावसानदिनादृते इत्यस्यानुपादानेऽपि प्राप्तेरिति तद्वैयर्थ्यं स्फुटम्। प्राप्त्या चेति चकारस्त्वर्थ इति कश्चित्। वस्तुतः पुराणवचनमप्यत्र प्रमाणयति स्त्रीणामिति। श्राद्धप्राप्त्येत्यर्थः। 'अनुपपत्तेरि'ति। तथाचावसानदिने पृथक्श्राद्धसत्त्वात् पृथक्पदस्वरसतोऽवसानदिनेतरत्रापृथक् श्राद्धमवश्यं वाच्यम्।

'पृथक्पदमेवे'ति। अथ स्वमते एतद्वचनं न श्राद्धविधायकं किन्तु कर्तुश्छन्दोगेतरत्वगुण-विधायकम्। एवञ्चावसानदिननिमित्तकश्राद्धेतरयोषिदुद्देश्यकपृथक्श्राद्धमनूद्य छन्दोगेतरकर्तृकत्वमेव विधेयं तदितरस्य वाक्यघटकसर्वांशस्यानुवादत्वात् पृथक्पदस्यापि प्रमाणान्तरप्राप्तत्वादनुवादत्वं न्याय्यं तदिह पृथक्पदमेव इत्येवकारप्रयोगोऽसङ्गतः योषिद्भ्यो दद्यादित्यस्याप्यनुवादत्वादिति। सत्यं, "अनुवाद्यमनुक्त्वा तु न विधेयमुदीरयेत्। न ह्यलब्धास्पदं वस्तु कुत्रचित् प्रतितिष्ठति" इति न्यायात् यत्र विधेयस्यान्वयस्तत्स्थानप्रदर्शनायानुवादस्यावश्यकत्वम्। अन्यथा छन्दोगेतर इत्येता-वन्मात्रोक्तौ कदा किं कुर्यादित्याकाङ्क्षाया अनिवृत्तेर्विधानस्याननुष्ठानलक्षणाप्रामाण्यापत्तेः। अतोऽवसानदिननिमित्तकश्राद्धेतरयोषिदुद्देश्यकश्राद्धे छन्दोगेतरकर्तृकत्वस्य गुणस्य विधेयत्वात् विधेया-न्वयस्थानप्रदर्शनार्थत्वेन तद्वाक्यघटकेतरांशानुवादस्य सप्रयोजनतया निर्दोषत्वं पृथक्पदप्रयोगस्य तु निष्प्रयोजनतया दुष्टत्वमेव। अत एवोक्तं सप्रयोजनतया अनुवादो न दोषायेति।

न चैवं पर्युदासे आद्यश्राद्धषाण्मासिकश्राद्धानां मृताहेतरत्रियमाणानां छन्दोगयोषितां कथं प्राप्तिस्तेषां सर्वशाखिसाधारणेन विध्यन्तरेण प्राप्तत्वात्। अन्यथा छन्दोगेतरयोषितामपि तत्-श्राद्धप्राप्तिर्न स्यात्। उक्तपर्युदासविधेः प्रकरणात् सपिण्डनोत्तरवृद्ध्यादिश्राद्धविषयत्वादिति विवेकटीकायाम्। अत्र योषिद्भ्य इति श्रुतावपि उद्देश्यविशेषणतया बहुत्वमविवक्षितम्। अन्यथा

अवसानदिनादृते इति व्यर्थं स्यात्। अवसानदिने वहुयोषिदुद्देश्यकश्राद्धस्याप्राप्तत्वात्। नच मातुर्विकृतपार्वणे पितुः श्राद्धानर्हतायां पितामहादिभिः सह सपिण्डीकरणे च श्राद्धस्य वहुयोषिदुद्देश्यकत्वादवसानदिनादृते इत्यनेनावसानदिननिमित्तकश्राद्धभेदनिवेश इति वाच्यं। तादृशविकृतपार्वणादौ तु निमित्तं मातुरेवावसानदिनं न पितामहादीनाम्। अत एव श्राद्धविवेकटीकायां मातुः सपिण्डीकरणं पितामह्या सहोदितमिति छन्दोगपरिशिष्टस्य विशेषवचनात्, एवं—मातुः प्रथमतः पिण्डं निर्वपेत् पुत्रिकासुतः। द्वितीयञ्च पितुस्तस्यास्तृतीयञ्च पितुः पितुरिति विशेषवचनाच्च सर्वेषां पार्वणे मात्रादिश्राद्धप्राप्तिरिति भाव्यम्।

अवसानदिनादृते इत्यस्य यत एव वैयर्थ्यं तस्मादित्यर्थः। विशिष्टविधिवादिमतेऽवसादनदिनादृते इत्यस्य वैयर्थ्यं स्वमतेऽपि पृथकपदस्येत्यतो लाघवं विनिगमकं प्रदर्शयितुमाशङ्कते 'न च वैपरीत्य'मिति। 'तथात्वे'ऽवसानदिनादृते इत्यस्य अनुवादत्वे। 'वाक्यानुवादः स्यादिति,' साकाङ्क्षशब्दसमूहो वाक्यं, तथाच "मिथः साकाङ्क्षशब्दस्य व्युहो वाक्य" मिति जगदीशः। मिथः साकाङ्क्षत्वं परस्परान्वितार्थकत्वम्। 'विभक्तेर्नानुवादकते'ति। अथाव्ययस्य पदसंज्ञार्थं तदुत्तरं विभक्तेरुतपत्तिरावश्यकी, अन्यथा पदत्वाभावेन शास्त्रे तदप्रयुक्तिः स्यादिति यदभिहितं "नापदं शास्त्रे प्रयुञ्जीते"ति। नचाव्ययोत्तरं विभक्तेरुत्पत्तावपि तस्या लुप्तत्वात् लुप्तविभक्तेश्चार्थानुसन्धानं नास्तीति वादिनां मतमवलम्ब्य तथोक्तमिति वाच्यम्। तैरपि दधि पश्यतीत्यादौ विभक्तिजनितसंस्कारादेव कर्मतादिप्रतीतेरङ्गीकृतत्वादिति। सत्यमत्राव्ययपृथक्पदस्य दद्यादिति क्रियाविशेषणत्वेन नीलो घट इत्यादिवत् विशेषणविभक्तेरर्थशून्यत्वेन अर्थवद्विभक्तेर्नानुवादकतेत्युक्तमिति भाव्यम्। विवेकटीकायाञ्चाव्ययस्यानुवादरुपार्थप्रत्यायकतापि न दोषायेत्यत्र मीमांसकसम्मतिरुक्ता, तदुक्तं मीमांसकैः—अव्ययानान्तु सर्वेषां अनेकार्थत्वदर्शनात्, न दोषस्त्वनुवादत्वं दोषस्तदितरस्य चेति॥३५॥

'तस्मा'दिति। उपसंहरति तस्मादिति, पृथक्पदस्यानुवादकतया तेन सह नञोऽन्वयेन पर्युदासपरत्वादित्यर्थः। 'मातृश्राद्ध'मिति। छन्दोगानां पर्युदस्तत्वात् पक्षत्रयश्राद्धविधायकममिदं वचनं वेद्यन्तरविषयकम्। तदेव दर्शयति मातृश्राद्धमिति। मातृणां श्राद्धमित्यर्थः। मातरः प्रथमं पूज्याः पितरस्तदनन्तरमिति मत्स्यपुराणवचनैकवाक्यत्वात्। वृद्धाविति सप्तम्यर्थो निमित्तत्वम्। श्राद्धत्रयमिति एकस्मिन्नेव श्राद्धे पक्षत्रयवत्त्वात् श्राद्धत्रयमिक्त्युक्तम्।

'अन्वष्टकास्वि'ति। तिथिप्रकरणादष्टकाया अनु पश्चात्तिथिरन्वष्टकेति व्युत्पत्तेश्च। 'नवमी तिथिरन्वष्टकेति प्रतीयते। अत एव तिस्रोऽन्वष्टका इति स्त्रीलिङ्गनिर्देशः, दिनमात्रपरत्वेऽन्वष्टकमित्येव ब्रूयादिति भाव्यम्।

अष्टकावदित्यनेनान्वष्टकास्वपि षाट्पौरुषिकश्राद्धप्राप्तौ अधिकदैवतमाह मात्रे इत्यादिकम्। एवञ्च मात्रादिनवदैवतकमन्वष्टकाश्राद्धं कर्तव्यमिति ज्ञातव्यम्। न च यथा विकृतिगतेन शरमयबर्हिषा कुशमयबर्हिषो बाधस्तथा विकृतिगतेन देवताविशेषणाष्टकाश्राद्धीयषड्दैवतबाधोऽत्रापि स्यादिति वाच्यम्। अष्टकासु च कर्तव्यं श्राद्धं हैमन्तिकीषु वै। अन्वष्टकासु क्रमशो मातृपूर्वं तदिष्यत इति ब्रह्मपुराणवचनेनाष्टकासु यत् श्राद्धं (यत् षड्दैवतकश्राद्धम्) तत्षड्दैवतकं श्राद्धं मातृपूर्वं मात्रादित्रिदैवतकपूर्वकं क्रमशोऽन्वष्टकासु इष्यते—इत्यर्थत एव नवदैवतकश्राद्धस्य लाभादिति। अन्वष्टकास्वित्यादिना पृथङ्मातृश्राद्धविधानाच्च। एतच्च मातृश्राद्धं छन्दोगैर्न कर्तव्यं मातामहादिश्राद्धञ्च। "न योषिद्भ्यः पृथग्दद्यादवसानदिनादृते" इति छन्दोगपरिशिष्टीयेन "कर्षुसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशम्। प्रत्याब्दिकञ्च शेषेषु पिण्डाः स्युः षडिति स्थिति"रिति परिशिष्टवचनान्तरेण सह विरोधात्। एवमेव शूलपाणिराह स्म। अग्नौ हुत्वेत्यस्य सार्थक्यं ग्रन्थकृतैवाग्रे वक्ष्यते। अथाष्टकावदित्यतिदेशेन देवपूर्वकत्वलाभात् कथं पुनर्देवपूर्वकत्वमित्युक्तम्। सत्यं

तदतिदेशेन पितृपक्षात् पूर्वमेव देवपूर्वकत्वं न तु मातृपक्षात् पूर्वमिति तल्लाभार्थन्तदुपादानम्। पूर्ववद्वाह्मणान् भोजयित्वेति। एतच्चाष्टकावद्ब्राह्मणभोजनलाभार्थम्, अन्यथा एकैकमूभय एवेति प्रकृतिगतमपकृष्टं कल्पान्तरमप्यत्र स्यादिति ध्येयम्। कश्चित्तु देवपूर्वमिति हुत्वेप्यनेनान्वेति देवपूर्वमिति विश्वेदेवपूर्वम्। मात्रे इत्यादेस्तु ब्राह्मणान् भोजयित्वेत्यनेनान्वयस्तेन मात्राद्युद्देशेन ब्राह्मणभोजनं कारयित्वेत्यर्थमाह। छन्दोगेतर इति, तत्त्वञ्च छन्दोगपरिशिष्टवचनादुन्नेयम्। 'ततश्चे'ति। उक्तपर्युदासाच्चेत्यर्थः। असमासे पतिशब्दस्याग्निकार्यनिषेधऽपि आर्ष्यत्वादग्निशब्दवत्कार्यमित्याह पतिनेति। श्राद्धे पतिपत्न्योः सहत्वस्य निराकृतत्वात् पतिना सहेत्यनुपपत्तिमाशङ्क्य समाधत्ते भोग्यमिति। तथाचात्र वचने भोग्यपदाभावेऽपि पितृभ्यो दद्यादित्यादिविधौ असावेतत्ते इत्यादि मन्त्रे च निरपेक्षदेवतात्वावगमात् भोग्यपदाध्याहारः। तथाच यथा "स्वेन भर्त्रा सह श्राद्धं माता भुङ्क्ते स्वधामयं, पितामही च स्वेनैव स्वेनैव प्रपितामहीति" वृहस्पतिवचनस्य भोजनसहभाव एव तात्पर्यमेवमस्यापीति भावः। एवमेव शूलपाणिनाप्यभिहितम्। प्रागुक्तश्रुत्येति असावेतत्ते इत्यादिश्रुत्या भर्तृदत्तांशहरत्वबोधिकया सह पतिना सहेत्यन्तवचनस्यैकवाक्यत्वात् भोग्यं श्राद्धं कर्तव्यमिति साध्येनान्वयः।

'साग्नेरेवे'ति॥ अत्र हेतुमाह विष्णुवचने हीत्यादिकम्। विष्णुवचने विष्णुसूत्रे, तच्च "अन्वष्टकास्वष्टकाव"दित्यादि पूर्वोक्तम्। 'अग्निप्राप्ते'रिति विशिष्टदेशप्रक्षेपोपहितत्यागस्य हुधात्वर्थत्वेन अग्नेरपि विशिष्टदेशत्वात्। नियमार्थमिति सिद्धे सत्यारम्भो विधिर्नियमायेत्युक्तेः।

तथाच संस्कृताग्निमात्रे होमो न निरग्नीनां सम्भवति सुतरां साग्नेरधिकार आयाति। निरग्नेरधिकारार्थमन्यथा शङ्कते विप्रपाण्यादाविति। अग्न्यभावे तु विप्रस्य पाणावेव जलेऽपि वा इत्यादिनेति शेषः, अत्रापि अन्वष्टकायामपि। तथेति विप्रपाण्यादावग्नौ करणहोम इत्यर्थः।३६॥

'अत एव' जीवन्तमिति पुंस्त्वस्याविवक्षणादेव। 'स्वेन भर्त्रे'ति स्वपदेन सवर्णभर्तुर्लाभः। असवर्णायाः स्त्रियास्तु तस्याः पित्रा सहेति शूलपाणिः। 'एकत्वं' एकमूर्तित्वम्। 'चरुमन्त्रे'त्यादि। चरुः समशनीयचरुहोमः, मन्त्रः पाणिग्रहणीयः, आहूतिश्चतुर्थीहोम, 'व्रतेति' व्रतादिमन्त्रः। 'तस्मिन् सति' श्राद्धानर्हे भर्तरि सतीत्यर्थः। अनर्हत्वञ्च प्रव्रजितत्वादिना, रोगादिनेति आदिना वृद्धत्वादिनाऽसामर्थ्यपरिग्रहः। पूर्वोक्तविषये प्रमाणमाह 'तथाचे'ति। 'जीवति पितरी'ति कार्यक्षमे इति पूरणीयम्। आदानं ग्रहणं वृद्ध्यर्थमधमर्णाय पित्रार्पितार्थस्येति भावः। विसर्गस्त्यागः, आक्षेपो न्यासकरणम्, अर्थपदार्थस्य प्रत्येकं सम्बन्धः। न स्वातन्त्र्यं तदनुमतिं विना नाधिकार एषु। काममिति निश्चितं सम्यगिति वा, तस्य चिन्तयेदित्यनेनान्वयः। 'दीने' वृद्धत्वादिना दुःखिते, 'प्रोषिते' देशान्तरस्थिते, 'आर्तिं गते' अत्यन्तशोकरोगादिभिः पीडिते। 'विट्पति'र्जामाता, स्वयमेवेति अत्रैवशब्द इवार्थे, तथाच एभिर्यद्धुतं तत् स्वयं हुतमिवेत्यर्थः, स्वापेक्षया प्रतिनिधेरपकृष्टत्वादिति भावः।

नचाक्षमतया पितुः प्रतिनिधित्वाकरणे पुत्रेण किं कार्यमत्राह 'स्वयंप्रवृत्तस्यापी'ति। 'मरणादिने'ति आदिना वानप्रस्थत्वादेः परिग्रहः। 'नान्दीमुखेभ्य' इति विशेषणमिदं नान्दीमुखत्वविशेषणविशिष्टस्य पित्रादेर्देवतात्वज्ञापनाय। 'तत' इति नान्दीमुखश्राद्धात् परमित्यर्थः। अथवा तादृशश्राद्धादित्यर्थः। अत्र पञ्चम्यर्थस्य शुद्धावन्वयः। 'शुद्ध' इति जनकतासम्बन्धेन शुद्धिविशिष्टः। एतेन शुद्धिं प्रति तस्य श्राद्धसहकृतविवाहस्यैव जनकता बोधिता। अत एव श्राद्धाभावे विवाहस्याशुद्धता प्रतीतिरिति भाव्यम्। अनेनैव हेतुना वृद्धिश्राद्धस्यावश्यकर्तव्यत्वं साध्यते। तदेवाह 'अवश्यं वृद्धिश्राद्धं कर्तव्य'मिति। 'हारीतवचनोत्तरार्धेने'ति। हारीतवचनपूर्वापरार्धविहितयोः श्राद्धकरणाकरणयोः षोडशीग्रहणाग्रहणवद्विकल्पस्वीकारे अष्टदोषापत्तेर्व्यवस्थितविकल्पकत्वमवश्यं वाच्यम्। व्यवस्था च पूर्वार्धं प्रधानीभूतश्राद्धविषयकम्। परार्धन्तु अङ्गीभूतश्राद्धविषयकमिति।

एतदेवाङ्गत्वादेवेति प्रधानसाङ्गतार्थमित्येताभ्यां प्रतिपादितम्। प्रधानाधिकारिणामङ्गेष्वधिकार इति न्यायस्याङ्गविषयत्वकल्पनायां बीजम्। तथाहि प्रायश्चित्तं कुर्यादित्यादिविधिबोधितप्रायश्चित्तादेः प्रयोगविधिना तत्र श्राद्धं कुर्यादिति प्रतिपाद्यते। यदि तु पूर्वार्धेन जीवत्पितृकेतरः श्राद्धं

कुर्यादिति पर्युदासात् अङ्गीभूतश्राद्धेऽपि जीवत्पितृकेतरकर्तृत्वं बोधयेत्, तदा जीवत्पितृकस्य सर्वदा श्राद्धवाधापत्त्या मुख्यकल्पेन क्वचिदपि प्रायश्चित्ताद्यनुष्ठानं न स्यात्। साङ्गाद्धि वैदिक-कर्मणः फलावश्यभावनियमेन समग्रफलोदयश्च न स्यात्। तस्मात् परार्धमेतन्न्यायमूलकमेव, पूर्वार्धन्तु प्रधानीभुतश्राद्धविषयकमिति। अतएव पुर्वार्धे श्राद्धकालमित्यत्र कालपदमुपात्तं तेन येषां श्राद्धानां कालनैयत्यं तत्र नाधिकार इति स्थितम्। अङ्गश्राद्धानान्तु अङ्गानामसति बाधके प्रधानदेशकालाद्यन्वयित्वनियमेन तेषु कालनैयत्यं नास्तीति ध्येयं। 'तत्रे'ति जीवत्पितृकश्राद्धे। 'ऊह'मिति उल्लेखमित्यर्थः। 'मन्त्रोहेने'ति पित्रादिपदस्थाने पितामहाद्युल्लेखेन, 'प्रतिनिधिना त्वि'ति अत्र प्रतिनिधित्वं तदभावे तत्कार्यकारित्वम्। 'अमुकस्ये'ति यस्य प्रतिनिधिस्तस्येत्यर्थः।

न न्वभिलापे यजमान नामोल्लेखेऽपि यजमान समवेतस्य प्रतिनिधावनन्वितत्वात् का गतिरित्याह आयान्तु नः पितरा इत्यादाविति। न तथेति न यजमाननामोल्लेखः। अथ प्रतिनिधावनन्वयि-त्वात् मन्त्रस्य बाधोऽस्तु त ाह यां वै काञ्चनेति। ऋत्विजः प्रतिनिधयः यां कामाशिषमाशासते प्रार्थयन्ते इत्यन्वयः। यजमानस्यैवेत्यनेन मान्त्रिकं फलं यजमान एवान्वेतीति प्रतीयते। एवञ्चेति येषां श्राद्धं पिता कुर्यात्तेषामेव स कारयेदित्यादिना जीवत्पितृकस्य वृद्धिश्राद्ध-कर्त्तृत्वे च।

पितामहादेः कन्यादानकर्तृत्वे वृद्धिश्राद्धानुपपत्तिरेवेत्याह 'अङ्गत्वादि'ति। तथाच वचनाभावेऽपि प्रधानसाङ्गतार्थं तदनुष्ठानं। 'मृताहनि तु कर्तव्ये'ति। अथ न योषिद्भ्य इति वचनव्याख्याना-वसरे एतद्विष्णुपुराणवचनं स्त्रीसम्प्रदानकश्राद्धविषये प्रमाणीकृतम्। इह तु कर्तरि षष्ठीत्यनेन स्त्रीकर्तृकश्राद्धनियमपरतयोच्यते तदनयोर्विरोधः कथं समाधेयः, उच्यते, स्त्रीणामिति सम्बन्धे षष्ठी तस्याश्च कर्तृत्वमुद्देश्यत्वञ्च द्वयमेवार्थः। तत्र षष्ठ्या उद्देश्यतार्थमादाय पूर्वत्रप्रमाणमभिहितम् इह तु कर्तृत्वार्थकत्वमादायेति न कश्चिद्विरोधः। एवञ्च कर्तरि षष्ठीति यदुक्तं तस्य कर्तृत्वसम्बन्धे षष्ठीत्यर्थः, न पुनः कर्तृकर्मणोः कृतीति सूत्रेण कृद्योगे षष्ठीति तदर्थ इति कश्चित्। तन्नातिपेशलं —उपपदविभक्तेः कारकविभक्तिर्बलीयसीति न्यायेन कृद्योगे षष्ठ्येव तस्याश्च कर्तृत्वमुद्देश्यत्वञ्चार्थ-द्वयं वचनान्तरसंवादात्। यथा श्राद्धविवेके एतत्सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपीति याज्ञ-वल्क्यवचनव्याख्यानावसरे श्राद्धेषु मध्ये एतदेव श्राद्धद्वयं स्त्रियै कर्तव्यं, स्त्रिया वेति नियमार्थमुक्त-मिदम्। अतएव तर्कालङ्कारेण स्त्रिया अपीति कृदयोगे षष्ठी, तस्याश्च कर्तृत्वाख्य उद्देश्यताख्यश्च द्विविधोर्थो विवक्षितः वचनान्तरसंवादादिति तद्वदिहापीति भाव्यं। तथाच उत्तरक्रिया सपिण्ड-नोत्तरक्रिया, प्रतिसंवत्सरमेकोद्दिष्टविधानतः स्त्रीणां कर्तव्या स्त्रीभ्योऽपि कर्तव्येति तातपर्यम्।३७।

अथ यदि स्त्रीणामेकोद्दिष्टमात्रे अर्थादेकोद्दिष्टधर्मग्राहित्वात् सपिण्डीकरणे सांवत्सरिके च यद्यनधिकारेण प्रतिनिधिद्वारा न नान्दीमुखश्राद्धं स्त्रीभिः कर्तुं शक्यते, तदा "न स्त्री जुहुयान्ना-नुपेत" इत्यादिना होमेऽनधिकारेण व्रतप्रतिष्ठादौ कथं ब्राह्मणद्वारा होम इत्याशङ्कते 'नन्वेवमि'ति। तत्र प्रतिष्ठादौ तद्विधानात् हावनविधानात्। हावनं प्रतिपादयति 'तथाही'ति। तद्विधानमेव जानीहीत्यर्थः। विकल्पदर्शनाद्व्यवस्थितविकल्पदर्शनादित्यर्थः। उक्तविकल्पे प्रमाणं दर्शयति 'सूतके' इत्यादि। सूतकपदमारम्भानन्तरकालीनसूतकपरं व्रतयज्ञेत्यादिना आरब्धहोम एव प्रतिनिधिविधानात्। 'आदिशब्दादि'ति, आदियुक्तैवमादिनिमित्तेष्विति पदादित्यर्थः। तथाच सुतकादिनिमित्तान्यनिमित्तेष्वप्युपस्थितेषु हावयेदिति हवनं कारयेदिति तात्पर्यं होममात्रे (प्रधाने-ऽङ्गे वा) तथा कल्प्यते स्त्री हावयेदिति कल्प्यते। नच वचनप्राप्तत्वात् कथं कल्पनेत्युच्यते इति वाच्यं। होमाधिकारिणामेवाशक्त्यादौ हावनस्यानेन विधानादिति।

'श्रुतशीलिने' इति। श्रुतमर्थावबोधकव्याकरणाद्यष्टादशशास्त्राणि. शीलं सदाचारस्ते उभे विद्येते यस्य स तस्मै इत्यर्थः। 'विज्ञाय' पण्डिताय श्रुतार्थज्ञानसम्पन्नायेति यावत्। मङ्गल्यानि मङ्गलेभ्यो हितानि। ब्रह्मघोषं ब्रह्मणो वेदस्य घोषो ध्वनिर्यस्मात् पठनात्तथेति। गीतमपि वेदस्यैव, उपस्थितत्वात्। आरामः पुष्पफलोच्चयहेतुर्भूभागः, प्रपा पानीयशाला। वृक्षादी-त्यादिपदाल्लताप्रभृतीनां संग्रहः ॥३८॥

'अतएव' कूपाद्युत्सर्गादिः स्वर्गप्राप्तौ निःसंशयादेव। 'शास्त्रेष्वि'ति—कूपाद्युत्सर्गादिबोधक-शास्त्रेष्वित्यर्थः। 'महाफलं' स्वर्गादिरूपम्। 'बहुद्वारं' बहूनि द्वाराणि कारणानि यस्य तत्तथा। एतेन स्वर्गादिजननं प्रति बहव उपाया दर्शिताः। व्यभिचारवारणन्तु एकशक्तिमत्त्वेन योग्यतायां वेदितव्यम्। 'शीलसंयुते'ति शीलवत्तया पित्रोः शुश्रूषादिकं कन्यायाः सूचयति। अतएव दशपुत्र-समत्वमुपपद्यत इति कश्चित्। वस्तुतस्तु दशपुत्रसमत्वकीर्तनं शीलवत्तायाः स्तुतिपरम्। 'अतएव' कन्यादानद्वारा स्वर्गावाप्तेरेव। 'तत्रैव' मत्स्यपुराण एव। 'गति'रुत्कृष्टदेहावाप्तिः। 'अनपत्या-ना'मिति पञ्चम्यर्थे षष्ठी। अतएवोक्तम् "अनपत्येभ्य" इति। 'विष्णुप्रीत्यर्थमपी'ति। प्रागुक्तं 'कूपारामप्रपाकारी'त्यादिवचनैः कन्यादानस्य स्वर्गजनकत्वमभिहितम्। ततश्च न केवलं स्वर्गार्थि-मपितु विष्णुप्रीत्यर्थमित्यपिकारार्थः। अथ वेवेष्टि व्याप्नोतीति व्युत्पत्त्या सर्वव्यापकस्य विष्णो-रीश्वरस्य सच्चिदानन्दाश्रयत्वेन जन्यसुखाभावात् कथं कन्यादानजन्या तस्य प्रीतिरिति सत्यं, प्रीतिपदं अनुरागार्थकम्। अत एव "तुष्टेर्मोचयतो बद्धानतुष्टेर्बध्नतः पुनः। कारागारमिदं विश्वं यस्य नौमि तमीश्वरम्" इत्याचार्यपद्ये तुष्टिरनुरक्तिरैकान्तिकी भक्तिरिति व्याख्यातम्। एवञ्च विष्णूद्देश्यककर्मजन्यफलं तादृशी भक्तिरेव। भक्तिश्चाराध्यत्वावगाहिज्ञानविशेषरुपा। जगदीशेनापि तथा व्याख्याता। यदि वा स्थितिकारिणो देवविशेषस्य विष्णुपदवाच्यत्वं तदा प्रीतिपदं तत्तत्कर्मजन्यसुखविशेषपरं। तस्य च जन्या प्रीतिः सम्भवति पुराणादौ बहुधा श्रुतेः। 'सामान्यत' इति। देयविशेष्यत्वेन द्रव्यविशेषमनुल्लिख्याभिधानादित्यर्थः। 'विशिष्टफलदे'ति। ये तावत् पुरुषाः स्वर्गादिरुपविशिष्टफलान्यर्थयन्ते तेषां कन्यादानद्वारापि तान्येव फलानि भवन्ति। साङ्गाङ्गि वैदिककर्मण इष्टसम्पादकत्वनियमेन तेषां तत्रैवाधिकारात्। तदितरेषां निष्कामाणां काम्यकर्मभिर्मुक्तिरेव। तदाह निष्कामाणां "विमुक्तिदे"ति। प्रतिपूजितः विधात्राऽनुगृहीतः। परञ्चानुपहत्येति परपीडामजनयित्वा प्रतिग्रहविमुखं बलात् प्रतिग्राह्येति यावत्। अतएव सुखोदयमिति सुखस्य उदयो यस्मिन् दाने इति दानकालेऽपि सुखं प्रतिपादयति। सुखोदर्कमिति सुखमुदर्को यस्य तत्तथा। एतेन दानोत्तरकालीनं सुखमिति बोधितम्। एतच्च फलमैहिकम्। पारलौकिकफलमाह "प्रेत्येति"। "प्रेत्याहमुत्र भवान्तरे" इत्यमरकोषात् परलोक इति तस्यार्थः। इत्येतयोः मनुवचनयमवचनयोरित्यर्थः। 'दानमात्रे'ति "मात्रं कार्त्स्न्यावधारणे" इति कोषात् दानसामान्ये इत्यर्थः। दातृनिष्ठमिति दद्यादित्याख्यातोपस्थितकर्तुः सन्निहितत्वात्।

अथात्र 'कीदृशं दातृनिष्ठं फलं यत् पितृनिष्ठत्वेन कल्प्यते' इत्युच्यते। नच स्वर्गवद्विष्णु-प्रीतिरूपफलमपीति वाच्यं। 'पितुः स्वर्गकाम' इत्यभिलापे स्वर्गफलेन पितुरन्वयवत् 'पितुर्विष्णु-प्रीतिकाम' इत्यत्र विष्णुप्रीत्या सह पितुरन्वयानुपपत्तेः। नचैवं प्रतिनिधिना कर्मणि क्रियमाणे "अमुकस्य विष्णुप्रीतिकामोऽमुककर्माहं करिष्यामीति' वाक्यस्यानुपपत्तिरत्राप्यमुकस्येत्यस्य विष्णु-प्रीतावन्वयासम्भवात्। न चान्वयानुपपत्त्या प्रतिनिधिना विष्णुप्रीतिकामना न कार्येति वाच्यं स्वयं करणासमर्थस्य फलान्तरविमुखस्य कर्तुः कर्मानुपपत्तिरिति चेन्न अमुकस्येति सम्बन्धिनो विष्णुप्रीतावन्वयस्य बाधितत्वेऽपि कर्मणा सहैवान्वयात् वाक्योपपत्तेः। तथाच विष्णुप्रीति-

कामोऽमुकस्यामुककर्माहं करिष्यामीत्यन्वयः। विष्णुप्रीत्या पापक्षयस्तु यदीयकर्मणा विष्णुप्रीतिस्तस्यैवेति भाव्यम्। पित्रादिनिष्ठमपीति न केवलं दातृनिष्ठं पित्रादिनिष्ठमपीति। एतच्च प्रागुक्तसम्वर्तयाज्ञवल्क्यवचनाभ्यां विशिष्य कन्यादाने यत् स्वर्गफलमभिहितं तदभिप्रायकं, नतु विष्णुप्रीतिफलाभिप्रायकं तत्फलस्य कन्यादाने प्रागुक्तत्वाभावात्। दानसामान्ये एव "देयानि विप्रमुख्येभ्यो मधुसूदनतुष्टये" इत्यनेनोक्तत्वात्।

कल्पनाबीजमाह 'ततश्चेति', अशौचान्तद्वितीयदिने कृतसशिरस्कमज्जनादितः। पितरं **दशरथम्**। 'उद्दिश्ये'ति फलभागित्वेनेति शेषः। तथा चात्र दानादेरुद्देश्यतासम्बन्धेन पितृगतफलजनकत्वम्। सामानाधिकरण्यसम्बन्धेन दातृगतफलजनकत्वमपीति भाव्यम्॥३९॥

'तदीयन्त्वि'ति। पित्रादिसम्बन्धीत्यर्थः। कन्यादिकं धनमिति शेषः। 'तदर्थं' मृतपित्रादिभोगार्थम्। 'देयं' विनियोगं, 'अन्तेवासी' शिष्यः, छात्रान्तेवासिनौ शिष्ये इति कोषात्। वा शब्दात् पुत्रादेः परिग्रहः। आपस्तम्बसूत्रे प्रथमार्थपदं धनपरं द्वितीयार्थपदं प्रयोजनपरम् "अर्थोभिधेये शब्दानां धनकारणवस्तुषु प्रयोजने निवृत्तौ" च इत्यादि कोषात्। मासिकादिना श्राद्धेनेति शेषः। 'तद्भोगार्थं' मृतस्य तृप्त्यर्थम्।

अथात्रार्थपदस्य प्रयोजनपरतया तृप्तिवत् अदृष्टादेरपि प्रयोजनत्वाविशेषात् धर्मकृत्येष्वित्यभिधानं पुनरुक्तमिति चेन्न, अदृष्टद्वारा प्रयोजनविशेषलाभायैव तस्य सार्थकत्वात्। अतएव धर्मकृत्येष्विति न तु धर्मेष्वित्युक्तम्। धर्मद्वारा स्वर्गादिजनकयागादिष्विति तदर्थः। एवञ्च साक्षान्मृततृप्त्यर्थलाभाय तदर्थेष्वित्यस्य पृथगभिधानमपि सङ्गच्छते। 'अदृष्टार्थमि'ति अदृष्टद्वारकफलार्थं तदर्थः। 'अतएव' धर्मार्थमर्थविनियोगस्य शास्त्रीयत्वादेव। दानं धर्मार्थविनियोगः, एकैवेत्येव शब्दस्य तेनान्वयस्तेन धर्मार्थविनियोग एवार्थस्यैका गतिः विनियोगकर्त्तुरुत्कृष्टफलजनयितेत्यर्थः। अन्या इति धर्मार्थान्या लौकिकयथेष्टविनियुक्तयो विपत्तयः (विपत्तिजनिकाः)। 'एवञ्चे'ति पित्राद्यदृष्टार्थधनप्रयोगस्य शास्त्रीयत्वे च। 'सुस्थेन' स्वभावस्थितेन, आर्त्तेन पीडितेन। 'दत्तं' दातुमारब्धं। 'श्रावितं' मयेदं धनं धर्मार्थं स्थापितमिति श्रावितम्। 'दाप्यो राज्ञेति शेषः। 'एवञ्चे'ति धर्मार्थमार्त्तकर्तृकदानस्य प्रमाणविषयत्वे चेत्यर्थः। दानोपसर्गत्वाभिधानं "मूमूर्षुस्तामस-" मिति हारीतेन दानोपसर्गेष्वभिधानात्। धर्मार्थेतरदानपरमिति धर्मकारणादिति कात्यायनोक्तेः। 'एवञ्चे'ति। पुत्रकर्तृकदानफलस्य पितृगतत्वे चेत्यर्थः। पित्रादय इति आदिना पितामहादेः परिग्रहः, योऽस्मानुद्दिश्य दास्यतीति बहुवचनात् तेषामपि पित्रादीनामिति। ते ऋत्विगादयः। 'अतएव' ऋत्विगादेः शास्त्रदेशितफलभागित्वाभावादेव। 'दीक्षित'मिति यजमानस्य सोमयागाङ्गदीक्षणीयेष्टौ कृतायां दीक्षितत्वं भवति। 'दक्षिणादिभि'रिति आदिना पारितोषिकपरिग्रहः। 'क्रीता' इति क्रीता इव। प्रकृतक्रयस्यात्रासम्भवात्। तथाच दीक्षितं यजमानं अदीक्षिता ऋत्विजो याजयेयुः, कुतस्तत्राह यतो दक्षिणादिभिः क्रीता इव ते। अनया श्रुत्या ऋत्विजामपि याजनकर्मवेतनरूपदक्षिणादिमत्त्वं प्रतीयते। इतरेषामपीति ऋत्विगितरेषां स्थपतिप्रभृतीनां परिग्रहः। स्थपतिर्गृहादिकर्मीत्यर्थः। 'यासा'मिति यासां कन्यानां वरेण प्रीत्या दीयमानं धनं ज्ञातयः कन्यापितृपक्षीया न आददते न गृह्णन्ति स्वार्थं, अपि तु कन्यायै समर्पयन्ति स न विक्रयः। हि यस्मात् कुमारीणां अर्हणं भूषणादिना परितोषणं तत् केवलं दयामूलकम्। एवमेव कुल्लूकभट्टः। 'अतएव' विक्रयस्य दोषजनकत्वादेव॥ ४०॥

'एवञ्च' शूद्रस्यापि कन्याविक्रयस्य निषिद्धतया कन्यादानस्याङ्गीकार्यत्वे चेत्यर्थः। 'अतएव' दानेन कन्यायां स्वत्वादेव। 'साधारणं' सर्ववर्णसाधारणम्। 'क्रमागतं' पितृपितामहादिक्रमेणा-

गतं दायरूपम्। 'प्रीतिदान'मिति प्रीत्या दानं यस्य तत्तथा। जाभातृतया श्वशुरादितो लब्धमिति प्राप्तमित्यस्यार्थः। ननु धनग्रहणपूर्वककन्यादानस्यासुरविवाहे सत्त्वेन तस्य च विक्रयरूपतया आसुरविवाहस्य वैश्यशूद्रान्तर्भावेन प्राशस्त्याभिधानमसङ्गतमित्याह 'यत्त्वि'ति। बलिकर्मणि पञ्चमयामार्धसम्बन्धिविशेषकृत्ये। अथवा देवपूजादौ अन्यत्रेति आसनादीतरत्र, नामसङ्कीर्तनमिति अधिकृतविष्णोरित्यस्य नाम्ना सहान्वयस्तेन विष्णुनामसङ्कीर्तनमित्यर्थः। सर्वप्रकारानिष्टहेतुः प्रत्यवायः। 'असम्वृते'ति अनाच्छादितेत्यर्थः।

आज्ञया नरपतेरित्यादिवचने। दारकर्म विवाहः, मृतेति मरणाशौचान्तदिनपरं "यस्य यस्य तु वर्णस्य यद्यत् स्यात् पश्चिमन्तवह" इत्यादिना मरणाशौचान्तदिन एव क्षौरविधानात् जनने तु तन्नियमो नास्तीति बोध्यं। 'बन्धमोक्षे'ति बन्धनान्मुक्तिः। 'दिने'। कश्चित्तु कारागारप्रवेशदिने एवं मोक्षेति कारागारान्मुक्तिदिने इत्यर्थमाह। मखदीक्षणं मखो यज्ञस्तत्र दीक्षणं तत्र वरणं अर्थात् यज्ञवरणदिने। 'अखिलेषु उडुषु' जन्मनक्षत्रेषु। चकारान्निषिद्धवारादिष्वपि। नरपतेराज्ञया द्विजन्मनां क्षौरमिष्टमित्यन्वयः। क्षुरिकर्मेति क्षौरपदस्य क्षुरस्येदं क्षौरमिति व्युत्पत्त्या स्त्रिया नखकृन्तनं नायाति, ततो व्याचष्टे 'क्षुरिकर्मे'ति। तथाच क्षुरिण इदं क्षौरमिति योगात् नापित-कार्यमात्रपरिग्रहात् स्त्रीणां नखकृन्तनमिति यदुक्तं तत् सुष्ठु भाव्यम्। दानान्तरं कन्यातिरिक्तदानम्। 'निशी'ति निषिद्धसमयोपलक्षणम्। ततो ग्रहणप्रकरणे निशीति यत् पर्युदस्तसमयोपलक्षणमिति स्मार्तपादैरुक्तं तदपि निषिद्धसमयतात्पर्यकमेव। अतएव ग्रहणोद्वाहसंक्रान्तियात्रार्तिप्रसवेषु च। दानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यते॥ इत्यत्रापिना प्रतिषिद्धकालान्तरं समुच्चीयते इति तदुक्तं सङ्गच्छते॥ ४१॥

'विवाहेत्वि'ति। अथ दिवाविवाहनिन्दार्थवादेन कल्पनीयनञः प्रसज्यप्रतिषेधपरत्वमिति सिद्धान्तः। ततश्च दिवाभागे विवाहं न कुर्यादिति निषेधविधिः कथमयं सङ्गच्छते? दिवाविवाहस्यापि शास्त्रीयत्वात्। तथाहि "उदगयने पूर्वपक्षे पुण्याहे प्रागावर्तनादह्नः कालं विद्यादिति" गोभिल-सूत्रे पुण्याहपदेन पुण्यं रिक्तादिदोषरहितं यदहः सूर्यकिरणावच्छिन्नकालस्तत्र कर्तव्यता गृह्योक्त-कर्ममात्रस्यावगम्यते। विवाहस्यापि गृह्योक्तत्वात् अहःकर्तव्यत्वमायाति। नचाहःपदमहो-रात्रपरमिति वाच्यं चूडोपनयनादीनामप्यहोरात्रेऽनुष्ठानापत्तेः। एवमपि विवाहस्य दिवानुष्ठेयत्वं न व्याहन्येत। ननु प्रागावर्तनादह्नः कालं विद्यादित्यनेन चूडादिवत् विवाहस्यापि यामद्वयात्मक-पूर्वाह्णनियतत्वं स्यादिति चेन्न, तादृशपूर्वाह्णस्य प्रशस्तकालत्वेनोदगयनादिवन्नियतत्वाभावात्। नच "यथादेशञ्चेति" गोभिल-सूत्रान्तरेण विशेषोपदेशतः सामान्यशास्त्रप्राप्तानामुदगयनादीनां बाधस्याभिहितत्वेन पिण्डपितृयज्ञगर्भाधानादिषु विशेषोपदेशबलेनोदगयनादीनां बाधवद् विवाहेऽपि "विवाहे च दिवाभागे" इति ज्योतिर्वचनेन विशेषशास्त्रेण दिवाकर्तव्यताबाधोऽस्त्विति वाच्यं गोभिल-गृह्ये गृह्यान्तरे च विशेषोपदेशविरहाद्बाधानुपपत्तेः। तस्मादाधुनिकज्योतिर्वचनमनुपादेयम्। अतएव दीपिकाटीकायां राघवाचार्येण "विवाहे च दिवाभागे" इत्यादिवचनं निर्मूलमित्युक्तं गोभिलादि-स्मृतिविरोधादित्यन्तेन। न चैवं शिष्टानां रात्रौ विवाहाचारो दुराचार एवेति वाच्यं "रात्रौ दानं न शंसन्ति" इत्यादिमहाभारतीयेन कन्यादानस्य रात्रौ विधानाद् रात्रावपि विवाहस्य कर्तव्यताप्रतीतेः। उक्तमहाभारतवचने रात्रावित्यस्य रात्रिमात्रे इति नार्थः, विद्यादिदानस्यापि दिवा बाधापत्तेः। देवलेनापि "राहुदर्शनसंक्रान्ती" त्यादिना विवाहनिमित्तकस्नानदानादेः रात्रौ कर्तव्यतामुखेन विवाहस्य रात्रावपि कर्तव्यता सूचिता। अतएव व्यासेन "ग्रहणोद्वाहसंक्रान्ति-यात्रार्तिप्रसवेषु च। दानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यते"॥ इत्यनेन विवाहनिमित्तकदानस्य रात्रावपि

कर्तव्यताविधानेन विवाहस्याप्युभयत्र कर्तव्यत्वं प्रतिपादितम्। अतएव "विवाहः सार्वकालिकः" इत्यनेनोदगयनादीनामनियम इत्यभिहितम्। श्राद्धविवेके शुलपाणिनापि "स्नानदानादिकं कुर्युर्निशि काम्यव्रतेषु च' इति देवलवचनव्याख्यानावसरे "आदिशब्दः श्राद्धपरः अतो रात्रौ रविसंक्रमणे स्नानदानश्राद्धादीनि कर्तव्यानि, रात्रौ विवाहे यदा प्रातर्वृद्धिश्राद्धं न कृतं तदा रात्रावपि कार्यम् एतेनासम्भवे दिवाभागान्तरेऽपि वृद्धिश्राद्धमवगम्यते।" सन्दर्भेऽस्मिन् 'रात्रौ विवाह' इत्यनेन विवाहस्य दिवारात्रिकर्तव्यताऽङ्गीकृता। कालादर्शेऽपि "निशि चेत् सर्वेषु द्वादशस्वपि मासेषूद्वहे"दित्युक्तम्।

एव "मस्तमिते ध्रुवं दर्शयति" इति पारस्करसूत्रव्याख्यायां अस्तमिते इति दिवाविवाहे अस्तमिते सूर्ये ध्रुवमुदीक्षस्वेति प्रैषेण वरो वधूं प्रेरयति। रात्रिविवाहे तु गोदानान्तरमेवेति जयरामः। अनेन भाष्यसन्दर्भेन विवाहे रात्रिकालानियम इत्यवगम्यते। तत् पारस्करीयहरिहरभाष्येऽपि "सा च वरप्रेषिता सती तच्चक्षुरिति मन्त्रेण सूर्यं निरीक्षेत" इति दिवाविवाहपक्षे। तथा "दिवाविवाहश्चेत् तदाऽस्तमिते सूर्येऽमुकि ध्रुवं प्रेक्षस्वेति प्रैषेण वधूं ध्रुवं तारकाविशषं दर्शयति। रात्रौ विवाहश्चेत् तदा वरदानानन्तरमेव" इति च सुव्यक्तमभिहितम्। तस्माद् विवाहस्य दिवा रात्रौ च प्राचामाचार आसीदिति स्पष्टमवगम्यते। ग्रन्थकृता तु गौडानां रात्रावेव विवाहाचार इति प्रदर्शयता तदाचारमुलकमिदमाधुनिकं ज्योतिर्वचनं प्रदर्शितमिति भाव्यम्।

'धर्मे कर्मणि' पूजादौ। 'माङ्गल्ये' मङ्गलाय हिते विवाहाद। 'अद्भुतदर्शने' उत्पातदर्शने। 'गन्धादाविति' सम्पूज्य गन्धपुष्पाद्यैरिति व्यासवचनेनोपस्थिते गन्धपुष्पमाल्यादौ। 'विशेषं' विशेषविधिम्। सप्तमीति निमित्तसप्तमीत्यर्थः। तेन स्वस्तिवाचनस्य नैमित्तिकत्वात्तत्र निमित्तोल्लेखावश्यम्भावोऽशौचान्तद्वितीयदिनादिवदित्याह अमुककर्मणीति। ब्राह्मणान् स्वस्ति वाचयेदित्यत्र ब्राह्मणानिति बहुवचनश्रुतेराह भवन्त इति। 'निरोङ्कारं महीपता'विति। ननु पूर्वार्धेन क्षत्रियाणां निरोङ्कारपुण्याहोच्चारणस्य सिद्धत्वात् कथमिह पुनरुपादानमिति सत्यं क्षत्रियवैश्योरिति समस्तपदोपात्तयोर्मध्ये वैश्यस्य विशेषत उपांशुविधानात् क्षत्रियस्यापि साहचर्यन्यायेनोपांशुपुण्याहोच्चारणमायाति, तन्निवृत्तये तदुपादानमिति ध्येयम्। उपांशूच्चारणन्तु यत्र जिह्वौष्ठं मनागपि न चलति तदिति। रात्रौ विवाहवाक्ये अद्यपदं न प्रयोक्तव्यं, अपि तु रात्रौ चेदस्यां रात्राविति केषाञ्चिन्मतमपाकर्तुमाह वाक्ये त्वित्यादि। 'सोमग्रहणेऽपी'ति दानादिनिमित्तकचन्द्रग्रहणस्य रात्रिनियतत्वेनेति भावः। 'अन्यत्र' विवाहादौ ॥ ४२ ॥

'आब्दिके' इत्यादि। आब्दिके इति पितृकृत्यविशेषणं। चकारान्मासिकादौ च। कश्चित्तु आब्दिके अब्दसाध्ये दैवकृत्ये, पितृकृत्ये पार्वणादौ इति व्याचष्टे। विवाहादावित्यादिपदं यात्राग्रहचारपरं, यत् कर्म सूर्यभोग्यराश्युल्लेखेन विहितं यच्च विशिष्योदगयनादिविहितं तत्परञ्च। अत्र ग्रहचारो ग्रहाणां मध्ये प्रथमोपस्थितस्य सूर्यस्य चारो राश्यन्तरगमनं तन्निमित्तके कर्मणि सौरो मास इत्यर्थः। स्मृतः (उल्लेखने विहितः)। 'यज्ञादावि'ति। अत्र यज्ञपदं माससंवत्सरसाध्यसत्रयागपरम्। आदिपदं भृतिवृद्धिपुंसवनसीमन्तोन्नयननामकरण-निष्क्रमणान्नप्राशनचूडादिपरं। अत्र भृतिः वेतनं वृद्धि धनवृद्धिः। अत्र प्रमाणं मलमासतत्त्वेऽनुसन्धेयम्। 'तिथिकृत्ये चे'ति। तिथिविभाजकतावच्छेदकधर्मपुरस्कारेण विहिते इत्यर्थः। 'व्रते' चान्द्रायणादौ। 'संक्रान्तिविहिते' इति संक्रान्त्यां कुर्यादिति विधिप्रतिपाद्ये कर्मणीत्यर्थः। संक्रान्तिः परिकीर्तिता, उल्लेखवाक्येऽमुकसंक्रान्त्यामिति योजनीयम्। तेन "अयने विषुवे तद्वत् षडशीतिमुखे तथा। एतेषूद्यापनं कुर्याद्विधिदृष्टेन कर्मणे"ति वचनाद्देवप्रतिष्ठादेः संक्रान्तिमात्रनिमित्तत्वाभावेऽपि

संक्रान्तुग्रल्लेख इति भाव्यम्। संक्रान्तिकृत्यमपि सौरेणैव, उत्तरार्धे सौरप्रतिपादकरविराशिस्थितिरितिदर्शनात् इतरादिपदानां व्युत्पत्त्या तथावगतेश्च। एतेन संक्रमणात् पूर्वस्मिन् पूर्वसौरमासोल्लेखः, परस्मिन् कर्मणि परसौरमासोल्लेखः। "अध्वायनञ्च ग्रहचारकर्म" इत्यनेन रविसंक्रमणकृत्यस्य सौरविहितत्वात् तत्साहचर्येण इतरस्मिन्नित्यस्य संक्रान्तीतरसौरविहिते कर्मणीत्यर्थः। 'प्रत्यङमुखा वरयन्ति प्रतिगृह्णन्ति प्राङमुखाः" अत्र स्मार्तपादैर्वरयन्तीत्यस्य गोत्राद्यभिधानपूर्वकं ददतीति यद्विवृतं तन्न समीचीनं विवाहकर्तृपक्षाणां कन्यावरणस्योक्तत्वात्। तथाच सांख्यायनगृह्यम्—"प्रत्यङमुखा आवहमाना गोत्रनामाद्यनुकीर्तयन्तः कन्यां वरयन्ति"। आश्वलायनगृह्यपरिशिष्टम्—"अथ कन्यावरणं कन्यां परिणेष्यमाणो द्वौ चत्वारोऽष्टौ वरयितुराप्तान् प्रशस्ताकारकर्मणोऽनृक्षरा ऋजवः सन्तु पन्थाः" इति प्रहिनुयात्। ते तावतीभिः पुरन्ध्रीभिः सहिता मङ्गलगीतितूर्याभ्यां कन्यागृहमेत्य शुभे पीठासने प्राङमुखासीनायाः दातृज्ञातिबान्धवोपेतायाः कन्यायाः पाणौ फलं प्रदाय कन्यावरणकाले वृणीरन्नासीनाः प्रत्यङमुखा वशिष्ठगोत्रोद्भवायामुष्य प्रपौत्रायामुष्य पौत्रायामुष्य पुत्राय श्रुतशीलनाम्ने वराय, वात्स्यगोत्रोद्भवाममुष्य प्रपौत्रीममुष्य पौत्रीममुष्य पुत्रीं सुशीलानाम्नीमिमां कन्यां भार्यात्वाय वृणीमहे इति ब्रूयुरित्यादि। एवञ्च वरयन्तीत्यस्य दानार्थत्वे वृणोतेर्लक्षणा स्यात्, अपिच तद्व्याख्यायां "कन्यां वरयमाणानामित्युपक्रमो न सङ्गच्छते। केचित्तु शुचिनान्निधावित्युक्तेर्दातुः प्रत्यङमुखत्वं साग्नेरेवेति वदन्ति। सन्दिग्धमूलकमपीदं पठन्ति च यथा "निरग्निकः सम्प्रदाता कन्यां दद्यादुदङमुखः"। प्रतिगृह्णन्तीति श्रवणात् इति अदृष्टार्थकत्यक्तद्रव्यस्वीकारस्य प्रतिग्रहरूपत्वादिति भावः। 'अतएव' दाने प्रत्यन्मुखत्वस्य गृह्यपरिशिष्टीयस्वरससिद्धत्वादेव। 'सर्वत्रे'ति, अत्र व्यतिक्रमे इति ग्रहीता प्राङमुखः दाता चोदन्मुख इत्यर्थः। शिष्टानामाचारश्चैवमेव स्मर्यते यथा पार्वत्याः विवाहे—"उपविष्टस्त्रिनेत्रस्तु प्राचीं दिशमुदैक्षत। सप्तर्षिसेवितामाशां शैलेन्द्रोप्यवलोकयत्। सप्तर्षिसेवितामाशां—उत्तरां दिशम्। अवलोकयदिति अडभावश्छान्दसः। तथा प्रभावतीविवाहे "जयन्तं प्राङमुखं कृत्वा विश्वकर्मा ह्युदङमुखः, कन्यां प्रत्यङमुखीं कृत्वा सालङ्कारां प्रभावतीं। प्रभावत्याः करं कृत्वा जयन्तस्य करोपरि" इत्यादि। अत्र व्यतिक्रम इति "प्रत्यङमुखः सम्प्रदाता प्रतिग्रहीता प्राङमुखः" इति स्मार्तपादैर्लिखितं, व्याख्यानं तदाचार्यचूडामणिसम्मतमेव। तन्नातिपेशलं व्यतिक्रमस्य क्रमविपर्ययरूपत्वेन दातृग्रहीत्रोरुपदिष्टधर्मपरिवृत्तिरूपतया पर्यवसानात् व्यतिक्रमपदात्तथानवगतेः। तथा चान्यत्र—दातुर्यो धर्मः पूर्वदिङमुखत्वं स खलु विवाहे ग्रहीतुरेवमन्यत्र ग्रहीतुर्यो धर्म उदङमुखत्वं स इह दातुरित्ययमेव तस्य वचनस्यार्थः। दातृग्रहीत्रोरुपदिष्टधर्मवैपरीत्यस्य व्यतिक्रमरुपत्वेऽभिप्रीयमाणे दातुः प्राङमुखत्ववैपरीत्येन प्रत्यङमुखत्ववत् ग्रहीतुरुदङमुखत्ववैपरीत्येन दक्षिणमुखत्वापत्तेः। न चेष्टापत्तिः केनापि तथाऽनभ्युपगमात्। पूर्वोपदर्शितशिष्टाचारविरोधापत्तेः। प्रतिगृह्णन्ति प्राङमुखा इत्यनेन विरोधापत्तेश्च। दातुः प्रत्यङमुखत्वे प्रतिग्रहीतुः प्राङमुखत्वे च प्रमाणान्तरं दर्शयति 'तथाचे'ति। सम्बन्धविवेकधृतमिति शेषः। विवाहतत्त्वार्णवे तु वरयन्तीति गृह्यपरिशिष्टीयं तथा व्याख्याय एवञ्च प्राङमुखायाभिरूपायेति महाजनपरिगृहीतपुराणवचनमपि न निर्मूलमित्युक्तम्। एतेनैतदवसीयते यदेतस्य निर्मूलत्वशङ्का न केवलमाधुनिकी। गृह्यपरिशिष्टवचनसंवादेन तु तस्य समूलत्वं परिचिकल्पयिषितम्। 'हाटकाचले' कनकाचले, कनकं हेमहाटकमित्यमरकोषात्। 'कन्यादाने' वाग्दाने। 'उत्सर्गे' सम्प्रदाने इति कश्चित्। अपरे तु कन्यादाने कन्यासम्प्रदाने। उत्सर्गे ऋग्वेदीयवृषोत्सर्गे इति व्याचक्रुः। 'सम्प्रदत्ते'ति अथ दानस्य वर्तमानकालीनत्वेन तत्रातीतार्थकपदप्रयोगः कथमित्याह 'दृष्टार्थत्वादि'ति। तथाच पुंवचसां काल्पनिकवाक्यानामभिलापादीनां दृष्टप्रयोजनकत्वादुक्तस्थले क्तप्रत्ययस्यातीतत्वरूपोऽर्थो न विवक्षितः ॥४३॥

'उपपदमाहे'ति, उपपदं समीपोच्चारिपदम्। तत्र प्रमाणमाह 'विष्णुपुराण'मिति। ततश्चे'ति अशौचकालात् परतश्च इत्यर्थः। दशमेऽहनीति सङ्करेणाशौचह्रासे ज्ञेयम्। नराख्यं शर्मवर्माद्युपपदयुक्तं कुर्वीतेत्यन्वयः। आदिना भूतिदासवाचकपदयोः परिग्रहः, अतएव "शर्मवद् ब्राह्मणस्य स्याद् राज्ञो रक्षासमन्वितं। वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रैष्यसंयुतं।" इति मनुवचनव्याख्यानवसरे शर्मवर्मभूतिदासादीन्युपपदानि कार्याणीत्यभिधाय शुभशर्मा, बलवर्मा, वसुभूतिः, दीनदासः इत्युदाहृतं कुल्लूकभट्टेन। 'देवपूर्वमि'ति, अत्र पञ्चमीतत्पुरुषः। तदेवाह "देवात् पूर्वमिति। देवेत्यानुपूर्व्यवच्छिन्नवाचकशब्दात् पूर्वं नामेति स्थूलार्थः। अत्र कश्चिद् देवपूर्वं नराख्यमिति देववाचकपदपूर्वकं नरनाम नरवाचकमिति व्याख्येयम्। कुलदेवतासम्बद्धं नाम कुर्यादित्येकवाक्यत्वात्। अत्र कुलसम्बद्धं देवतासम्बद्धं वेति मदनपारिजातः। शर्मा देवश्च विप्रस्येत्यत्रापि देवश्चेति देववाचकशब्दो बोध्यते। तथाविधनाम्नः शर्मवर्माद्यन्तता। देवदत्तशर्मा, ईन्द्रवर्मा, चन्द्रगुप्तः, शिवदास इत्यादीति व्याचष्टे। तन्न मनोरमं, शर्मा देवश्च विप्रस्येत्यादौ देवपदस्योपपदगणपाठात्। देवपूर्वमित्यत्र तत्पुरुषापेक्षया जघन्यस्य बहुव्रीहेराश्रयाच्च। एवमुदाहृतेषु इन्द्रवर्मादिषु देववाचकपदपूर्वकनामाश्रुतेः। देवशब्दस्योपपदत्वाभावे "देव्यन्तास्तु स्त्रियः स्मृताः" इत्यनेन द्विजातिस्त्रीणां देव्यन्तताभिधानासङ्गतेः। 'देवपूर्वमि'ति तु ब्राह्मणनाममात्रसम्बद्धम्। शर्मा देवश्चेत्येकवाक्यत्वात्। अथात्र पाठक्रमानुरोधाद् देवपदान्ततैव नाम्न आयाति प्रमाणान्तरमतो दर्शयति 'शर्मान्त'मित्यादि। तेन देवान्तनाम्न एव शर्मान्ततया देवशर्मेति स्पष्टमेव प्रतीयते। अत एव मैथिलैरपि अमुकदेवशर्मेति वाक्ये प्रयुक्तम्। एतावता प्रबन्धेन देवपूर्वमित्यादिवचनतात्पर्यपर्यालोचनया देवशर्मणोरुपपदत्वमेव प्रतिपादितं न तु नाम्नो देववाचकपदपूर्वप्रतीकत्वमपि निराकृतम्। अतएव स्मार्तपादैः ज्योतिस्तत्त्वे संस्कारतत्त्वे च "आदौ घोषवदक्षरं यरलवान् मध्ये पुनः स्थापयेदन्ते दीर्घविसर्जनीयसहितं नाम प्रयत्नात् कृत"मिति गोभिलसम्मतं गर्गवचनपूर्वार्धमभिधाय व्याख्यातम्। कीदृशं नाम तत्राह यत्कवर्गादिपञ्चकतृतीयादिवर्णाद्यं यरलवान्यतमवर्णमध्यं, दीर्घं द्विमात्रं, आकारादि। विसर्जनीयः, विसर्गः, एतदुभयान्यतरं यस्यान्ते अर्थादसम्बुद्धिप्रथमान्तप्रयोगः अन्यविभक्तेरसम्भवात्, कृतं कृदन्तमिति। उदाहृतञ्च संस्कारतत्त्वे यथा बलिध्वंसी विश्वम्भर इत्यादि। ज्योतिस्तत्त्वे च नारायण जनार्दनेत्यादि नाम कुर्यादित्युदाहरणान्तरमुक्तम्। 'एव'मित्यादि यथा शास्त्रानुसारेण दशमादिदिने नामकरणादि। एवं कुलधर्मानुसारेण कालान्तरेऽपि मङ्गलविशेषाणां नामकरणादीनामाचरणमित्यर्थः। यद्वेष्टमित्यादेरयमर्थः प्रत्येतव्यः, षष्ठे मासि अन्नप्राशनं अथवा कुलधर्मत्वेन यन्मङ्गलमिष्टं तत् कर्तव्यं, तेनोक्तकालादन्यकालेऽपि अन्नप्राशनादेः कर्तव्यतेति, कुल्लूकभट्टोऽप्येवम्। 'वसुघोषादी'ति। अत्रापि कुलधर्मानुरोध एव हेतुर्मन्तव्यः। 'पुंयोगादि'ति "पुंनाम्नः पुंयोगे" इत्यनेन ईप्रत्ययः। व्यवहारोऽपि 'तथे'ति। शूद्रपत्नीनां तथा व्यवहारः दास्यन्तनामव्यवहार इत्यर्थः। "द्विजस्त्रियो हि देव्यन्ताः दास्यन्ताः शूद्रजन्मनः" इति वचनात्। 'प्रकरणा'दिति द्विजातिप्रकरणादित्यर्थः। प्रकरणापेक्षया वाक्यस्य बलवत्त्वादाह 'द्विजाती'ति द्विजातिपुरुषस्य पत्नीत्वयोग्यत्वसम्बन्ध इति। पत्नीत्वञ्चाह विष्णुः सवर्णाया अभावेऽनन्तरयैवापदि नत्वेवं द्विजः शूद्रयेति। धर्मकार्यं कुर्यादित्यनुवर्तते वाक्यान्तरीयम्। अत्र द्विजातिमात्रस्य यया सह यज्ञसंयोगो विहितः सैव पत्नीति, "पत्युर्नोयज्ञसंयोगे" इत्यनेन तत्पदसिद्धेः। प्रागुक्तविष्णुसूत्रेण शूद्रया सह द्विजातेस्तन्निषेधात् तस्यां द्विजातिपत्नीत्वयोग्यता नास्तीति ध्येयम्। योग्यतानिवेशेनादत्तद्विजकन्यानामपि देव्यन्तत्वेन नामाभिधानं युक्तमिति। 'तत्परत्वानौचित्यादि'ति। अत्रेदं तात्पर्यमवगन्तव्यं देवपूर्वं नरनामैव शर्मवर्मादियुक्तं न तु नारीणामिति। तथा दर्शनात् अहमितिपदप्रयोगदर्शनादित्यर्थः। 'क्षेत्रं' पुरुषोत्तमादिक्षेत्रम्। क्षेत्राधिदेवता पुरुषोत्तमादयः। 'अधिकारः' कर्मादाविति शेषः॥ ४४॥

'कन्यावरयो'रिति, पाठक्रमाच्छाब्दक्रमस्य ऋष्यशृङ्गोक्तस्य बलवत्त्वादिति। अत्र पाठक्रमः प्रागुक्त आश्वलायनगृह्यपरिशिष्टीयः शिवदत्तप्रपौत्रीत्यादिना विहितः। तदपेक्षया शाब्दक्रमस्य वरगोत्रं समुच्चार्येति ऋष्यशृङ्गवचनीयानन्तर्यबोधकशब्दप्रतिपादितक्रमस्य। 'बलवत्त्वादि'ति। पाठक्रमशाब्दक्रमयोर्मध्ये शाब्दक्रमस्य बलवत्त्वमाह भट्टः यथा "श्रुत्यर्थपठनस्थानमुख्यप्रावर्तिकाः क्रमा एषां समवाये पारदौर्बल्यम्"। अत्र श्रौतक्रमक एव शाब्दक्रमः। 'विशेषणन्त्विति' किन्तु नान्दीमुख इति विवाहस्य विशेषणमित्यर्थः। 'विवाहादेवे'ति एवकारेण विवाहपूर्वक्रियाव्यवच्छेदः। तेनाकृतविवाहेन पुरुषेण दत्तकग्रहणं न कर्त्तव्यमिति सूचितम्। चकारस्त्वर्थ इति नान्दीमुखविशेषण-विशिष्टविवाहस्यैकत्वेन समुच्चयायोगादाह त्वर्थ इति व्यवच्छेदार्थकतुकारसमानार्थक इत्यर्थः। अथ "त्वन्ताथादिनपूर्वभाक्" इत्यमरेण तुकारान्तपदस्य पूर्वेण सह सम्बन्धव्यवच्छेदार्थ एव प्रदर्शितः। अतएव स्मार्तपादैरपि जन्माष्टमीप्रकरणे "अर्धरात्रेऽथवा कुर्यात् पारणन्त्वपरेऽह्नि" इति वचन-व्याख्यानावसरे तुकारेनार्धरात्रं व्यवच्छिद्य उपवासपरदिने पारणं विधीयते इत्यन्तेन सन्दर्भेन तुकारान्तपदस्य तदर्थ एवाङ्गीकृतः। तत् कथमत्र पूर्वव्यवच्छेदकत्वासम्भवाच्चकारस्य तुका-रार्थमित्याह 'अन्यत्रे'ति।

'पार्वणादौ'। नचान्यत्र पितृपूर्वकमित्यनेन वचनपरप्रतीकेन विवाहेतरकर्मणि प्राप्तस्य पित्रादिक्रमस्य विवाहे प्राप्त्यनुपपत्त्या स क्रमः कथं व्यवच्छिद्यते इति वाच्यं चकारस्य व्यत्ययेन प्रपितामहपूर्वकमित्यनेनान्वयात् समुच्चयरूपगत्या विवाहे न केवलं प्रपितामहपूर्वकं पितृपूर्वक-ञ्चेत्यवगतेः पितृपूर्वकत्वस्यापि लाभात्। 'व्यवच्छेदाये'ति विवटनायेत्यर्थः। विवटनञ्च चकारस्य तुसमानार्थकत्वेनेति मन्तव्यं किमत्र विनिगमकमिति चेत् लाघवमेवेति ब्रूमः। तथाहि समुच्चये वाक्यद्वयं कल्पनीयं त्वर्थत्वे चैकमेवेति। 'बाधापत्तेरि'ति पार्वणविकृतित्वेनापि नान्दीमुखे पित्रादिक्रमाभिलापस्य बाधापत्तेरिति भावः। विकृतिगतविशेषाभिलापेन न्यायप्राप्तप्राकृतपित्रादि-क्रमाभिलापस्य बाधो न दोषाय इत्याह 'वाक्यभेदापत्तेश्चे'ति। नान्दीमुखस्य विवाहविशेषणत्वे तादृशविवाहे प्रपितापामहपूर्वकं वाक्यमुच्चारयेदित्येक एव विधिः कल्पितः स्यादन्यथा तु वाक्य-द्वयमिति भावः। 'सकृ'दित्यादि पित्रादिधनविभागो भ्रातृणां धर्मतः कृतः सकृदेव भवति न पुनरन्यथा क्रियते, तथा कन्या सकृदेकस्मै दत्ता पुनरन्यस्मै न दीयते। सकृदेव ददानीत्याह, त्रीण्येत्यानि सतां साधूनां सकृत् भवन्ति। "सकृदाह ददानि" इत्यनेनैव सकृत्करणसिद्धौ प्रकृतो-पयोगित्वादेव पृथगभिधानं इति कुल्लूकभट्टपादः। अत्र ददानीत्यस्य ददे इतिवत् वर्तमानार्थकता अनुमतिग्रहणार्थकत्वे सकृत्त्वाभिधानमप्रयोजकमिति भावः। निश्चितमूलेति मूलं श्रुतिः। नन्वेतदेव त्रिरुच्चार्य कन्यां दद्याद् यथाविधि" एतस्यापि श्रुतिमूलकस्य परिशिष्टीयस्य विषयत्वेन ददानीति ततो वदेदित्यादिनाञ्च, ददानीत्यन्तवाक्यस्य वारत्रयोच्चारणमायाति कथं तन्मनुवचनेन बाध्यते इत्यत आह "वेदार्थोपनिबन्धृत्वा"दिति साक्षाद्वेदार्थग्राहित्वादित्यर्थः॥४५॥

बहिः शालायामित्यादिपारस्करसूत्रस्यायमर्थः शालायामिति सुपांसुप। शालायाः प्रधानगृहस्य बहि (रङ्गने), एतच्च स्वयं व्याख्यातम्। कीदृशे तत्राह 'उपलिप्ते' इत्यादि विशेषणानि, एतेषा-मर्था निर्दिश्यन्ते यथा उपलिप्ते जलगोमयैरिति शेषः। 'उद्धृते' उल्लिखितरेखाभ्य उत्थिताया मृत्तिकायाः समुद्धरणे कृते इत्यर्थः। 'अवोक्षिते' कुशवारिणाऽभ्युक्षिते। एतच्च सर्वं उल्लिख्य उद्धृत्याभ्युक्ष्य इत्यादि प्रयोगविधिदर्शनाज्ज्ञेयं। अग्निमुपसमाधायाग्निं संस्थाप्येत्यर्थः। कुमार्याः स्वीकाराय पाणिं गृह्णीयात् करे गृहीत्वा तथा कन्यामित्यस्य समानार्थकमिदम्। 'यजुर्वेदिनामि'त्यादि। अत्र कर्तरि षष्ठी। 'दानात् पूर्वमि'ति। नचाग्निमुपसमाधाय कन्यां गृह्णीयादित्यनेन ग्रहणात्

प्रागेवाग्निस्थापनं विहितं न दानात् पूर्वमिति। तत् कथं दानात् पूर्वमग्निस्थापनमुक्तमिति वाच्यम्, दानप्रतिग्रहयोरव्यवहितपुर्वोत्तरकालकर्तव्यत्वादग्निस्थापनानन्तरं प्रतिग्रहविधानेनैव दानस्यापि तदनन्तरकालकर्तव्यत्वस्याक्षेपलभ्यत्वात्। तस्माद्यजुर्वेदिनां कन्यादाने प्रतिग्रहे चाग्निस्थापनं पूर्वमपेक्षणीयमेव। अतएव प्राङ्मुखायाभिरूपाय वराय शुचिसन्निधावित्यनेन यदग्निसान्निध्यमभिहितं तद्यजुर्वेदिविषयमेव वाच्यम्। एवञ्च सामगदेयेति यत्स्मार्तपादैः प्रतिपादितं तत्प्रदर्शनार्थमिति ज्ञेयम्। नचैतत् सर्वशाखिसाधारणमस्तु सर्वशाखाप्रत्ययमेकं कर्मेति न्यायात् यन्नाम्नातं स्वशाखायां परोक्तमविरोधि चेत्यादिवचनाच्चेति वाच्यम्। गोभिलाश्वलायनाभ्यां साङ्गुष्ठपाणिग्रहणात् प्रागग्निस्थापनस्योक्तत्वेन दानप्रतिग्रहयोरग्निस्थापनपूर्वकत्वास्वीकारे तद्विरोधात्। 'ज्योतिषेष्वि'ति रेवत्युररोहिणीत्यादिशास्त्रेषु। 'निरपेक्ष कर्मत्वेने'ति। अलब्धावकाशकर्मत्वेनेत्यर्थः। अथ विष्णुभाद्ये त्रिके चित्रे जेष्ठायां ज्वलने यमे, एभिर्विवाहिता कन्या भवत्येव सुदुःखितेतिवचनेन चित्रादिनक्षत्रेषु विवाहे निन्दाश्रवणात् त्रिषु त्रिषूत्तरादिष्विति पारस्करोक्तं विरुध्येत इति सत्यं, यजुर्वेदिनामापत्कल्पे दोषाभावः, अनापदि तु दोष एवेति विषयभेदेन व्यवस्थयाऽनयोर्विरोधपरिहारो मन्तव्यः। अत एव ज्योतिस्तत्त्वे पारस्करोक्तमापद्विषयमेवेति। 'एकादशीतत्त्वोक्त'मिति। ध्यायेन्नारायणं नित्यं स्नानादिषु च कर्मसु इति योगियाज्ञवल्कीयवचनादिकं तस्मिन् धृतम्। आर्तिर्मुमूर्षावस्था, रात्रावपीत्यपिना प्रतिषिद्धकालान्तरं समुच्चीयते। तन्त्रे प्रधाने, स्नुषामनिरुद्धस्त्रियम्। विरहः सुचिरं संसर्गाभावः। स्थानान्तरगमनमटनं स्वप्नो निद्रा। ४६॥

'ऋतुकाले'ति। ऋतुर्नाम स्त्रीणां शोणितदर्शनोपलक्षितगर्भधारणयोग्यः गर्भग्रहणयोग्य इति यावत् शरीरावस्थाविशेषः। तत्काल इत्यर्थः। 'प्रयत्नत' इति। स्त्रीसंसर्गस्यावश्यकत्वं द्योतयति, तेन ऋतौ भार्यामुपेयादिति नियमविधिः। वेति पक्षान्तरम्। पर्ववर्जमिति तु ऋतावनृतौ चान्वेति। तदित्यनेन गमनमात्रं परामृश्यते। तथाच ऋतुकालादन्यत्रापि पर्वेतरस्मिन् दिने स्त्रीणामभिमतञ्चेद् गमनं तत्कार्यमिति समुदायार्थः। पर्वेतरऋतुकालाभिगमननियमस्तु अनुत्पन्नपुत्रस्यैव, तदेवाह "यावत्पुत्रो न जायते" इति। अत्र च "ब्राह्मणो ह वै जायमानस्त्रिभिर्ऋणैर्ऋणवान् जायते, यज्ञेन देवेभ्यः प्रजया पितृभ्यः स्वाध्यायेन ऋषिभ्यः" इत्येतत्श्रुतिर्मूलम्। पुत्रोत्पादनशास्त्रस्य चैकपुत्रोत्पादनेनैव चरितार्थत्वमिति बोध्यं "स एव धर्मजः पुत्रः कामजानितरान् विदु" रित्युक्तेः। दशास्यां पुत्रानाधेहि" इतिश्रुतिर्बहुपुत्रप्रशंसापरेति ध्येयम्। 'मण्डनं भूषणं। 'जातु विधवावेश'मिति जातु कदाचित्, विधवावेशं श्वेतवस्त्रादिकम्। 'अप्रजे'ति प्रजापदं पुत्रपरमुत्तरार्धे दौहित्रोपादानात्। 'दौहित्रजाल्लोका'दिति दौहित्रजन्य आनन्त्याख्यस्वर्गलोकः प्रत्येतव्यः "पौत्रेणानन्त्यमश्नुते" "दौहित्रोऽपि ह्यमुत्रैनं सन्तारयति पौत्रवत्" इत्येताभ्यां तथावगतेः। 'अवाच्यो'ऽनिन्दनीयः। 'तस्य' जामातुः। 'मन्युं' क्रोधं "मन्युर्दैन्ये क्रतौ क्रुधि" इति कोषात्। 'न कारयेत्' नोत्पादयेत्। कन्यां प्रति वरस्य सर्वदा सन्तुष्टये ज्ञेयमेतत्। 'ब्राह्मदेये'ति। ब्राह्मविवाहाय दत्ता चेत्तदा तस्यामप्रजायां विशेषेण दोषेण नैव भोज्यमित्यर्थः। विशेषेणेति हेतौ तृतीया। प्रायश्चित्तीयते प्रायश्चित्ती सन् ईयते पूयते इत्यर्थः। जपे होमे इत्यादि काम्ये बोध्यं "नासौ फलमवाप्नोति" इति श्रुतेः। व्रतेषु लोपक इति अत्र व्रतपदं नित्यव्रतपरं षष्ठ्यर्थे सप्तमीयम्। 'सन्दंशः' साडाशीति ख्यातः। 'वानप्रस्थं त्रयो मता' इत्यत्र वानप्रस्थञ्च भिक्षुकमिति क्वचित् पाठः। त्रयो मता इति पाठे तु "क्षत्रियस्यापि कथिता आश्रमा स्त्रय एव हि" इत्यनेन पौनरुक्तमतो हेतुसाध्यभावेनानयोरन्वयः, तथाहि यतो मुनिभिः क्षत्रियस्य त्रय आश्रमाः कथिता अतस्तस्य ब्रह्मचर्याद्याश्रमास्त्रयो ज्ञेया इत्यर्थः।

'अत्र विशेषयति' इति। अत्र विवाहस्यावश्यकत्वे विशेषमाह इत्यर्थः। स्त्रिया वियुज्यते स्त्रीविहीनः स्यात् स रण्डाश्रमी भवेदित्यर्थः। रण्डो मृतपत्नीकः, रण्डः स्यान्मृतपत्नीक इति कोषात्। नास्ति यज्ञेऽधिकारितेति यज्ञानां पत्नीसंयोगेनैवोपदेशादित्यभिप्रायः। यद्यपि अष्टचत्वारिंशद्वर्षेभ्यः परतोऽपि पत्न्यभावे यज्ञाधिकारो न भवितुमर्हति तथापि वचनप्रामाण्यात्तदानीं पत्नीप्रतिनिधिमुपकल्प्य यज्ञः करणीयः। अतएव छन्दोगपरिशिष्टं मृतायामपि भार्यायां वैदिकाग्निं न हि त्यजेत्, उपाधिनापि तत् कर्म यावज्जीवं समाचरेत्। रामो पि कृत्वा सौवर्णीं सीतां पत्नीं यशस्विनीं। ईजे यज्ञैर्बहुविधैः सह भ्रातृभिरच्युतः। अत्र रण्डाश्रमीति कीर्तनादनाश्रमित्वनिबन्धनप्रत्यवायाभावेन तदानीं विवाहस्य नावश्यकत्वमित्यपकर्षनिमित्तत्वमपि न स्यादिति बोध्यम्।

'अष्टचत्त्वारिंशदब्दमि'ति। वयो जीवितकालस्तस्याब्दपदार्थेनान्वयः। यावत्पदं परिमितकालार्थकम्। नञर्थश्च प्रागभावः, तेनाष्टचत्वारिंशदब्दवयःपूरणप्रागभावकालावच्छिन्नो यः पुत्रभार्यावियोग स्तद्विशिष्टस्येत्यर्थः।

नवद्वीपमते पुत्रभार्येत्यत्र पुत्र इति कार्तिकेयसम्बोधनं स्त्रिया वियुज्यते कश्चिदित्येकवाक्यत्वात्तेन स्त्रीमात्रवियोग एवात्मविवाहार्थमपकर्ष इति। गुरुमते तु उभयाभाव एवेति ध्येयम्। कश्चित्तु अष्टचत्वारिंशदब्दं वयो यावत् पूर्यते पुत्रभार्याविहीनस्य यज्ञेऽधिकारिता नास्तीति नेत्यर्थमाचष्टे। अपरस्तु तादृशं वयो यावन्न पूर्यते पुत्रभार्याविहीनस्य तावत् किमधिकारिता नास्तीत्यर्थमाह अत्र नञः शिरश्चालनार्थकता, दुःशासनस्य रुधिरं न पिवाम्युरस्त इतिवत्।

'एवेञ्चे'ति अष्टचत्वारिंशदब्दमध्ये पुत्रभार्योपरमे निन्दाश्रवणे सतीत्यर्थः। 'प्रौढकन्याया' इति अतीतदशवर्षाया इत्यर्थः। 'दोषदृष्टेऽ'ति अत ऊर्ध्वं रजःस्वलेति वचनबोधितरजोयोगादिसम्भावनया। एतेन यत्र निन्दाश्रुतिस्तत्र कन्याविवाहार्थमपकर्षो विधेयः। नवद्वीपास्तु दोषदृष्टेरत्यनेन कन्याविवाहस्यावश्यकत्वं प्रतिपादितं ततश्चावश्यकवृद्ध्यर्थमेवापकर्षो युज्यते न त्वनावश्यकइष्टापूर्तादाविति स्मार्तलिखनस्वरसात् कन्याविवाहार्थं गर्भाष्टमादावप्यकर्षः कर्तव्य इति वदन्ति। 'स्नातकव्रतं' गार्हस्थ्योचितं कर्म पञ्चमहायज्ञादि। 'तदधिकारी' सन्न्यासाधिकारी 'न विन्दति' न प्राप्नोति। ४७॥

'अन्यत्रेति। सन्न्यासानधिकारीणि। वशिष्ठोऽपीत्यपिना अलाभे चैव कन्याया इत्यादि पैठिनसिवचनपरिग्रहः। गुरुणा आचार्येण, स्नात्वा समावर्तनस्नानं विधाय। अवरवयस्कां न्यूनवयस्कां सदृशीं कुलजात्याद्यनुरूपाम्, वैधविषयकत्वादिति न सगोत्रामित्यादौ नञ्पदस्य अतःपरं समावृत्य कुर्याद्दारपरिग्रहमित्यादिसामान्यशास्त्रोपजीवित्वेन पर्युदासार्थकत्वस्यावश्यकत्वात् तद्घटितवाक्येन समानप्रवरादीतरकन्यामुद्वहेदिति विधेः पर्यवसानम्। वैधेत्यनेन केवलरागप्राप्तविषयके अष्टम्यां मांसं नाश्नीयादित्यादौ अनुवादादिदोषतो द्वयकालान्यतरपर्युदासो नेति प्रतिपादितम्। विषयकत्वादिति नञः सविषयकत्वं याचितमण्डनन्यायेनाविरुद्धम्। अथैवं पर्युदासे सगोत्रादिकन्याविवाहनिन्दा प्रायश्चित्तञ्च न सङ्गच्छते, तत्र हि नवा फलं नवा प्रत्यवाय इति सिद्धान्तादित्याह प्रसज्यप्रतिषेधपरतेति। 'रागप्राप्ते'ति, नच कष्टं कर्मेतिन्यायेन विवाहस्य वैधत्वेन च सगोत्रादिविषयकत्वानुपपत्त्या विवाहविषयकरागानुदयेन च कथं रागप्राप्तत्वमिति वाच्यं तादृशनिन्दाप्रायश्चित्तोपपत्त्यर्थं सगोत्रादिविवाहबोधकपदानां विवाहेतिकर्तव्यताकरागप्राप्तकर्मणि लक्षणेत्यतो नासङ्गतिः। 'ऋत्वभिगमनवदि'ति। तथाचानन्यगत्यैव वाक्यभेदोऽपि स्वीकार्य इति भावः। अतएव नञः पर्युदासपरत्वादेव। भार्याशब्द इत्यादि अलौकिकं यदङ्गं तत्तन्मन्त्रकरणकतत्तत्क्रियादिरूपं वैदिकमङ्गं तत् सङ्गेन तत्समवधानेनालौकिको यः संस्कारस्तद्विशिष्टास्त्रीवचन

इति। अत्र दृष्टान्तमाह 'यूपे'त्यादि। यथा काष्ठमात्रस्य न यूपत्वमपि तु तत्क्षणतत्तन्मन्त्रपाठादिरूप-वैदिकाङ्गजन्यसंस्कारविशेषविशिष्टस्यैव, एवं तत्तन्मन्त्रपाठादिपूर्वकाधानादिविशिष्टस्यैवाहवनीयत्वं तथेहापीति दृष्टान्तदार्ष्टान्तिकयोरर्थः।

'अदृष्टार्थनिषिद्धास्वि'ति। निषिध्यमानक्रियानुष्ठानजन्यदुरदृष्टज्ञापकनिषेधबोधकवाक्यबोध्यास्वित्यर्थः। परित्यागप्रायश्चित्तश्रुतेरित्यनेन निषिध्यमानक्रियायां दुरदृष्टजनकत्वं ज्ञाप्यते। 'परिवेदनदोषानिष्पत्ति'रिति विवाहसिद्धावेव परिवेदनदोषोत्पत्तेरिति भावः। धर्मकर्मानुपयोगश्चेति, "सपत्नीको धर्ममाचरे" दित्यादिना पत्न्या एव धर्मकर्मोपयोगस्य बोधितत्वात्। अथ कपिलकेशादीनामपि विवाहनिषिद्धत्वेन सगोत्रादिष्विव भार्यात्वं तासु नोत्पद्यतामित्यत आह— "नोद्वहेदित्यादि"। कपिलां कपिलकेशाम्, अधिकाङ्गीं षडङ्गुल्यादिकां, रोगिनीं नियतव्याधियुक्ताम्, अलोमिकां लोमशून्याम्, अतिलोमां प्रभूतलोमयुक्तां, वाचाटां बहुपरुषभाषिनीं, वाचालामिति पाठेऽपि तथैवार्थः। पिङ्गलां पिङ्गलाक्षीं, ऋक्षं नक्षत्रं तन्नामिकां मघाद्राप्रभृतिनामिकाम्, एवं तरुनदीम्लेच्छपर्वतपक्षिसर्पदासभयानकनामिकाम्। एताः कन्या नोद्वहेदित्यर्थः। "गङ्गा च यमुना चैव गोमती च सरस्वती। नदीष्वासां नाम वृक्षे मालती तुलसी तथा। रेवती चाश्विनी भेषु रोहिनी शुभदा भवेत्॥" इत्यादिमत्स्यसूक्तधृतवचनैर्निर्विशेषो ज्ञातव्यः। तत्रैवेति दृष्टार्थ एवेत्यर्थः। वैदिकशब्दः अपूर्वबोधकशब्दः। 'न निष्क्रये'ति निष्क्रयविसर्गाभ्यां स्त्री भर्तुर्भार्यात्वात् नापैति। एवञ्च क्रयादिना परस्त्रियमात्मसात् कृत्वा तदुत्पादितापत्यं क्षेत्रिण एव भवति न बीजिनः। कुल्लूकभट्टोऽप्येवम्॥ ४८॥

यथा "पदे जुहोती"त्यादौ श्रुतौ कस्य पदिनः पदे जुहोतीत्याकाङ्क्षायां "अरुणया एकहायन्या पिङ्गाक्ष्या गवा सोमं क्रीणाति" इत्यनया श्रुत्या गोरुपस्थितत्वात् तत्पदस्यैव प्रतीतिस्तथाऽत्रापि कस्य दासीत्वमाप्नुयादित्याकाङ्क्षायां यस्य दासेनोढा तस्य दासीत्वमिति। ननु वृहस्पतिवचनेन क्षेत्रबीजिसंसर्गजमपत्यं क्षेत्रबीजिस्वामिनोर्द्वयोरेवेति यद्व्यवस्थापितं तन्मनुविरुद्धमित्याह 'यस्त्विति। समाधत्ते तद्दासीपदं परोढापरमिति, तथाच वृहस्पतिवचने दासीपदं निजोढापरमतो न कश्चिद् विरोधः। ओघवाताहृतमिति यद्बीजं ओघः जलवेगः वातो वायुः, ताभ्यामन्यदीयक्षेत्रादानीतं यस्य क्षेत्रे जायते तत्क्षेत्रस्वामिन एव तद्बीजं भवति न तु येन बीजमुप्तं स तत्फलं लभते। 'एष धर्म' इति, धर्मोऽत्र व्यवस्था। तथाच एषैव व्यवस्था गवाश्वादीनां सन्तति प्रति विज्ञेया। यत्क्षेत्रस्वाम्येव गवाश्वादिसन्ततिस्वामी न तु वृषभादिस्वामीति तात्पर्यम्। 'हीनवर्णोपभुक्ते'ति तथाच "चतस्रस्तु परित्यज्याः शिष्यगा गुरुगा तथा। पतिघ्नी च विशेषेण जुङ्गितोपगता च या॥" इत्यनेन हीनवर्णत्वं ज्ञेयम्। इत्यलं पल्लवितेन। ४९॥

ढाकाप्रदेशविख्यातवासाइलनिवासिना।
कृष्णचरणविप्रेण कृतेयं तत्त्वबोधिनी॥

शाके वस्वग्निनागेन्दु-प्रमिते गुरुवासरे।
बुधाद्यगेहगे सूरे समाप्तिं सप्तमे गता॥

भ्रमात् प्रमादाद्यदिवाऽप्यथाश्रये जातं यदस्मिन् ननु दूषणक्षतम्।
प्रक्षाल्य तत् दोषविदो दयाम्बुभिर्वचोऽमृतं तत्र नियुज्यतां परम्॥

---

# उद्वाहतत्त्वम्

Commentary by

Pandit Sri Bhupendranath Bhattacharyya, Smrititirtha

## I

नत्वा शान्तं भजनफलदं चिद्घनं ज्ञानरूपं
गौरीकान्तं सुरगणपतिं सृष्टिसंहारहेतुम्।
पुर्वाचार्य्यैर्न च कथित उद्वाहतत्त्वे यदर्थः
श्रीभूपेन्द्रो गुरुवचनतो वक्तुकामस्तदर्थम्॥

सम्भावितविघ्नविघातार्थमाशीर्नमस्क्रिया-वस्तुनिर्देशो वापि तन्मुखमिति शिष्टाचारप्राप्तदेवता-नमस्काररूपमङ्गलमाचरन् शिष्यप्रवृत्तयर्थमभिधेयप्रयोजनसम्बन्धांश्च प्रदर्शयन् ग्रन्थकारः प्रथमत एव उद्दिशति प्रणम्येति।

तथाच ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥ इति।

अत्र च अर्थश्च अर्थश्च अर्थौ इत्येकशेषेण एकस्य अर्थशब्दस्याभिधेयपरत्वमन्यस्य प्रयोजनपरत्वमर्थः। परार्धे च तेन अभिधेयेन सह इत्यर्थः करणीयः। अन्यथा अभिधेयाकथनरुपन्यूनता स्यात्।

अत्र अभिधेय उद्वाहः प्रयोजनमुद्वाहनिर्णयः। सम्बन्धश्च ग्रन्थेन सह ज्ञाप्यज्ञापकभावः निर्णयेन च सह जन्यजनकभाव इति।

जगत्प्रभुमित्यनेन भगवतो जगदुत्पत्तिकारणतया ग्रन्थस्य च जगदन्तर्गतत्वेन तत्कारणत्वमपि तस्येति सूचितम्।

अत्र पुनः सृष्टिं प्रति प्रकृतिपुरुषभावेन जगत्प्रभोरपि विवाहं भङ्ग्या प्रतिपादयन्नाह—कमलाकान्तमिति। सपत्नीद्वेषनिवृत्त्यर्थं वाग्रूपस्य ग्रन्थस्य परिसमाप्त्यर्थञ्च वागीशत्वेन प्रणामोऽपि सङ्गच्छेत। वक्ति निरुपयति। निरूपणञ्च लक्षणादिप्रकारेण वचनम्। तच्च अत्राप्यस्ति इति। अन्यत् सर्वं पूर्वटीकाकृद्व्याख्यानेनैव सुव्यक्तम्।

## II

भार्यात्वसम्पादकग्रहणं विवाह इति मूलम् (पृः १, पं ८)

वैवाहिकव्यापारनिचयेषु पित्रादिकृतसेतिकर्तव्यताकदानप्रयोज्यग्रहणस्यैव प्राधान्यम्। अत एव प्राधान्येन व्यपदेशा भवन्तीति न्यायात् तस्यैव वरकर्तृकग्रहणस्य स्मार्तभट्टाचार्येण विवाहसंज्ञा कृता। तदर्थमेव शिष्टसमाजेषु सर्वदेशेषु वैवाहिकलग्ननिरूपणे कन्यादानग्रहणलग्नस्यैव प्रधानतया वैवाहिकलग्नत्वेन ग्रहणं परिदृश्यते। अत एव 'प्रत्तानां भर्तृसापिण्ड्य'मिति 'दत्ता नारी पितुर्गेहे सूयते म्रियतेऽथवा' इति 'प्रदानं स्वाम्यकारणम्' इति 'दत्तानां भर्तुरेव हि' इति सर्वत्र मुनि-वचनेषु ऊढायाः परिचायकत्वेन दत्तेति पदं प्रयुक्तम्, दाने च स्वीकारप्रागभावस्य सहकारित्वेन स्वीकाराऽनिष्पत्तौ दानक्रियायाः असिद्धत्वेन यत्र यत्र दानं निष्पद्यते तत्र तत्र स्वीकारस्यापि वर्तमानत्वेन प्रदत्तानामित्यादिपदेनैव स्वीकारस्यापि लाभः। अतः पित्रादिकृतदानप्रयोज्यवर-कर्तृकस्वीकारस्यैव विवाहपदार्थत्वमिति पूर्वोक्तमुनिवाक्यानां तात्पर्यमवगम्यते।

पाणिग्रहणसप्तपदीगमनादिक्रियाकलापस्य तु विवाहस्योदीच्याङ्गत्वमिति। अत एव तद्दिने वैवाहिकलग्नभिन्ने कालान्तरे तथा दिनान्तरेऽपि तेषामनुष्ठानं प्रचरति, न तत्र पुनर्वैवाहिकलग्नमनुसन्धीयते। एवञ्च सम्प्रदानानन्तरं स्वस्तीत्युक्त्वा वरस्य ममेयं भार्येत्येवं भार्यात्वेन स्वीकारादेव विवाहसिद्धिः। तथा च स्वस्तीत्युक्तेः प्राक् दुर्दैववशात् कदाचित् कस्यचित् वोढुर्मरणे सा हि कन्या पश्चादन्यस्मै वराय देयेति। कन्यायां वोढुः स्वीकाराभावेन दातुः स्वत्वानिवृत्तेरिति भाव्यम्। स्वीकारात् परं सप्तपदीगमनादेः प्राक् वोढुर्मरणे तु प्रधानस्य निर्वाहात् तस्याः न पुनरन्यस्मै दानम्। अत्रैव सकृदंशो निपततीति मनुवचनं जागर्ति। यत्तु 'कन्यायाः सकृद्दानन्तु पाणिग्रहणसंस्कारयुक्ताविषय'मिति स्थानान्तरे स्मार्तपादेनोक्तं तत् तर्कालङ्कारपादव्याख्यानेनैव तत्र समाहितमित्यतो नेह पुनर्वितन्यते।

## III

त्रीन् मातृत पञ्च पितृतः इति पैठीनसिवचनैकवाक्यत्वादिति मूलम्। (पृः ५, पं १०)

स्मार्तभट्टाचार्यस्यानभिमतत्वेऽपि पैठीनसिवचनमेतत्दृष्ट्वा पैठीनसिमतमिति कृत्वा मातृतः त्रीन् पितृतः पञ्च परिहृत्य सप्तमी पञ्चमी मध्येऽपि केषाञ्चित् विवाहः प्रचरति। वीरमित्रोदये तु इतोऽपि विशेषो दृश्यते, यथा—चतुर्विंशतिमतमिति कृत्वा

दशभिः पुरुषैः ख्याताच्छोत्रियाणां महाकुलात्।
उद्वहेत् सप्तमादूर्ध्वं तदभावे तु सप्तमीम्॥
पञ्चमीं तदभावे तु पितृपक्षे त्वयं विधिः।
सप्तमीं च तथा षष्ठीं पञ्चमीञ्च तथैव च॥
एवमुद्वाहयेत् कन्यां न दोषः शाकटायनः।
तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि॥
विवाहाय मनुः प्राह पाराशर्योऽङ्गिरा यमः। इति—

एतत्तु न स्मार्तभट्टाचार्याद्यनुमतम्॥

## IV

तर्हि शूद्रस्य श्राद्धाद्यधिकारश्रुतेः कथं गोत्रोच्चारणमिति मूलम्। (पृः ७, पं १८)

अत्र निर्णयसिन्धौ विशेषः (तृतीयपरिच्छेद २८३ पृः)। शूद्राणां गोत्राभावेऽपि काश्यपगोत्रं ज्ञेयम्। तस्मादाहुः सर्वाः प्रजाः काश्यप इति श्रुतेः, गोत्रनाशे तु काश्यप इति व्याघ्रपादोक्तेश्चेति हेमाद्रिः। एवमन्यत्र गोत्राज्ञाने तर्पणादिषु ज्ञेयम्।

गोत्रस्य त्वपरिज्ञाने काश्यपं गोत्रमुच्यते। यदाह श्रुतिः सर्वाः प्रजाः काश्यपसम्भवा इति च दृश्यते।

## V

न त्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वेति मूलम्। (पृः १०, नं १२)

अत्रेदमालोच्यते—सर्वत्र सामान्यशास्त्रप्राप्तनिषेधस्थले निमित्तविरोधादेव नैमित्तिकमुख्यार्थनिषेधबोधाऽनुपपत्तेरगत्यैव नञः पर्युदासलक्षणा युक्तेति सिद्धान्तः। अत्रापि दत्रिमपुत्रत्वेन पुत्रसामान्यदानस्य माता पिता वा दद्यातां यमद्भिः पुत्रमापदीति अर्थवादानुमितसामान्यविधिबोधिततया, तथा प्रतिग्रहस्यापि अपुत्रेण सुतः कार्यो यादृक् तादृक् प्रयत्नत इति सामान्यत एव विधेयतया तदुपजीव्यबाधभिया

न त्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वेत्येकपुत्रदानप्रतिग्रहयोर्न निषेधपरत्वं सङ्गच्छते। अतो निमित्तविरोधात् पर्युदासलक्षणैव सङ्गता। एवञ्च पर्युदासविधेर्दानप्रतिग्रहविध्योश्चैकवाक्यतया एकपुत्रकर्तृकदानतत्-पुत्रप्रतिग्रहेतरत्र एव दानप्रतिग्रहयोर्विधिबोधितत्वं पर्यवस्यति। ततश्च पुत्रदानप्रतिग्रहविध्योरेक-पुत्रेतरविषयतया तत्र विधेरौदासीन्यात् पुत्रदानप्रतिग्रहजन्यमदृष्टन्तथा दृष्टसाध्यं दत्रिमपुत्रत्वमप्यर्थतो बहुपुत्रकर्तृकदाने एवमपुत्रकर्तृकप्रतिगृह एव विषयीकरोति। तथा चैकपुत्रप्रतिग्रहस्थले विधेरविषयतया गृहीतस्य तस्य न ग्रहीतुः पुत्रत्वसिद्धिर्न श्राद्धाधिकारो न वा धनाधिकार इति। अत एवोक्तं स्मार्तेन "विधेरौदासीन्यात् न फलं न वा प्रत्यवाय इति सिद्धान्त" इति।

तथा स हि सन्तानाय पूर्वेषामित्यत्रैवकारार्थकहिशब्देन चैकपुत्रस्य जनकमात्रस्यैव पुत्रतया बोधनात् रागतस्तद्दाने दोषश्रुतेः प्रसज्यप्रतिषेधकल्पनमपि सङ्गच्छते। एवञ्च निषेधमतिक्रम्य तद्दाने प्रायश्चित्तभागिता च भवेदिति। ततश्च प्रामाणिकत्वान्नञः पर्युदासप्रसज्यप्रतिषेधपरत्वेन वाक्यभेदकल्पनमपि न दोषाय। एतच्च स्मार्तेन नवान्नश्राद्धे स्पष्टमभिहितम्—'रोगीति निन्दाश्रवणात् प्रसज्यता नोपतिष्ठत इति श्रवणात् पर्युदासतेति। इति हि बहूनां स्वरसः।

अपरे तु स हि सन्तानाय पूर्वेषामित्यत्र हेतुवन्निगदश्रुतेर्बहुपुत्रकर्तृकपुत्रदानं प्रशस्तमेकपुत्रकर्तृक-पुत्रदानमप्रशस्तमिति वर्णयन्ति। तेषां मते दोषश्रुतेः रागप्राप्तविषयतया अत्र नञः केवलं प्रसज्यप्रतिषेधपरत्वम्। तेन एकपुत्रस्य दाने ग्रहणे च दत्तकत्वसिद्धिर्भवेत् किन्तु दातुर्ग्रहीतुश्च प्रत्यवायमात्रमिति।

एव मौरसपुत्राभावे दत्तकपुत्रग्रहणव दौरसपुत्रऽभावे दत्तकपुत्रीग्रहणेऽपि शान्ताप्रभृतिविषयक पौराणिचलिङ्गदर्शनात् "औरस-पुत्रीवद्दत्तपुत्र्यपि पुत्रप्रतिनिधिर्भवतीति गम्यते" इति दत्तक-मीमांसाकारोक्तिदर्शनाच्च आधुनिकाः केचन सङ्कटकाले पितृसगोत्राया ब्रह्मणकन्याया अपि दानद्वारा गोत्रान्तरी-करणेन कथञ्चित् विवाह्यत्वमाहुः।

वस्तुतस्तु दत्तकपुत्रवत् कन्याया अपि दत्तकात्वस्य प्रमाणसिद्धत्वस्वीकारेपि यथाकालं यथाविध्यनुष्ठानं विना केवल सङ्कटत्राणाय ऋतुमत्या अपि कन्याया यदाकदाचित् यथेच्छ-दानेन दत्त-कन्यात्वसिद्धिर्न सम्भवति। सुतरां तत्र जनकगोत्रनिवृत्यभावात् न तादृशकन्याया विवाहसिद्धिरिति विवेचनीयम्।

## VI

एवञ्च पितुर्मातुश्च मातामहकन्यान्तरसत्त्वे तस्याः कन्यायाः परत इति मूलम्। (पृः १२, पं १५)

कन्यान्तरसत्त्वे पुत्ररहितकन्यान्तरसत्त्वे। पितुर्मातुश्च बन्धोरसत्त्वेऽपि तद्योग्यतामवलम्ब्य तदपेक्षया ऊर्ध्वतनसप्तानां पञ्चानां वा प्रत्येकापेक्षया सप्तमीपञ्चमीवर्जनविधानात् बन्धुमातुरपि तदपेक्षया ऊर्ध्वतनसप्तमपञ्चमान्यतमद्वितीयस्थानवर्तित्वान्मात्रपेक्षया सप्तमीपञ्चमीकन्या वर्जनीया। बन्धोरसत्त्वे तत्स्थाने एव योग्यता न तु तन्मातुरिति।

## VII

सन्निकर्षेऽपि कर्तव्या त्रिगोत्रात् परतो यदि इति मूलम्। (पृः १३, पं १)

अत्र गोत्रपदेन गोत्रभागित्वेन लक्षितायाः कन्याया उपस्थापनादेकगोत्रस्य वारद्वयपातेऽपि कन्यात्रयेणान्तरितायाः पञ्चमीकन्याया विवाह्यत्वमिति केचिद् वदन्ति।

**एष संक्षेप** इति। तदयं व्यवस्थानिष्कर्षः। पितृपितामहप्रपितामहवृद्धप्रपितामहातिवृद्धप्रपितामहात्यतिवृद्धप्रपितामहात्यत्यतिवृद्धप्रपितामहानां सप्तानां प्रत्येकेनाधस्तनसप्तमीपर्यन्ताऽत्रिगोत्रान्तरिता नोद्वाह्या। एवं पितुर्मातामहप्रमातामहवृद्धप्रमातामहातिवृद्धप्रमातामहात्यतिवृद्धप्रमातामहानां पञ्चानां प्रत्येकेनाधस्तनसप्तमीपर्यन्ताऽत्रिगोत्रान्तरिता नोद्वाह्या। तथा पितामहभगिन्यास्तत्पुत्रस्य चाधस्तनसप्तमीपर्यन्ताऽत्रिगोत्रान्तरिता नोद्वाह्या। पितामहीभगिन्यास्तत्पुत्रस्य चाधस्तनसप्तमीपर्यन्ताऽत्रिगोत्रान्तरिता नोद्वाह्या। एवं पितामहीभ्रातुस्तत्पुत्रस्य चाधस्तनसप्तमीपर्यन्ताऽत्रिगोत्रान्तरिता नोद्वाह्या। अत्र यमादिं कृत्वाऽधस्तने सप्तमीगणना तद्गोत्रमादायैव त्रिगोत्रगणनमपि बोध्यम्। अस्मिन् पक्षे शुलपाणिमते आसुरादिविवाहचतुष्टये क्षत्रियवैश्यशूद्रविवाहे च पञ्चमीपर्यन्तविवाहे दोषः। षष्ठ्याः सप्तम्याश्च कन्याया विवाहे दोषाभावः। एवं सगोत्रा समानप्रवरा च ब्राह्मणक्षत्रियवैश्यानां नोद्वाह्या, शुद्रस्य तु अत्र दोषाभावः।

सपिण्डसमानोदकता तु शूद्रेऽप्यविशिष्ठा। कस्मिंश्चिद्देशविशेषे काश्यपादिगोत्रे ब्राह्मणादिवर्णानामपि सगोत्रा-विवाहः प्रचलति। पठन्ति च कौश्यपोऽत्रिर्भरद्वाजो वात्स्यः शाण्डिल्य एवच। अमीषां पञ्चगोत्राणां गोत्रदोषो न विद्यते॥ इति।

वदन्ति च—"ऋते भृग्वङ्गिरोगणा"दितिकालसारधृतं गदाधरवाक्यमपि प्रमाणमिति।

स्मार्तपादनानान्तु एतत् सर्वथा अनभिप्रेतमिति।

एवं मातामहप्रमातामहवृद्धप्रमातामहातिवृद्धप्रमातामहात्यतिवृद्धप्रमातामहानां पञ्चानां प्रत्येकेनाधस्तनपञ्चमीपर्यन्ताऽत्रिगोत्रान्तरिता नोद्वाह्या। तथा मातामहभगिन्यास्तत्पुत्रस्य चाधस्तनपञ्चमीपर्यन्ताऽत्रिगोत्रान्तरिता नोद्वाह्या। मातामहीभगिन्यास्ततपुत्रस्य चाधस्तनपञ्चमीपर्यन्ताऽत्रिगोत्रान्तरिता नोद्वाह्या। मातामहीभ्रातुस्ततपुत्रस्य चाधस्तनपञ्चमीपर्यन्ताऽत्रिगोत्रान्तरिता नोद्वाह्या। अत्रापि यमादिं कृत्वाऽधस्तनपञ्चमीगणना तद्गोत्रमादायैव त्रिगोत्रगणनमिति बोध्यम्। अस्मिन् पक्षेऽपि शूलपाणिमते आसुरादिविवाहचतुष्टये क्षत्रियवैश्यशूद्रविवाहे च तृतीयापर्यन्तविवाहे दोषः, चतुर्थ्याः पञ्चम्याश्च विवाहे दोषाभाव इति।

एवं मातामहसमानोदका च ब्राह्मणादिवर्णचतुष्टयेनैव नोद्वाह्या। समानोदकभावस्तु जन्मनाम्नोरविज्ञाने। यथा मातामहस्य पूर्वपुरुषादमुकव्यक्तेः प्रवृत्ते वंशे इयं कन्या जातेति जन्मनाम्नोर्यथायथज्ञानसत्त्वे समानोदकता, तदसत्त्वे तु समानोदकतानिवृत्तिः। तथा च तादृशजन्मनाम्नोर्ज्ञानसत्त्वे मातामहसगोत्रायाः कन्यायाः समानोदकत्वादविवाह्यत्वम्। तद्भिन्ना तु मातामहसमानगोत्राऽपि विवाह्या। एवं विमातुलदुहिता दौहित्री च नोद्वाह्या। मातृनाम्नीकन्याऽविवाह्या। पितृनामा पितृव्यनामा च वरोऽपि न ग्राह्यः।

## VIII

अतिदिष्टत्वेन मुख्यमातुलतो जघन्यता युक्तेति मूलम्। (पृः १५, पं १)

ननु कथमस्य शास्त्रस्यातिदिष्टत्वम्, विधित्वस्वीकारे का हानिः, सत्यं मातृशब्दस्य जनन्यां शक्तत्वात् सर्वासां पितृपत्नीनामेकस्य जननकर्त्रीत्वासम्भवाद् विधित्वासम्भव इत्यतोऽतिदेश एव। तेनायमर्थः मातरो मातृतुल्या इति। तद्भ्रातरो मातुला इति कथमुक्तम्, तासां मातृत्वेन तद्भ्रातुर्मातुलत्वं स्फुटमेव, सत्यं स्वभगिनीसपत्नीकन्यायाः स्वकर्तृकविवाहनिषेधार्थं तदुपादानमिति गुरवः।

## IX

परिदायी दाता......याजकस्ते सर्वे पतिता इति मूलम्। (पृः १५, पं २५)

एतेन ज्येष्ठविवाहप्रागभावसमकालीनकनिष्ठपरिणयनमेव पातित्यजनकम्। यत्र तु ज्येष्ठोऽकृतविवाह एव तिष्ठेत् (जीवनं वा पातयेत्), तत्र कृतविवाहस्यापि कनिष्ठस्य न पातित्यं न वा दात्रादेरिति प्रतिभाति। एवमेव शूलपाणिमहामहोपाध्यायाः।

## X

एकोदरप्रसूतानामेकस्मिन्नपि वासरे इति मूलम्। (पृः १६, पं २)

एकस्मिन्नपि वासरे इत्यपि देशभेदव्यवस्थितम्। अन्यथा लक्षणशत्रुघ्नयोरेकदिने विवाहे दोषः स्यात्, तथा दक्षस्य एकदिने कन्यानां दानमपि न सङ्गच्छते। अत्र अधिकमपि दीपिकाटीकादौ दृश्यते यथा—

पुत्रीपरिणयादूर्ध्वं यावद्दिनचतुष्टयम्।
पुत्रप्रन्तरायाः कुर्वीत नोद्वाहमिति सूरयः॥

तथा

पुत्रोपनयनादूर्ध्वं षण्मासाभ्यन्तरे पिता।
पुत्रुद्वाहं न कुर्वीत विवाहे व्रतबन्धनम्॥

पुत्रीविवाहषण्मासाभ्यन्तरे पुत्रस्योपनयनञ्च न कर्तव्यमित्यर्थः। देशान्तरभेदेन कल्पभेदेन वा कस्यापि नानुपपत्तिः। वङ्गदेशे तु नेयं व्यवस्था प्रचलति। मत्स्यसूक्तवचने सोदराणामित्यनेनैव सोदरकन्यानामेकदिने विवाहनिषेधप्राप्तौ यत् पुनः कन्यादानद्वयमितुप्रक्तं तद्वैमात्रेयकन्याद्वयस्यापि एकदिने विवाहनिषेधार्थमिति। एवमत्र कन्यापदमनूढामात्रपरं न तु केवलस्वसुतापरं, कन्यापदस्यानूढायामेव शक्तत्वात्। अत एव दायभागटीकायां श्रीकृष्णतर्कालङ्कारेणोक्तमनूढात्वेनैव कन्यापदस्य सपत्नीकन्याबोधकतया अमुख्यत्वाप्रसक्तेः, तद्रूपेणैव कन्यापदस्य शक्तेरिति। तेन परकीयस्यापि कन्याद्वयस्य दानमेकेन कर्त्रा नैव कार्यम्। सोदरपदञ्च एकोदरजन्यमात्रपरं, तेन च भ्रातृभगिन्योरपि एकदिने विवाहो निषिद्ध इति बहूनां स्वरसः।

एतद्विषये वीरमित्रोदयधृतं गर्गादिवचनं यथा—

भ्रातृयुगे स्वसृयुगे भ्रातृस्वसृयुगे तथा।
न जातु मङ्गलं कुर्यादेकस्मिन्मण्डपेऽहनि॥ इति।

युग्ममौद्वाहिकं वर्ज्यमिति—युग्मपदमविवक्षितमन्यथा त्रयाणां चतुर्णां वा सहोदराणामेकस्मिन् दिने विवाहः प्रसज्येत। इष्टापत्तौ विषमशिष्टापत्तिः शिष्टव्यवहारविरोधश्चेति। अत्र वीरमित्रोदये विवाहसंस्कारप्रकरणे (७२७ पृ) विशेषो दृश्यते यथा

सहोदराणां विवाहे प्रथमतः सम्वत्सरं परित्यज्येत्। तथा च स्मृतिरत्नावल्यां—

एकोदरप्रसूतानामेकस्मिन् वत्सरे पुनः।
विवाहं नैव कुर्वीत मण्डनोपरि मुण्डनम्॥

संवत्सरपरिहाराशक्तौ षण्मासपरित्यागः कर्तव्यः। तथा च वराहः—

विवाहस्त्वेकजातानां षण्मासाभ्यन्तरे यदि।
असंशयं त्रिभिर्वर्षैस्तत्रैका विधवा भवेत्॥

अत्रापि प्रतिप्रसवस्तत्रैव—

ऋतुत्रयस्य मध्ये चेदन्याब्दस्य प्रवेशनम्।
तदा हेत्रकोदरस्यापि विवाहस्तु प्रशस्यते॥

षण्मासस्यापि परिहाराशक्तौ दिनचतुष्टयत्यागो विधेयः। तथा च गर्गः—

पुत्रीपरिणयादूर्ध्वं यावद्दिनचतुष्टयम्।
पुत्रान्तरस्य कुर्वीत नोद्वाहमिति सूरयः॥

दिनचतुष्टयस्यापि परिहाराशक्तौ एकदिनपरिहारः कर्तव्यः। तथा च गर्गः—

भ्रातृयुगे स्वसृयुगे भ्रातृस्वसृयुगे तथा।
न जातु मङ्गलं कुर्यादेकस्मिन् मण्डपेऽह्नि॥

दिनमात्रस्यापि परिहाराशक्तौ लग्नमात्रं परिहरेत्। तथा च प्रयोगपारिजाते स्मृत्यन्तरं—

विवाहस्त्वेकजन्यानामेकस्मिन्नुदये कुले।
नाशं करोत्येकवर्षे स्याद्वैका विधवा भवेत्॥

अस्यार्थश्च मित्रमिश्रेणैव कृतः—

एकजन्यानामेकस्मिन्नुदये लग्ने विवाह एकवर्षमध्ये कुले नाशं करोति, तयोर्वा मध्ये एका विधवा भवतीति। तथा च एकलग्नं परित्यज्य भिन्नलग्ने द्वयोर्विवाहे न तद्दोष इति। अत्र लग्नस्यापि त्यागाशक्तौ मण्डपमात्रं परिहरेत्। तथाच स्मृतिरत्नावल्याम्—

भ्रातृयुगे स्वसृयुगे भ्रातृस्वसृयुगे तथा।
एकस्मिन् मण्डपे चैव न कुर्यान्मङ्गलद्वयम्॥ इति।

## XI

**ब्रह्महत्या पितुस्तस्य इत्यादिमूलम्। (पृः १६, पं २६)**

अनूढायाः कन्याया रजोदर्शने वहुदोषश्रुतेस्तादृशकन्याविवाहस्याप्रशस्तत्वं सर्वथा निर्विवादम्। तत्र यथाविहितप्रायश्चित्तादिकं कृत्वा कन्यादाने त्वदोष इति। एतत्प्रतीकारविषये उद्वाह-चन्द्रालोकधृताश्वलायनवचनानि यथा (६० पृः)—

कन्यामृतुमतीं शुद्धां कृत्वा निष्कृतिमात्मनः।
शुद्धिञ्च कारयित्वा तामुद्वहेदानृशंस्यधीः॥
पिता ऋतून् स्वपुत्र्यास्तु गणयेदादितः सुधीः।
दानावधिगृहे यत्नात् पालयेच्च रजोवतीम्॥
दद्यात्तदृतुसंख्याः गाः शक्तः कन्यापिता यदि।
दातव्यैकापि निःस्वेन दाने तस्या यथाविधि॥
दद्याद्वा ब्राह्मणेस्वन्नमतिनिःस्वः सदक्षिणम्।
तस्यातीतर्तुसंख्येषु वराय प्रतिपादयेत्॥
उपोष्य त्रिदिनं कन्या रात्रौ पीत्वा गवां पयः।
अदृष्टरजसे दद्यात् कन्यायै रत्नभूषणम्।
तामुद्वहन् वरश्चापि कुष्माण्डैर्जुहुयाद्घृतम्॥

एवञ्च ऋतुमतीकन्याविवाहनिन्दावचनानि अकृतप्रतीकारविषयानि पर्यवस्यन्ति—इति उद्वाहचन्द्रालोके। मातृरजोयोगेऽपि पुत्रकन्याविवाहादिशुभकर्मनिन्दावचनानि उद्वाहचन्द्रालोके दृश्यन्ते, यथा—

वृद्धमनुः—

विवाहव्रतचूडासु माता यदि रजस्वला।
तदा न मङ्गलं कार्यं शुद्धौ कार्यं शुभेप्सुभिः।

माधवीये—

प्रारम्भात् प्राक् विवाहस्य माता यदि रजस्वला।
निवृत्तिस्तस्य कर्तव्या सहत्वश्रुतिचोदनात्॥ इति।
अलाभे सुमुहूर्तस्य रजोदोषे तु सङ्गते।
श्रियं संपुज्य तत् कुर्यात् पाणिग्रहणमङ्गलम्॥ इति।

## XII

### आषाढे धनधन्येति मूलम् (पृः २१, पं ८)

आषाढे धनधान्यभोगरहितेत्यादिवचनादाषाढ़ादिकार्तिकान्तमासेषु विवाहे दोषाः श्रूयन्ते। एवं दशमासाः प्रशस्यन्ते चैत्रपौषविवर्जिता इत्यनेनाषाढ़ादिपञ्चसु मासेषु पुनर्विवाहो विधीयते। एवञ्चाषाढ़ादिपञ्चानां मासानां विहितनिषिद्धत्वमायातम्। एकत्र विधाननिषेधशास्त्रयोः प्रवृत्तौ उभयोः प्रामाण्यरक्षणाय विषयभेदः स्वीकर्तव्यः। स च ग्रहशुद्धिमब्दशुद्धिमित्यादिना अग्रे ग्रन्थकृद्वाक्येनैव स्फुटीभविष्यति। तथा च विषयभेदेन पर्युदस्तचैत्रपौषेतरत्र निन्दिताषाढश्रावणायोर्विवाहो यथा सर्वशिष्टाचारसम्मतस्तथा निन्दितभाद्राश्विनकार्तिकेष्वपि विशेषाभावात् विवाहे बाधाभावः। अन्यथा 'दशमासाः प्रशस्यन्ते' इति वचनस्य भाद्रादिभिन्नत्वेन निर्निमित्तकसङ्कोचापत्तिः दशमासा इति दशसंख्यानुपपत्तिश्च।

अर्थवादस्थित-तत्तत्पदानां साक्षात् कार्यान्वयित्वाभावात् पदान्तरस्य तात्पर्यग्राहकत्वमभ्युपेत्य यस्य कस्यचिदेकस्य पदस्य प्राशस्त्यपरत्वेन लाक्षणिकतया मीमांसकसिद्धान्तदर्शनात् 'वेश्या भाद्रपदे इषे च मरणं रोगान्विता कार्तिके' इत्यर्थवादस्थितवेश्यादिपदानां न तत्तत्पदार्थत्वेन बोधः किन्तु विधेयप्राशस्त्यपरत्वेन विधिवाक्यैकवाक्यतया बोधः, निन्दार्थवादस्यापि विधेयान्यनिन्दाद्वारा विधेयप्राशस्त्यपरत्वमिति मीमांसकाः। तथा च यदि निन्दिताषाढ़श्रावणयोर्विवाहः शास्त्रसिद्धो भवति तदा निन्दितभाद्राश्विनकार्त्तिकेष्वपि विवाहे न विवादावसरः। 'सिंहे धनुषि मीने च स्थिते सप्ततुरङ्गमे' इति विशेषश्रवणेऽपि निन्दितशनिरविकुजवारेषु विवाहवत् अर्वाग्दशवर्षेभ्यो मुनयः कथयन्ति कन्यकानामिति तथा 'बहुतरगुणयुक्तं योजयेन्मङ्गलेषु' इत्यादि प्रतिप्रसवाङ्गीकारेण भाद्रेऽपि विवाहे प्रवर्तन्ते शिष्टाः। अन्यथा 'चैत्रपौषविवर्जिता' इत्यनेन विरोधः प्रसज्येत। इत्यतः श्रावणमासवद् भाद्रादिमासत्रयेऽपि कुत्रचित् प्रदेशे विवाहः प्रचरति। कुत्रचित् प्रदेशे तु न पुनर्भाद्रादौ विवाहसमाचारः। दक्षिणायनत्वेन हरिशयनत्वेन निन्दार्थवादविषयत्वेन वा श्रावणभाद्रादीनां तुल्यत्वेऽपि श्रावणे यद्यनुरागस्तदा किमपराद्धं भाद्रादिभिरिति न जानीमहे।

अत्र कृत्यचिन्तामणौ विशेषो दृश्यते यथा माघे मासि भवत्यूढ़ा कन्या सौभाग्यसंयुता।

फाल्गुने च भवेत् साध्वी वैशाखे मासि पुत्रिणी॥
भवेत् जैष्ठेऽतिधनिनी प्रसन्ना कार्तिके भवेत्।
देवपुजारता नित्यं मासे स्यात् सौम्यदैवते।

सौम्यदैवते—मार्गशीर्षे। गुणदोषोभयश्रवणात् कार्तिको विहितनिषिद्धः। आषाढ़निन्दा च हरिशयनाक्रान्तभागे। 'मेषोक्षवैनिकमृगानलकुम्भसंस्थे प्रद्योतने करतलग्रहणं प्रशस्तमिति रत्नमालावचनात्। वैनिको मिथुनम्। ऊक्षा वृषः। मृगो मकरः। अनलस्तुला। प्रद्योतने सूर्ये, इत्यधिकं दीपिकाटीकायाम्।

अत्रेदमपि ज्ञातव्यम्—

जैष्ठमार्गशीर्षयोस्तु ज्येष्ठपुत्रकन्ययोर्विवाहो निषिद्धः। ज्येष्ठत्वञ्चात्र आदिगर्भजातत्वं न त्वापेक्षिकज्येष्ठत्वम्। तत्रापि जैष्ठमासे दशदिनात् परं प्रतिप्रसवो वर्तते। शिष्टव्यवहारश्च दृश्यते। तत्र मार्गशीर्षस्तु सर्वथा वर्जनीय एव न तत्र कश्चित् प्रतिप्रसवः। तत्र च प्रमाणानि यथा—

मार्गशीर्षे तथा ज्यैष्ठे क्षौरं परिणयं व्रतम्।<br>
ज्येष्ठपुत्रदुहित्रोश्च दूरतः परिवर्जयेत्॥<br>
कृत्तिकास्थरविं त्यक्त्वा ज्यैष्ठे ज्येष्ठस्य कारयेत्॥

मार्गे माघे तथा ज्यैष्ठे इत्याचारसारे।

अत्रापि उद्वाहचन्द्रालोके विशेषो यथा—

आदिगर्भजातयोः पुत्रकन्ययोरिति विशिष्टं न पृथक्। तेन ज्येष्ठपुत्रस्य ज्येष्ठपुत्र्या सह विवाहो ज्यैष्ठमासे निषिद्धः। यदा पुनः पुत्रो ज्येष्ठः पुत्री च न तथा विपर्ययो वा तदा ज्यैष्ठमासेऽपि विवाहो भवत्येव। तथा च पराशरः—

अज्येष्ठा कन्यका यत्र ज्येष्ठपुत्रो वरो यदि।<br>
व्यत्ययो वा तयोस्तत्र ज्यैष्ठमासः शुभप्रदः॥

मिहिरः

ज्येष्ठस्य ज्येष्ठकन्याया विवाहो न प्रशस्यते।<br>
तयोरन्यतरे ज्येष्ठे ज्यैष्ठमासः प्रशस्यते॥<br>
द्वौ ज्येष्ठौ मध्यमौ प्रोक्तावेकं ज्येष्ठं शुभावहम्।<br>
ज्येष्ठत्रयं न कुर्वीत विवाहे सर्वसम्मतम्॥

निर्णयसर्वस्वे—

ज्यैष्ठे न ज्येष्ठयोः कार्यं नृनार्योः पाणिपीड़नम्।<br>
तयोरेकतरे ज्येष्ठे ज्यैष्ठमासेऽपि कारयेत्॥ इति

## XIII

### स्वगोत्राद्भ्रश्यते नारीति मूलम् (पृः २७, पं १२)

सवर्णाविवाहे पाणिग्रहणस्य असवर्णाविवाहे सप्तपदीगमनस्य पितृगोत्रनाशपतिगोत्रप्राप्तौ कारणत्वमिति न वचनद्वयविरोधः॥

अत्र च पितृगोत्रनाशपतिगोत्रलाभे सप्तपदीगमनप्रागभावाभावविशिष्टविवाहत्वेनैव कारणत्वं कल्पनीयम्। अत एव स्मार्तभट्टाचार्येणोक्तं "मातुर्विवाहेन तत्पितृकुले सापिण्ड्यनिवृत्तेर्भर्तृसापिण्ड्येन सापिण्ड्यसिद्धेर्विवाहेन च तस्याः पितृगोत्रत्वनिवृत्तेरिति। एवञ्च सम्प्रदानात् परमेव

सप्तपदीगमनात् प्राक् दुर्दैववशात् कदाचित् स्त्रियाः (कन्यायाः) मरणे सप्तपदीगमनासम्भवेन अनुत्पत्स्यमानस्य प्रागभावाभावात् पितृगोत्रापहारक-पतिगोत्रापादकतादृशविशिष्टकारणस्य सत्वात् 'दत्तानां भर्तुरेव ही'त्यादिवचनबलेन भर्तृकुले एव यथायथमशौचं न पितृकुले। तथा जीवनपक्षे सप्तपदीगमनेनैव तत्प्रागभावस्य नाशात् सप्तपदीगमनप्रागभावाभावस्य सत्त्वेन पतिसापिण्ड्य-पतिसगोत्रत्वसद्भावात् नानुपपत्तिरिति।

केचित्तु इदानीं वाग्दानव्यवहाराभावात् विवाहस्यैव तत्स्थानपातित्वात् विवाहात् परं सप्तपदीगमनात् पूर्वं स्त्रिया मरणे 'वाक्प्रदाने कृते तत्र ज्ञेयञ्चोभयतस्त्र्यह' इति वचनात् पितु-र्भर्तुश्च कुले त्रिरात्राशौचमिति वदन्ति। अपि तु सम्प्रदानात् परं सप्तपदीगमनात् पूर्वं पति-सपिण्डजनने मरणे वा स्त्रियास्त्रिरात्राशौचग्रहणव्यवहारस्तु विद्यते।

यत्तु स्त्रीणामसंस्कृतानान्वित्यादिशुद्धितत्वधृतवचनव्याख्याने 'असंस्कृतानां अकृतपाणिग्रहणरूप-संस्कारणा'मिति स्मार्तेनोक्तं तत्र पाणेर्ग्रहणं यत्र विवाहे इत्यर्थकत्वेन अकृतविवाहानामित्यर्थः सिध्यतीति न विरोधः। अन्यथा स्मार्तमते पाणिग्रहणस्य संस्कारत्वाभावेन 'संस्काराणा'मित्यनु-पपत्तिरिति।

## XIV

न देवप्रतिष्ठाविवाहयोः पूर्वसम्भूतयोरिति मूलम्। (पृः २७, पं ३१)

अत्रायमुद्वाहचन्द्रालोके विशेषः परिलक्ष्यते। यथा न देवप्रतिष्ठाविवाहयोः पुर्वसम्भूतयोः पूर्वाहृतसम्भारयोः न त्वारब्धयोरशब्दत्वात्। आरम्भाभावेऽप्याहृतसम्भारयोः देवप्रतिष्ठा-विवाहयोरशौचं न भवतीत्यर्थः। लग्नाभावे इदमिति निर्णयसिन्धुरिति। तथा निर्णयसिन्धौ स्मृतिरिति कृत्वा लिखितम्—

सङ्कटे समनुप्राप्ते सूतके समुपागते।
कुष्माण्डीभिर्घृतं हुत्वा गां च दद्यात् पयस्विनीम्॥
चुड़ोपनयनोद्वाहप्रतिष्ठादिकमाचरेत्।
यदैव सूतकप्राप्तिस्तदैवाभ्युदयक्रिया॥

तदैवाभ्युदयक्रिया इति न पुनः सूतके कथमभ्युदयक्रियेत्याशङ्कितव्यमिति तात्पर्यम् इति (१०९ चन्द्रालोके)।

## XV

व्रतयज्ञविवाहेषु श्राद्धहोमार्चने जपे इति मूलम्। (पृः २८, पं १)

अत्र विवाहपदं वृद्धिश्राद्धारम्भककार्यपरं, तेन मठादिप्रतिष्ठादिकमपि वृद्धिश्राद्धानन्तरमशौचे स्वयं कार्यं किन्तु तदङ्गपूजादिकं स्वयं न कार्यं, 'दानार्चनविवर्जित'मित्यनेन तन्निषेधादिति केचित्।

अपरे तु संस्कारमात्रपरं विवाहपदं, तेन मठादिप्रतिष्ठादौ आरम्भनानन्तरम् अशौचे नाधिकार इति वदन्ति। अत्रापि सामगेन गर्भाधानमशौचे न कार्यं तेषां तत्र वृद्धिश्राद्धाभावेनारम्भाभावात्। 'नान्दीश्राद्धं' विवाहादावित्यादिपदेन विवाहेतरसर्वसंस्काराणां ग्रहणं बोध्यम्। अपरे तु वृद्धि-श्राद्धाङ्गककार्यमात्रमादिपदग्राह्यमिति वदन्ति। दानार्चनविवर्जितमिति 'यदाऽशुद्धा तदान्येन कारयेत् क्रियते सदेति कूर्मपुराणवचनमत्स्यपुराणवचनैकवाक्यतया प्रतिनिधिविधायकमिदं वचनमिति

बहवः। विवाहपदस्यापि तन्मते कन्याविवाहपरत्वेन नानुपपत्तिः। तत्र पिता दद्यात् स्वयं कन्यामिति दाने प्रतिनिधिसम्भवात्।

आरब्धकर्मणामशौचे स्वयं कर्तव्यतावादिनां मते तदवस्थायां पितृमातृमरणेऽपि विवाहादीनामनुष्ठानापत्तिरति। पूर्वोक्तवचनसङ्कोचापत्तिश्च।

यज्ञत्वेन होमार्चनयोरपि प्राप्तौ तयोः पृथगुपादानं सन्दंशपतितन्यायेन सङ्कल्पस्यारम्भकताज्ञापनार्थमन्यथा देवतोद्देशेन द्रव्यत्यागो याग इति यज्ञत्वेन तयोरपि वरणमेव आरम्भः स्यात्।

वृषोत्सर्गस्य भाक्तयज्ञत्वात् तत्र च वरणमारम्भः। न तु सङ्कल्प। अतएव तत्र सङ्कल्पात् परं वरणात् पूर्वं पुण्याह वचनादि व्यवहारो दृश्यते। ततस्तत्रापि वरणानन्तरमशौचे कर्तव्यता सिद्धा। एवं चन्दनधेनुदानमपि वृषोत्सर्गस्थानपातित्वात् आरम्भानन्तरमशौचे करणीयं कपिलादानादिकन्तु न कार्यं 'दानार्चनविवर्जितमि'ति निषेधात्॥

## XVI

स्वपितृभ्यः पिता दद्यात्..................क्रमात्॥ इति मूलम्। (पृः २९, पं २)

अत्र स्वपदात् स्वनिष्ठजन्यतानिरूपितजनकतावत्पितृत्वलाभेन वस्वादिपितॄणां व्यावृत्तिः। दत्तकादिस्थले च मान्त्रिकजन्यता स्वीकारेण न दोषः। सुतस्य संस्कारेतरकर्णवेधादिकर्मणि च पितृकर्तृकश्राद्धत्वापत्तिवारणाय संस्कारपदम् इति केचित्। फलभागित्वेन प्रधानतया संस्कार्यस्य पितामहमातामहादीनां श्राद्धप्राप्तौ तद्व्यावृत्तये स्वपदमिति च केचित्।

कन्यायाश्च विवाहात् परं सीमन्तोन्नयनादौ पितृकर्तृकश्राद्धत्वापत्तिवारणाय "उद्वहना"दिति। अनेन पुत्रकन्यासंस्कारेषु वृद्धिश्राद्धे पितुरधिकारप्रतिपादनात् जीवत्पितृकयोर्भ्रात्रोरेकदिने संस्कारकरणे एककर्तृकतया तन्त्रताबलेन एकमेव वृद्धिश्राद्धमनुष्ठेयम्। किन्तु मृतपितृकयोस्तयोरेव सहोदरयोरपि भ्रात्रोरेकदिने तादृशसंस्कारकरणे वृद्धित्राद्धद्वयमेव करणीयम्। श्राद्धदेवतानां पित्रादीनां मातामहादीनाञ्च एकत्वेऽपि न तत्र तन्त्रता पितुर्मरणादिना कर्तृभिन्नत्वेन तन्त्रताहेत्वभावात्। अत्र येषान्तु न कृताः पित्रा संस्कारविधयः क्रमादिति वचनव्याख्याने क्रमात् संस्कार्याणां संस्काराणाञ्च क्रमादिति स्मार्तलिखनात् ज्येष्ठसंस्कारानन्तरमेव कनिष्ठस्य संस्कारकरणनियमात् ज्येष्ठसंस्कारकाले कणिष्ठस्य संस्कारे अनधिकारात् एककालत्वाभावेन सहोदरयोरपि जीवत्पितृकयोः भ्रात्रोरेकदिने उपनयनाद्येकसंस्कारकरणे न तन्त्रता किन्तु वृद्धिश्राद्धद्वयमेव करणीयमिति केचित् वदन्ति।

पुत्रसंस्कारवत् कन्यासंस्कारेष्वपि पित्रा वृद्धिश्राद्धं करणीयम्। अत्रापि सम्भवत्स्थले तन्त्रता भवत्येव। 'एतयैवावृता स्त्रियास्तूष्णीं मन्त्रेण तु होम इति संस्कारतत्त्वधृतगोभिलवचनेन कन्यासंस्कारेषु सर्वासां पुत्रसंस्कारेतिकर्तव्यतानामतिदेशात् वृद्धिश्राद्धादेरपि प्राप्त्या 'कन्यासंस्कारेषु गृह्यानुक्ततया सर्वाण्येवान्वाहार्यवन्तीत्यनेन (वृद्धि)श्राद्धं 'न प्राप्यते' इति तर्कालङ्कारधृतगोविन्दानन्दमतं न युक्तिसहम्। अपि च 'मन्त्रहीनत्वेन लौकिककर्मतुल्यतया देहाशुद्धिप्रतिबध्यत्वाभावात् तदर्थं महागुरुसपिण्डनापकर्षोऽपि माभूदिति' कृष्णचरणतर्कालङ्कारधृतं कृष्णनाथन्यायपञ्चाननपादमतमपि न समीचीनतया प्रतिभाति। तथात्वे 'पञ्चयज्ञस्नानश्राद्धेषु वैदिकेतरमन्त्रोऽपि निषिद्ध इति स्मार्तभट्टाचार्यसिद्धान्तानुसारेण तत्र स्त्रीशूद्रादेरमन्त्रकतया तेषामपि (पञ्चयज्ञस्नामश्राद्धानाम्) लौकिककर्मतुल्यत्वापत्तिः। इष्टापत्तौ जननमरणाशौचादावपि तन्मते तेषां पञ्चयज्ञस्नानश्राद्धानां

विवाहेतरकन्यासंस्काराणाञ्च अनुष्ठानापत्तिः; अशौचे लौकिककर्मणां कुत्रापि निषेधाभावात्। गृहप्रवेशादीनाञ्च लौकिककर्मत्वेन तन्मते देहशुद्धावनुष्ठानं स्यादिति।

अत्र "पुत्रकन्याविवाहेषु प्रवेशे नववेश्मन" इत्यादिवचनप्राप्तसंस्काराङ्गवृद्धिश्राद्धम् अङ्गानां प्रधानसमकालान्वयित्वनियमात् संस्कारदिने एव "प्रातर्वृद्धिनिमित्तकमि"त्यनेन विहितकाले करणीयम्, दैवात्तत्राकरणे विवाहादौ "राहुदर्शनसंक्रान्ती"त्यादि वचनमूलेन रात्रावपि कर्तव्यमिति। अत्र "नानिष्ट्वा तु पितॄन्श्राद्धैः कर्मवैदिकमारभे"दिति शातातपवचनस्थ नञ्द्वयमुखेन विधेयप्रतिपादनादपि संस्कार-तदङ्गवृद्धिश्राद्धयोरेकदिनकर्तव्यता प्रतीयते। अनेन च वैदिककर्माङ्गवृद्धिश्राद्धस्य प्रधान कर्मणः प्राक्कर्तव्यता विहिता, गृहप्रवेशादिलौकिककर्मणि तु प्रवेशात् पूर्वं परं वा वृद्धिश्राद्धं कर्तुं शक्यते इति च सूच्यते।

अत्र प्रसिद्धवङ्गीयनिबन्धकारैरपरिगृहीतमपि वचनमवलम्ब्य इदानीन्तनाः केचन संस्कारपूर्वदिने तदङ्गवृद्धिश्राद्धं कर्तव्यमिति वदन्ति स्थलविशेषे तथा व्यवहरन्ति च। निर्णयसिन्धुधृततद्वचनं यथा—पृथ्वीचन्द्रोदये गार्ग्यः —

मातृश्राद्धं तु पूर्वेद्युः
कर्माहनि तु पैतृकम्।
मातामहं चोत्तरेद्यु
र्वृद्धौ श्राद्धत्रयं स्मृतम्॥

तत्राप्यशक्तौ स एव—

पृथग्दिनेष्वशक्तश्चेदेकस्मिन् पूर्ववासरे।
श्राद्धत्रयं प्रकुर्वीत वैश्वदेवं तु तान्त्रिकम्॥

अत्र 'महत्सु पूर्वेद्युस्तदहरल्पेषु'इति गृह्यपरिशिष्टाद्व्यवस्था ज्ञेया। इति—।

एवं सति'यदहर्वा वृद्धिरापद्ये'तेति वृद्धिनिमित्तकापकर्षदिननिरूपण-विषये तथा विवाहादौ नान्दीमुखश्राद्धस्य दिवाकरणासम्भवे 'राहुदर्शनसंक्रान्ती'ति रात्रिकर्तव्यताविषये नानावितर्कापत्तिर्दुर्निवारा स्यात्। तत्र मुख्यकल्पग्रहणे स्मार्तधृतपूर्वोक्तशातातपवचनविरोधश्च प्रसज्येत। अतो देशभेदादिना स्मार्तप्रदर्शितदिशा देशान्तरीयनिवन्धकारधृतविरुद्धवचनानां सङ्गतिः साधीयसीति।

## XVII

आद्येन संस्कारसिद्धौ द्वितीयादेस्तदजनादिति मूलम्। (पृः २९, पं ५)

सजातीयसंस्कारं प्रति सजातीयसंस्कारस्य प्रतिबन्धकत्वादिति।

## XVIII

तस्याभावेऽपि तत्क्रमादिति।

संस्कार्यक्रमबाधकस्य पितुरभावे इति मूलम्। (पृः २९, पं १९)

संस्कारजन्यब्राह्मण्याधानादिफलभागित्वेन संस्कार्यस्य प्राधान्यात् संस्काराङ्गीभूतवृद्धिश्राद्धे तदीयक्रमप्राप्तौ 'स्वपितृभ्यः पिता दद्यादित्यादिविशेषवचनबलात् तत्क्रमबाधेन पितृक्रमोऽभ्युपेय इति संस्कार्यक्रमबाधकस्येत्यस्यार्थः। तत्र मरणेन, पातित्येन, प्रव्रज्यया वा पितुः श्राद्धानधिकारित्वे

संस्कार्यक्रमवाधकपितुरभावस्य सिद्धत्वेन पतिते प्रव्रजिते वा पितरि जीवत्यपि संस्कार्यक्रमेणैव तदीयसंस्काराङ्गवृद्धिश्राद्धं कर्तव्यम्। एतत्प्रतिपादनार्थमेव संस्कार्यक्रमवाधकस्येति पितृविशेषणमभिहितम्। एतदेव स्मार्तभट्टाचार्येण संस्कारतत्वे स्पष्टमभिहितम्—'तदभावे पितुर्नाशे पातित्यादिना श्राद्धानधिकारे वा संस्कार्यक्रमादित्यन्तेन। किन्तु पितुर्देहाशुद्धौ तथा पुत्रस्याशौचापगमेऽपि पितुरशौचे एकान्ततः श्राद्धकरणानर्हत्वाभावात् तत्कालकरणीये सम्भवत्पुत्रसंस्कारे न संस्कार्यक्रमेण वृद्धिश्राद्धं करणीयम्। संस्कार्यक्रममात्रावच्छिन्नवाधकस्यैव पितुरभावे तथा विधानात् किन्तु पितृक्रमेणेति। अशौचादौ 'कर्तुस्तातकालिकी शुद्धिः पूर्वाशौचाद्विशुध्यतीत्यादिना न सर्वथा पितुरधिकारवाधः, देहाशुद्धावपि यदहर्वा वृद्धिरापद्येतेति' गोभिलवचनात् सपिण्डनापकर्षपक्षे पितुः श्राद्धकर्तृत्वयोग्यतासम्भवात् न सर्वदा वाधः इति। अत्रापि स्वयं प्रवृत्त तृतीय प्रतिनिधित्वसम्भवात्।

## XIX

न च वैपरीत्यं तथात्वे वाक्यानुवादः स्यात्, अव्ययपदानुवादेषु विभक्तेर्नानुवादकता हीति मूलम्। (पृः ३१, पं १)

विभक्तेरिति, अत्रायमाशयः। यद्यपि पृथगित्यस्यापि वाक्यत्वमस्ति तथापि अव्ययोत्तरजायमानविभक्तेरनुवादकत्वं सिद्धमेव, अर्थान्तराप्रतिपादकत्वात्। अतोऽधुना तस्या अनुवादकत्वं न भवति किन्तु विधानकाले एव, अवसानदिनादृते इत्यस्यानुवादकत्वे तु सर्वेषामनुवादकत्वमधुनैव भवतीति विशेषः।

## XX

अन्वष्टकायां साग्निकानामेवाधिकारः इति मूलम्॥ (पृः ३१, पं २१)

एतच्चान्वष्टकाश्राद्धं सामवेदिनां 'न योषिद्भ्यः पृथक् दद्या'दित्यादिना तथा 'कर्षुसमन्वितं त्यक्ते'त्यादिना मातृमातामहपक्षयोः पर्युदस्तत्वात् पित्रादित्रिदैवतं करणीयमन्यवेदिनान्तु मात्रादिनवदैवतमिति।

## XXI

ततो विवाहः कर्तव्यः शुद्धः शुभसुतप्रद इति मूलम्। (पृः ३२, पं १६)

अनेन नान्दीमुखश्राद्धस्य विवाहादिसंस्कारकर्मणि फलोपाधायकाङ्गत्वं प्रतिपादितम्। अङ्गं तावत् द्विविधम्—स्वरूपनिर्वाहकं फलोपधायकञ्च। तत्र स्वरूपनिर्वाहिकाङ्गाभावेन कर्मणः स्वरूपस्यैवासिद्धेः पुनस्तत्कर्मानुष्ठानं विधेयम्। यथा अकाले चेत् कृतं कर्म काले तस्य पुनः क्रियेत्यनेन श्राद्धादौ मृततिथ्यादीनां स्वरूपनिर्वाहकाङ्गत्वात् तदभावे कृतमपि श्राद्धं पुनरावर्तनीयम्। फलोपधायकाङ्गाभावे तु न तथा। अत्र तदङ्गाभावे तत्फलस्यैवानुत्पत्तिः, कर्मणस्तु स्वरूपसिद्धिर्भवत्येव। तेन च कदाचित् दैववशात् वृद्धिश्राद्धमकृत्वा विवाहादिसंस्कारे निष्पादिते तस्य संस्कारस्य सिद्धिर्भवत्येव, किन्तु तस्यात्यन्ताप्रशस्तत्वं स्यात्। न पुनस्तदर्थं संस्कारस्यावर्तनमिति। तथा च तदङ्गस्याक्रियायान्तु नावृत्तिर्न च तत्क्रिया इति।

## XXII

आदिशब्दात् होममात्रे हावयेदिति श्रुतेरिति मूलम्। (पृः ३३, पं १२)

होममात्रे अङ्गहोममात्र इत्यर्थः। यत्र प्रधाने स्त्रीशूद्रयोरधिकारस्तदङ्गहोमादावेव तयोः स्त्रीशूद्रयोर्ब्राह्मणद्वाराऽधिकारः, न त्वन्यत्रेति भावः। न च प्रधानेऽधिकारसत्त्वेऽङ्गेऽप्यधिकारो-

ऽस्त्येव, तदा स्वयमेव कथं न क्रियते इति वाच्यं 'न स्त्री जुहुयात्' इत्यनेन सूत्रेण विशिष्य निषेधात्, ब्राह्मणद्वारैव जुहुयात्। वृद्धिश्राद्धादौ तु जुहुयात् हावयेद्वापीतिवत् तादृशविशेषविधानाभावात् प्रतिनिधिनापि न कर्तव्यतेति। न च स्त्रीणां होमनिषेधस्तु अङ्गहोमातिरिक्तविषय इति वाच्यं सङ्कोचे प्रमाणाभावात्।

## XXII(a)

दशपुत्रसमा कन्या या च स्याच्छीलवर्जिता (शीलसंयुता) इति मुलम्। (पृः ३४, पं १०)

या च स्याच्छीलवर्जितेति पाठे शीलमस्यास्तीति शीलः शीलवानित्यर्थः; अस्त्यर्थे अर्शआदित्वादच् प्रत्ययः, "विदितः समाययौ" इतिवत्। तथा च शीलाय शीलवते सत्स्वभावाय वर्जिता त्यक्ता दत्तेत्यर्थः। एवञ्च सा कन्या दौहित्रादिद्वारेण दशपुत्रवदैहिकपारलौकिकक्रियोपकारिका इति।

## XXII(b)

राहुदर्शनसंक्रान्तीति मूलम्। (पृः ३७, पं २३)

आदिशब्दः श्राद्धादिपरः, अतो रात्रौ रविसंक्रमणे स्नानदानश्राद्धादीनि कर्तव्यानि। रात्रौ विवाहे यदा प्रातर्वृद्धिश्राद्धं न कृतं तदा रात्रावपि कार्यम्। एतेनासद्भावे दिवसस्य भागान्तरेऽपि वृद्धिश्राद्धमवगम्यते।

अत्यये मरणे स्नानतर्पणपिण्डदानादिकं कर्तव्यम्। वृद्धौ पुत्रजन्मनि स्नानमङ्गाशौचापगमार्थं दानं 'सहिरण्यं तिलैः पुर्णं पात्रं दद्यात् सुतोदये इति हारिताद्युक्तं हिरण्यतिलपात्रदानं वृद्धिश्राद्धञ्च कर्तव्यमिति श्राद्धविवेकः।

## XXIII

तत्र स्त्रीणां ध्वनिः शुभ इति।

स्त्रीणां ध्वनिः हुलु हुलु ध्वनिरिति मूलम्। (पृः ३६, पं १६)

एतद्व्याख्यानुसारेण कुत्रचित् प्रदेशे स्त्रीभिः विवाहाद्युत्सवकाले हुलुहुलु ध्वनिः प्रामाणिक एव क्रियते। कुत्रचित् पुनः स्मार्तमतं सर्वथा प्रमाणतया परिगृह्णन्तः स्मार्ता अपि विवाहाद्युत्सवकाले प्रामाणिकन्तं ध्वनिं न कारयन्ति परन्तु तत्र कटाक्षी कुर्वन्तीति महद्विस्मयकरमेवैतत्। विवाहादिकाले स्त्रीणां शङ्खध्वनिस्तु न कुत्रापि प्रमाणपरिगृहीतः, प्रत्युत वृद्धपरम्पराप्राप्तं तद्विरुद्धमेव वचनं श्रूयते—यथा—

स्त्रीणाञ्च शङ्खध्वनिभिः शूद्रजातेस्तथैव च।

भीता रुष्टा याति लक्ष्मीः स्थलादन्यत् स्थलान्तरम्॥ इति।

## XXIV

विवाहे तु दिवाभागे ·· ·· ·· स्वामिघातिनी इति मूलम्। (पृः ३७, पं १६)

अनेन दिवाकाले विवाहो न निषिद्धः। अत एव उद्वाहचन्द्रालोके महामहोपाध्यायतर्कालङ्कारपादाः—'अत्र च विवाहादिकर्मणः कालपरिभाषायां गृह्यसूत्रेषु 'पुण्याह' पदोपादानात् अहन्येव विवाह इति पाश्चात्याः। तथा च स्मरन्ति, मुख्यो विवाहः पूर्वाह्णे मध्याह्ने चोत्तमोत्तमः।

निशायां मध्यमः प्रोक्तः, अपराह्णे तु गर्हितः॥

इत्यन्तेन दिवाविवाहमप्याहुः। तस्मात् विवाहस्य दिवा रात्रौ च कर्तव्यता सिद्धा। अस्तमिते ध्रुवं दर्शयतीति पारस्करसूत्रव्याख्यायां अस्तमिते इति दिवाविवाहे अस्तमिते सूर्ये धुवमुदीक्षस्वेति

प्रैषेण वरो वधुं प्रेषयति। रात्रिविवाहे तु गोदानानन्तरमेवेति जयराम-भाष्येऽपि विवाहे रात्रिकालानियम इत्यवगम्यते इति महामहोपाध्यायन्यायपञ्चाननग्रन्थेन च दिवारात्रावुभयत्रैव विवाहस्य वैधता प्रतिपादिता। एवञ्च रात्रौ दानं न शंसन्ति विना चाभयदक्षिणाम्। विद्यां कन्यां द्विजश्रेष्ठ दीपमन्नं प्रतिश्रयम्॥ इति महाभारतवचनेन, ग्रहणोद्वाहसंक्रान्ति-यात्रार्तिप्रसवेषु च। दानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यते॥ इति व्यासवचनेन च अस्मद्देश-प्रचलितरात्रिविवाहस्यापि सुस्पष्टं प्रामाण्यमुपलभ्यते। देशान्तरे तु दिवाविवाहोऽधुनापि प्रचरति। गौडानान्तु रात्रावेव विवाहाचारः। तथा च 'विवाहे तु दिवाभागे' इति भागपदोपदानात् भाक्त-दिवा एव निषिद्धम् न तु दिनमात्रं, तथात्वे भागपदव्यर्थतापत्तिः। एवञ्च पूर्वदर्शितदिवाविवाह-बोधकवचनस्यापि नानुपपत्तिः।

ततश्च

त्रियामां रजनीं प्राहुस्तशक्त्वाद्यन्तचतुष्टयम्।
नाडीनां तदुभे सन्धे दिवसाद्यन्तसंज्ञिते॥

इत्यनेन रात्रेः प्रथमयामार्धस्य तथा शेषयामार्धस्य पूर्वापरदिनकर्तव्यकर्मणः गौणकालाभि-धानात् एतादृशभाक्तदिवाकाले अर्थात् रात्रेः प्रथमयामार्धे शेषयामार्धे च अतिदिष्टदिवात्वेन विवाहो न शास्त्रसम्मतः इत्यनेकेषां मतम्। अपरे तु सूर्यास्तगमनात् सूर्योदयं यावत् सामान्यरात्रावेव विवाहकालं वदन्ति। अत्रेदं प्रसङ्गाद्वक्तव्यम्। विवाहस्य दिवारात्रिकर्तव्यतया शास्त्रप्राप्तत्वेन रात्रि-करणीये विवाहे एकत्रदृष्टः शास्त्रार्थः बाधकं विनाऽन्यत्रापि कल्प्यते इति न्यायेन प्रकरणाद्वाक्यस्य बलवत्त्वेन च यात्राप्रकरणीयेनापि 'न वारदोषाः प्रभवन्ति रात्रौ' इत्यादिवचनेन निषिद्धवारजनित-दोषप्रतिप्रसूततया शनिमङ्गलवारादावपि विवाहव्यवहारः बहुलं प्रचलति। एवमपि ये तु वदन्ति यात्राप्रकरणीयेनानेन न विवाहे प्रतिप्रसवसम्भवः इति तेषां मतेऽपि 'बहुतरगुणयुक्तं योजयेन्मङ्गलेषु इत्यनेन प्रतिप्रसवः सम्भवतीत्यास्तां विस्तरः। एतच्च समयप्रदीपे सुव्यक्तम्—यथा

वारदोषाश्च ये प्रोक्तास्ते दिवायोगसंश्रयाः।
रात्रौ तारेक्षणं कृत्वा विवाहः शुभदो मतः॥ इति।

## XXV

विवाहादिसंस्कारकार्याणि सौरेणैव इति मूलम्। (पृः ३८, पं २५)

'विवाहादौ स्मृतः सौर" इत्यत्र स्मार्तेन मलमासतत्त्वे यत्कर्म सूर्यभोग्यराश्युल्लेखेन विहितं यच्च विशिष्योदगयनादिना विहितं कर्म तदेवादिपदग्राह्यमुक्तम्। एतत्पर्यालोचनया केचित् संस्कारत्वेऽप्यन्नप्राशननामकरणयोरयनादिविहितत्वाभावात् राश्युल्लिखितत्वाभावाच्च 'शेषे कर्मणि चान्द्रः स्यादेष मासविधिः स्मृतः' इत्यादिवचनबलेन तत्र मुख्यचान्द्रमासोल्लेखं कुर्वन्ति। बहुना-मेकधर्माणामेकस्यापि यदुच्यते। सर्वेषामेव तत् कुर्यादेकरूपा हि ते स्मृताः॥ इति न्यायेन संस्कारमात्रे विवाहादिवत् सौरमासोल्लेखः कर्तव्य इति बहूनां स्वरसः। अत एव स्मार्तेनोक्तं विवाहादिसंस्कारकर्मणि सौरेणैव वाक्यमिति॥

## XXVI

तिथिकृत्ये चेति मूलम्। (पृः ३८, पं २८)

'तिथिकृत्ये च कृष्णादि'मित्यत्र तिथिकृत्ये जन्मतिथिकृत्यादौ इति टीकाकार-काशीरामेन व्याख्यातम्। व्याख्यानमिदं न समीचीनतया प्रतिभाति, तथा सति जन्मतिथिकृत्यवत् मृततिथि-

कृत्ये एकोद्दिष्टादावप्यनेन गौणचान्द्रमासोल्लेखप्रसङ्गः। वस्तुतस्तु जन्मतिथिकृत्ये गौणचान्द्रमासोल्लेखः ब्रह्मपूराणीयकृत्यत्वेन, न तिथिकृत्यत्वेनेति। तिथिकृत्यन्तु तिथित्वविभाजकधर्मावच्छिन्नकृत्यपरं तेन च चतुर्दश्यां कुर्यात् पञ्चम्यां कुर्यादित्येवंरूपेण तिथिविशेषविहिते शिवचतुर्दशीव्रतादौ तिथिकृत्यत्वेन गौणचान्द्रमासोल्लेखः न तिथिसामान्यकृत्ये इति।

## XXVII

सौरे रविराश्युल्लेखोऽपि ... ... ... ... ... .. ..

संक्रान्तिविहिते कृत्ये संक्रान्तिः परिकीर्त्तिता।
मासोल्लेखश्चेतरस्मिन् रविराशिस्थितिस्तथा॥ इति मूलम्। (पृः ३६, पं १)

मासपदस्य मुख्यचान्द्रे शक्तत्वेन निरुपपदमासशब्देन सर्वत्र मुख्यचान्द्रमास एव ग्राह्यः। एवं सति मासोल्लेखश्चेतरस्मिन् रविराशिस्थितिस्तथा इत्यत्र निरुपपदमासशब्दश्रवणात् संक्रान्तिकृत्ये मुख्यचान्द्रमासोल्लेख एव मुनेरभिमत इति प्रतीयते। तत्र च संक्रान्तिरपि निमित्तत्वेन उल्लेख्या। इतरस्मिन् संक्रान्तिकृत्यभिन्ने राशिविहितमासकृत्ये सौरमासोल्लिखिते कर्मणि रविराशिस्थितिरुल्लेख्या। तथा शब्देन मासोल्लेखवदमुकराशिस्थे भास्करे इत्यपि उल्लेख्यमिति ज्ञायते इति बहवः। अपरे तु संक्रान्तिविहिते संक्रान्तिमात्रविहिते कर्मणि संक्रान्तिः परिकीर्त्तिता इति अमुकसंक्रान्त्यामित्युल्लेखनीयम्। इतरस्मिन् संक्रान्तिमात्राविहिते कर्मणि रविराशिस्थितिः अमुकराशिस्थरवावित्युल्लेख्यम्। तथा मासादयश्चोल्लेख्या इति। सौरकृत्यं द्विविधम्, संक्रान्तिनिमित्तकं तद्भिन्ननिमित्तकञ्च। 'संक्रान्तिः परिकीर्तिता' इति नियमार्थं संक्रान्तिरेव परिकीर्तितेत्यर्थः, न राशिरिति। मासपक्षतिथीनाञ्चेत्यादिना तदुल्लेखस्य सिद्धत्वात्। ननु तत् किं मासादीनामुल्लेखो नास्तीत्याह मासश्च इति। एकयोगनद्धन्यायेन अनुक्तसमुच्चयार्थकचकारेण वा पक्षादीनामुल्लेख इत्यर्थ इति व्याख्यानमाहुः। तेषां मते संक्रान्ति-कृत्ये सौरमासोल्लेखः किन्तु राश्युल्लेखो नास्तीति विशेषः।

## XXVII(A)

चत्वारिंशद्वत्सराणामिति मूलम्। (पृः ४४, पं २)

रण्डाश्रमी मतः इति निन्दाश्रवणादष्टचत्वारिंशद्वर्षोत्तरकाले भार्यापुत्रविहीनस्य यज्ञादिकरणे न फलप्राशस्त्यमिति न तु सर्वथा यज्ञादावधिकारित्वाभाव इति मतं प्रचरति।

परे ऊर्ध्वं, परवचनैकवाक्यत्वात्। तथाच 'दृक्षवच्छास्त्रेव्यरहार'इति न्यायोऽत्रानुसर्त्तव्यः। एतेनाष्टचत्वारिंशद्वत्सराणां मध्ये एव भार्यावियुक्तस्य रण्डाश्रमित्वं नतु परतः इति रघुनाथतात्पर्यम्।

आश्रमकरणकारणञ्च चतुर्विंशतिवत्सरावधि परकालः त्र्यष्टवर्षोऽष्टवर्षीया"मिति मनुवचनाच्चतुर्विंशतिवत्सरादौ कन्यालाभसत्त्वे विवाहाकरणे प्रायश्चित्ती भवतीति।

## XXVIII

एवञ्च प्रौढकन्याया दोषदृष्ट्या यथा महागुरोः सपिण्डनापकर्षस्तथाऽनाश्रमिणोऽपीति मूलम्।
(पृः ४४, पं ६)

अनूढावस्थायां (कन्यायाः) रजोदर्शने नानानिन्दाश्रवणात् दशमे कन्यका प्रोक्ता अत ऊर्ध्वं रजस्वला इत्यादिवचनबोधितरजोयोगशङ्कायां निरवकाशत्वेन तद्विवाहार्थं यथा तदीयमहागुरोः सपिण्डनापकर्षः तथा दृष्टरजस्काया अपि 'मासि मासि रजस्तस्याः पिता पिवति शोणित'मिति 'दद्यादृतुसंख्याः गाः शक्तः कन्यापिता यदी'त्यादिवचनैः पुनः पुनः रजःप्रवृत्तौ पापप्रायश्चित्तवृद्धिदर्शनात् एतादृशायाः ऋतुमत्या विवाहस्यापि निरवकाशतया तदर्थमपि तदीयपितृमातृसपिण्डनापकर्षो

व्यज्यते इत्यपि केचित् वदन्ति। वस्तुतस्तु रजोयोगशङ्कायामेव तन्महागुरोः सपिण्डनमपकर्षनीयं नतु रजःप्रवृत्तेः परमपि। अत एव दोषदृष्टेरिति दोषसम्भावनेति काशीरामेणापि व्याख्यातम्। ततश्च 'दोषदृष्टेरिति' स्पष्टतः स्मार्तभट्टाचार्योक्तिदर्शनात् दृष्टरजस्काया अत एव जातदोषायाः विवाहार्थमपकर्षस्य तन्मतसिद्धत्वं न प्रतिभाति।

अत्र कन्यापुत्रयोर्महागुरुमरणे निरवकाशतद्विवाहार्थं तदीयमहागुरुसपिण्डनापकर्षो विधेयः, जीवत्-पितृकयोस्तयोः पितामहपितामहीमरणे तु पितुर्देहाशौचसत्त्वेऽपि मु ख्यकर्माधिकारिणोस्तयोर्देहाशौचा-भावेन प्रेतप्रतिवध्यत्वाभावात् तयोः पौत्रीपौत्रयोर्विवाहार्थं पितामहपितामहीसपिण्डनापकर्षो न विधेयः।

अष्टौ संस्कारकर्माणि गर्भाधानमिव स्वयम्।
पिता कुर्यात्तदन्यो वा तस्याभावेऽपि तत्क्रमात्।

इत्यनेन कन्यापुत्रयोर्विवाहे पितुः संस्कर्तृत्वाभावेन तद्देहाशौचस्य पुत्रकन्याविवाहरूपवृद्धि-प्रतिबन्धकत्वाभावान्नापकर्षप्रसङ्गः। विशेषवचनादेव तत्र तदङ्गीभूतनान्दीमुखश्राद्धे पितुरधिकारिता-मात्रम् तस्य च नापकर्षनिमित्तत्त्वम्।

एवञ्च एतादृशस्थले आपत्कल्पे एव अपकर्षं विनापि स्वयंप्रवर्तनन्यायेन अन्येन केनापि प्रतिनिधिना वृद्धिश्राद्धं कृत्वा कन्यादानं करणीयम्। पुत्रविवाहेऽपि तथा वृद्धिश्राद्धं करणीयम्।

अत्रापि केचित् 'तस्याभावेऽपि तत्क्रमादित्यनुस्मृत्य संस्कार्यक्रमेण वृद्धिश्राद्धकर्तव्यतामाहु-स्तन्न मनोरमं देहाशौचे पितुरेकान्ततोऽनधिकारित्वाभावात्। एतत्तु पूर्वमेव विवृतमस्माभिः।

अन्ये तु अत्रापि पितुर्देहाशौचसत्त्वेन पितृमात्राधिकारिकतदङ्गवृद्धिश्राद्धस्य प्रतिबध्यत्वात् विवाहस्यापि वाधापत्तेरिति युक्त्या पितामहपितामह्योरपि सपिण्डनमपकर्षणीयमिति वदन्ति।

## XXIX

### अत एव भार्याशब्देति मूलम् (पृः ४४, पं २०)

तथा च विवाहजन्यविलक्षणसंस्कारावच्छिन्ननारीविशेष एव भार्यापदवाच्यः, यथा विलक्षण-संस्कारयुक्तकाष्ठविशेषो यूपशब्दवाच्यः, यथा च विलक्षणसंस्कारान्वितोऽग्निराहवनीयपदवाच्य इति। वृषोत्सर्गादौ तु यूपशब्दो लाक्षणिकः।

## XXX

### पापव्यसनासक्तमिति मूलम् (पृः ४५, पं २७)

व्यसनान्याह मनुः—

मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियोमदः।
तौर्यत्रिकं वृथाट्या च कामजो दशको गणः॥
पैशुन्यं साहसं द्रोह ईर्ष्याऽसूयार्थदूषणम्।
वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः॥

अक्षो द्यूतक्रीड़ा। तोर्यत्रिकं नृत्यगीतवाद्यानि त्रीणीति दश। पैशुन्यमविज्ञातदोषाविष्करणम् साहसं साधोर्बन्धनादिना निग्रहः। द्रोहो जिघांसा, ईर्ष्या अन्यगुणासहिष्णुता, असूया परगुणेषु दोषा-विष्करणम्। अर्थदूषणमर्थानामपहारो देयानामदानञ्च। पारूष्यमप्रियं वच इति मलमासत्त्वे।

अयुक्तमयथाप्रोक्तं यच्चान्यदिह सम्भवेत्।
विद्वद्भिस्तत्परिस्कृत्य क्षन्तव्योऽयं जनः पुनः॥

# उद्वाहपरिशिष्टम्

महामहोपाध्यायस्मार्तभट्टाचार्यविरचितोद्वाहतत्त्वाध्ययनाध्यापनाभ्यामुद्वाहज्ञानप्रयोजकीभूता ये तावद्विषयाः कैश्चिदपि उपलब्धुं न शक्यन्ते, तेषां सुखावबोधाय निबन्धबहुलपर्यालोचनाप्रयासमङ्गीकृत्य दुर्बलशरीरेणापि मया उद्वाहतत्त्वपरिशेषखण्डमिदं प्रारभ्यते।

तत्र उद्वाहनिरूपणे मनुशातातपवचनपर्यालोचनया स्मार्तभट्टाचार्यपादैर्भार्यात्वसम्पादकग्रहणं विवाह इति विवाहलक्षणं निरणायि। वङ्गदेशेषु यानि तावत् संस्कारकर्माणि प्रचलितानि, तेषां मध्ये तन्मते विवाहातिरिक्तानां सर्वेषामेव क्रियारूपत्वं, किन्तु विवाहस्यैव स्वीकाररूपज्ञानविशेषात्मकत्वमायाति। तत्र प्रमाणं पाणिनीयं दुर्गसिंहोक्तं च, यथा—'उपाद् यमः स्वीकरणे, एवमुद्वाहे उपयमः, अनयोरेकवाक्यतया उद्वाहस्वीकरणयोरभिन्नत्वं प्रतीयते। एवं सति अतिबालकस्य भार्यात्वसम्पादकग्रहणाभावात् तस्य विवाहानुपपत्तिरवतरति। नचेयमिष्टापत्तिः। तथात्वे शुद्धितत्त्वीयसन्दर्भविरोधो दुर्वारः।

यथा—ऊनद्विवर्षीयायाः शूद्रपत्न्या मरणे मासाशौचं, तद्वोढुः पञ्चवर्षीयस्य मरणे द्वादशाहाशौचमिति महद्वैषम्यमिति, सन्दर्भे पञ्चवर्षीयेऽपि विवाहकाण्डज्ञानानवच्छिन्ने वोढुः पदप्रयोगेन तथाविधवालकस्य विवाहकर्तृत्वं प्रतीयते। अनुपपत्तिमिमां सोढुं वयं न शक्नुमः, अतः स्मार्तभट्टाचार्यचरणस्मरणतः उद्वाहलक्षणमिदमुद्भासयामः।

चरमसंस्कारानुकूलव्यापारविशेषत्वं विवाहत्वम्। तत्र चरमत्वम्, स्वावच्छेदकशरीरावच्छिन्नस्वसमानाधिकरणप्रागभावासमानकालीनत्वम्। अत्र प्रथमस्वपदं द्वितीयस्वपदञ्च विवाहत्वेनाभिप्रेतं यद्वस्तु तत्परम्। स्वावच्छेदकशरीरावच्छिन्नत्वं स्वसामानाधिकरण्यञ्च संस्कारविशेषणम्। संस्कारश्चात्र पापक्षयरूपः। तस्य यः प्रागभावः पापक्षयो भविष्यतीति प्रतीतिसिद्धः। पापक्षयप्राक्कालवृत्त्यभावः तदधिकरणं यः कालस्तन्निरूपित-वृत्तित्वाभाववत्त्वम्। तेन नामकरणादौ नातिव्याप्तिः। अत्र चान्यदीयसंस्कारमादायासम्भववारणाय स्वाधिकरणवृत्त्यन्तं, अवच्छिन्नान्तनिवेशाच्च जन्मान्तरीयसंस्कारमादाय नासम्भवः। एवमेनः शमं याति बीजगर्भसमुद्भवमित्यादिवचनप्रतिपाद्यपापविशेषध्वंसात्मकसंस्कारनिवेशादेव स्नानाचमनादिकमादाय नासम्भवः। अथ यस्य नामकरणाद्यन्यतमादेकमात्रसंस्कारो जातः, तस्य तदन्यतमे अतिव्याप्तिरिति चेन्न, सामानाधिकरण्ये स्वभेदस्यापि निवेशात्। तेन च स्वभिन्नसंस्कारस्य तत्र बालकेऽप्रसिद्ध्या, तत्प्रागभावस्याप्यप्रसिद्धिः। एवमपि यत्र पुरुषे विवाहपूर्ववर्तिसंस्कारद्वयमात्रं जातं तत्रान्तिमसंस्कारस्यापि उक्तचरमत्वापत्तिः, मैवम्, तादृशप्रागभावासमानकालीनत्वमित्यस्य तादृशप्रागभावाधिकरणकालवृत्तितानवच्छेदकवैजात्यस्य विवक्षणात्। अतस्तस्मिन् संस्कारे न चरमत्वम्। नचैवं "विवाहमात्रं संस्कारं शूद्रोऽपि लभते सदे"ति वचनाच्छूद्रादेस्तादृशसंस्कारान्तराप्रसिद्ध्या तदीयविवाहेऽव्याप्तिरिति वाच्यम्, तत्तद्वचनैस्तेषां संस्कारे मन्त्रस्यैव निषेधात् न संस्कारस्य, शूद्रोऽप्येवंविधः कार्यो विना मन्त्रेण संस्कृतः, इति वचनेन संस्कारान्तरस्यापि बोधनात्। द्वितीयादिविवाहे च स्त्रीसंस्कारजनकत्वेऽपि वरनिष्ठसंस्काराजनकतया स्वसमानाधिकरणसंस्कारान्तरप्रागभावासमानकालीनतया, न द्वितीयादिविवाहकर्तुः प्रथमे विवाहेऽव्याप्तिः, पापविशेषध्वंसात्मकस्य तस्य प्रथमविवाहेन निर्वाहात्। अत्र "उद्देश्यतासम्बन्धेन कन्यादानवत्त्वमेव विवाहकर्तृत्वम्। विवहतीत्यादौ च आख्यातेन तेन सम्बन्धेन आश्रयत्वं बुध्यते, अतो दातुर्न विवाहकर्तृत्वापत्तिः। न वा तत्र विवहतीति प्रयोगः। उद्देश्य-

तासम्बन्धेन तत्र कन्यादानस्याभावात्। अतएव ब्राह्मो विवाह आहूय दीयते शक्त्यलङ्कृता इति याज्ञवल्क्यवचनस्य आहूय यथाशक्त्यलङ्कृता कन्या यद्दीयते स ब्राह्मो विवाहः इति यथाश्रुतार्थः। एवमाच्छाद्य चार्चयित्वा चेत्यादिमन्वादिवचनाद्यपि यथाश्रुतं सङ्गच्छते।

ब्राह्माद्यष्टविधा संज्ञा तु दानस्यैव तत्तद्वचनप्रतिपाद्यत्वात् तस्य।

तेन सम्बन्धेन तादृशदानस्यैव संस्कारजनकतया अतिबालकार्देविवाहेऽपि नाव्याप्तिः। अन्यथा तेषां तदसम्भवेन विवाहानुपपत्त्या प्रागुक्तस्मार्तसन्दर्भासङ्गतिः स्यादिति।

अत्रेदं चिन्त्यम्, विवाहादिकर्माणि संस्कारजनकानि, संस्कारस्तावत् पापक्षयरूपः। तच्च पापं मातापितृशरीराशुच्यवयवशुक्रशोणितसम्बन्धिपुत्रशरीरावच्छेदेन पुत्रात्मनि जायते। ईदृशं पापं पित्रादिकृतैर्जातकर्मादिभिरपनुद्यते इति तत्त्वम्। स्वावच्छेदकशरीरावच्छिन्नत्वमित्यस्यायमर्थः स्वावच्छेदकशरीरवृत्तिः तच्छरीरसमानकालीनानेकावृत्तिर्या जातिस्तदवच्छिन्नत्वम्। अतो न क्षणभङ्गुरवादिमते दोषः। जातिरपि चैत्रत्वादिरूपा। इत्युद्वाहलक्षणम्। नचैतस्य लक्षणस्य स्वत्वघटितत्वादननुगम इति वाच्यम्, स्ववृत्तिध्वंसप्रतियोगिकालवृत्तित्वतादृशसामानाधिकरण्योभयसम्बन्धेन संस्कारवदन्यत्वस्य विवक्षणात्, तादृशभेदानुयोगितावच्छेदकसंस्कारतावच्छेदकावच्छिन्नत्वं विवक्षितम्। अतो न क्वाप्यनुपपत्तिः।

अथवा संस्कारविभाजकयद्धर्मावच्छेदेन चरमसंस्कारत्वव्यवहारस्तादृशधर्मवान् संस्कारश्चरमसंस्कारः। "अविप्लुतब्रह्मचर्यो लक्षणां स्त्रियमुद्वहेत् इत्यनेनास्खलितब्रह्मचर्यस्य सुलक्षणायाः उद्वाहमभिधाय इतिवचनमभिहितं याज्ञवल्क्येन। "अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम्" "अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम्"। तत्र अन्यपूर्वा कीदृशीत्याह "अक्षता च क्षता चैव पुनर्भुः संस्कृता पुनः। स्वैरिणी या पतिं हित्वा सवर्णं कामतः श्रयेत्"।

अन्यपूर्वा द्विविधा पुनर्भुः स्वैरिणी चेति। पुनर्भूरपि द्विविधा क्षता चाक्षता च। तत्र क्षता संस्कारात् प्रागेव पुरुषसम्बन्धदूषिता। अक्षता पुनः संस्कारदूषिता। या पुनः कौमारे पतिं त्यक्त्वा कामतः सवर्णमाश्रयति सा स्वैरीणीति। एवं याज्ञवल्क्यवचनतात् पर्यालोचनया अन्यपूर्वायाः क्षतयोन्याः अनन्यपूर्विकामित्यादिना पर्युदास एव प्रतिपादितः, अतस्तद्विवाहो वैध एव नेति भाव्यम्।

एवमत्र ग्रन्थे न्यायेन विधिना नृप इति भङ्ग्या यासामविवाह्यत्वं प्रतिपादितम्, तत्र प्रमाणान्युच्यन्ते। यदाह बोधायनः—"मातुःसपत्न्या भगिनीं तत्सुताञ्च विवर्जयेत्। पितृव्यपत्न्या भगिनीं तत्सुताञ्च विवर्जयेत्।" अनेन सपत्नीमातुर्भगिनीसुता एवं पितृव्यपत्न्या भगिनीसुतापि नोद्वाह्या इति स्पष्टमुक्तम्।

जामातुर्भगिनीञ्चैव श्वश्वास्तु भगिनीन्तथा। पत्नीनां भ्रातृवर्गानां सुताञ्चैव विवर्जयेत्। "तथा मित्रसुतां चैव गुरुपुत्रसुतान्तथा। तत्र गुरुपुत्रयोः सुतामित्यर्थः। प्रत्यासत्तिबलेन पुत्रशब्दो गुरुपुत्रपरः। एतानि वचनानि व्यवहारनिबन्धग्रन्थे धृतानि।

एवं यथा, मातृनाम्नी कन्या अविवाह्या तथा कन्यापितृनामकवरस्यापि विवाहो निषिद्धः। अत्र वृद्धमनुवचनं प्रमाणं यथा—मातृनाम्नी च या कन्या पितृनामा च यो वरः। तयोर्विवाहो नैव स्यान्मनुराह प्रजापतिः। मत्स्यसूक्तेऽस्य विस्तारो दृश्यते। पितुर्ज्येष्ठपितुश्चैव पितुश्चापि कनीयसः। नामान्वितो वरोयस्तु पितृनामा स उच्यते॥

तत्रैव मातुर्यन्नाम गुह्यं स्यादित्याद्यभिधाय सपत्नीमातुर्यन्नाम तन्निषिद्धमिहोच्यते इति। इदानीमिदं निरूप्यते ऋतुमत्याः कन्याया विवाहस्यापि शास्त्रीयत्वम्। अथ विवाहस्य दानसम्पाद्यत्वात् उद्देश्यतासम्बन्धेन दानरूपत्वाद्वा उभयथापि दानमावश्यकम्, तद्दानन्तु सति पितरि पितृकर्तृकमेव। सञ्जातार्तवायाः कन्याया दानन्त्वप्रामाणिकमिव भाति। यदाह गौतमाचार्यपादः–प्रदानं प्रागृतोरिति। वशिष्ठोऽपि यावन्नोद्भिद्येते स्तनौ तावदेव देया, अथ चेदृतुमती भवति दाता प्रतिग्रहीता च नरकमाप्नोति पितृपितामहप्रपितामहाश्च विष्ठायां जायन्ते, तस्मान्नग्निका दातव्या इति। एवं,

अष्टवर्षा भवेद् गौरी नववर्षा तु रोहिणी।
दशमे कन्यका प्रोक्ता अत ऊर्द्ध्वं रजस्वला ॥
तस्मात् सम्वत्सरे प्राप्ते दशमे कन्यका बुधैः।
प्रदातव्या प्रयत्नेन न दोषः कालदोषजः। इति अङ्गिरोवचनम्।

'अतोऽप्रवृत्ते रजसि कन्यां दद्यात् पिता सकृत्। महदेनः स्पृशेदेनमन्यथैष विधिः सता'मित्यपि राजमार्तण्डीयम्। प्रमाणैरेभिः कन्याया रजोदर्शनात् पूर्वं रजो दर्शनयोग्यकालादधश्च कन्यादानावगतेः।

सत्यं "काममामरणात्तिष्ठेत् गृहे कन्यर्तुमत्यपि। नचैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित्"॥; इदं हि मनुवचनं गुणवत्पात्रालाभे प्राप्तरजस्काया अपि मरणकालपर्यन्तं पितृगृहेऽवस्थानाभिधानेन तथाविधपात्रलाभे तस्या अपि दानं द्योतयति। अतएव स्मार्तपादैरपि गुणवतेऽष्टवर्षान्न्यूनापि देयेत्युक्तम्। गोभिलेन 'नग्निका तु श्रेष्ठा' इति सूत्रेण नग्निकायाः प्राशस्त्यकथनेनानग्निकाया अप्राशस्त्यं प्रतिपाद्यते। नग्निका अप्राप्तरजस्का, नग्निकानागतार्तवा इत्यमरोक्तेः। अतएव गृह्यासंग्रहे एतदेव सूत्रं व्याख्यातम्।

"नग्निकान्तु वदेत् कन्यां यावन्नर्तुमती भवेत्।
ऋतुमती त्वनग्निका तां प्रयच्छेत्तु नग्निकाम्॥
अप्राप्ता रजसो गौरी प्राप्ते रजसि रोहिणी।
अव्यञ्जिता भवेत् कन्या कुचहीना च नग्निका॥
व्यञ्जनैस्तु समुत्पन्नैः सोमो भुञ्जीत कन्यकां।
पयोधरैस्तु गन्धर्वा रजस्यग्निः प्रकीर्तितः॥
तस्मादव्यञ्जनोपेतामरजामपयोधराम्
अभुक्ताञ्चैव सोमाद्यैः कन्यकान्तु प्रशस्यते॥"

ईदृशीं कन्यामभिप्रेत्य आचार्यपुत्रेण प्रशंसा क्रियते इत्यर्थः। तस्माद् ऋतुमतीविवाहः खल्वप्रशस्तः इत्येवावगच्छामः। अन्यथा गोभिलसूत्रे श्रेष्ठेति पदं व्यर्थं भवेदिति, यदपेक्ष्य श्रेष्ठत्वं वर्णनीयं तथाविधव्यक्तेरभावात्। तथाच ऋतुमतीविवाहस्याप्रशस्तत्वेऽपि सामान्योद्वाहविधिविषयतया सिद्धत्वेन संस्कारजनकत्वमव्याहतमेवेति। यथा देवकृत्यादीनां पूर्वाह्लादिरूपप्रशस्तकालालाभेऽप्रशस्तकालमादायापि सामान्यविधिविधेयतया कर्मानुष्ठीयते, अर्थादप्रशस्तकल्पेऽपि सामान्यविधिविषयत्वं सर्ववादिसिद्धम्। तद्वदत्रापीति भावः।

अथैवं–"पितुर्गेहे च या नारी रजः पश्यत्यसंस्कृता।
ब्रह्महत्या पितुस्तस्या सा कन्या वृषली स्मृता॥
यस्तु तां वरयेत् कन्यां ब्राह्मणो मदमोहितः।
अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिम्॥

अनयोर्निन्दाश्रुतेः। नञ्पदघटितविधेरवश्यकल्पनीयत्वेन, तस्य च नञः प्रसज्यप्रतिषेधपरत्वस्यैव सिद्धान्तितत्वात् ऋतुमतीं नोद्वहेदिति विधिना आस्तिकपुरुषस्य निवृत्तिरेवायाति, निषेधवाक्यस्य निवर्त्तनाशक्तेः। सत्यं गुणवद्वरलाभे कन्याया अपि विवाहाभिलाषसत्त्वे आलस्यानवधानादिना कन्यादानाभावे पित्रादेर्दोषः। तथाच वशिष्ठः। यावत्तु कन्यामृतवः स्पृशन्ति तुल्यैः सकामामपि याच्यमानाम्। तावन्ति भूतानि हतानि ताभ्यां मातापितृभ्यामितिधर्मवादः। इति। एवमन्यान्यपि वचनानि उक्तरूपेण समाधेयानि। गुणवद्वरालाभे कुमारीणां विवाहपराङमुखत्वे वा रजोयोगस्तावत् कस्यापि न दोषाय। एवं सञ्जातार्त्तवायाः कन्याया विवाहस्य शास्त्रीयत्वे स्फुटमेव मानवधर्मशास्त्रं प्रमाणीक्रियते। यथा मनुः—त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती। ऊर्द्ध्वन्तुकालादेतस्मात् विन्देत सदृशं पतिम्॥ मनुना पूर्वं गुणवद्वरालाभे मरणकालपर्यन्तं सञ्जातार्त्तवाकन्या पितृगृहे तिष्ठेदित्युक्तम्, तथाविधपात्रसद्भावे आलस्यानवधानादिना पित्रादिभिरदीयमानायाः कन्यायाः कर्तव्यमिदानीमभिधीयते, इत्याह 'त्रीणीति'। अस्यार्थः, पित्रादिभिर्गुणवद्वरायादीयमाना कन्या सञ्जातार्त्तवा सती त्रीणि वर्षाणि प्रतीक्षेत, विवाहाय वर्षत्रयप्रतीक्षणं कुर्यादित्यर्थः। एतस्मात् वर्षत्रयादूर्ध्वं परतः उत्कृष्टवरालाभेऽपि सदृशं जात्या गुणेन च समानं पतिं विन्देत पतित्वेन स्वयं वृणुयात्। स्वयं वरणपक्षे तु कन्यावरयोर्न पापभागिता। तथाच मनुः, "अदीयमाना भर्तारमधिगच्छेद्यदि स्वयं। नैनः किञ्चिदवाप्नोति न च यं साधिगच्छति"॥ इति। नैनः किञ्चिदिति कन्याया दोषाभावः। न च यमिति वरस्य दोषाभावो दर्शितः। तस्मादृतुमतीविवाहो न निषिद्धो नापि पर्युदस्त इति सिद्धम्। किन्तु पुरुषान्तरोपभुक्तत्वसंशयाल्लोकविद्विष्ट एव। अतएव पुराणभारतादौ वह्वीनामृतुमतीनां परिणयस्तद् गर्भजातस्य महर्षित्वं राजर्षित्वं च श्रूयते इति। वस्तुतस्तु ऋतुमती-विवाहस्याप्रशस्ततया वैधविषयकत्वेन च ऋतुमती-विवाहनिन्दा अप्रसक्तविषयैव कल्प्यते। ततश्च नह्यप्रसक्तस्य निन्दा निन्दितुं प्रवर्त्तते, किन्तु इतरां-स्तौतुमिति न्यायेन नग्निकायाः कन्याया विवाहप्राशस्त्यं बोधयत्यप्रसक्तनिन्दा, अतएव व्यस्ततिथिनिन्दा युग्मतिथिप्रशंसार्था। एवं मध्याह्ने जनपीडनक्षयकरी संग्रामघोरावहा इत्यादि निन्दापि "कृष्णपक्षेऽपराह्णेतु रोहिणन्तु न लङ्घयेत्" इतिवदप्राशस्त्यपरा, इत्युक्तं स्मार्तपादैः इत्यलं पल्लवितेन।

# गोत्राध्यायः

इह खलु सुविदितमिदमत्रभवतां यत् समानगोत्रा समानप्रवरा वा कन्या नोद्वाहे्ति। तत्र गोत्रं नाम वंशः कुलं सन्ततिरित्यपि नार्थान्तरम्। यस्मादृषेः प्रभृति सन्ततिरादौ व्यभिद्यत स गोत्रर्षि-रित्याख्यायते। माधवाचार्यप्रभृतिभिः वंशप्रवर्तकस्यादिपुरुषस्य गोत्रत्वमभिहितम्।

वंशपरम्पराप्रसिद्धमादिपुरुषब्राह्मणरूपं गोत्रमित्यनेन सन्दर्भेन स्मार्तपादानामप्येष स्वरसोऽवगम्यते। वंशप्रवर्तकत्वञ्च कश्यपस्यादौ श्रुतिराह। यथा श्रुतिः, "सर्वाः काश्यप्यः प्रजाः" इति। प्रसिद्धञ्च पुराणादिषु कश्यपस्यादिपुरुषत्वम्। स्मृतावपि दृश्यते गोत्रस्य त्वपरिज्ञाने काश्यपं गोत्रमुच्यते इति।

महाभारते च, 'मूलगोत्राणि चत्वारि समुत्पन्नानि पार्थिव। अङ्गिराः कश्यपाश्चैव वशिष्ठो-भृगुरेव च'॥ इति। अनेन च कश्यपातिरिक्ता अङ्गिरोवशिष्ठभृगवस्त्रयः प्राप्ताः।

बौधायने च जमदग्निर्भरद्वाजोविश्वामित्रोऽथ गौतमः। अत्रिर्वशिष्ठःकश्यपः, इत्येते सप्तर्षयः। सप्तानामृषीनामगस्त्याष्टमानां यदपत्यन्तद्गोत्रमित्याचक्षते इति। परिलक्ष्यतेऽत्र भारतोक्तयोः कश्यपवशिष्ठयोः सद्भावः। वंशब्राह्मणानुशीलनाच्च प्रतीयते यद्भृगुरित्यत्र तदपत्यं जमदग्निः अङ्गिरसः स्थाने च तदपत्ये गौतमभरद्वाजौ। आपस्तम्बश्रौतसूत्रे च भृगुमुनेर्नामतोऽनु-ल्लेखेऽपि भृगूनामेवाग्रे व्याख्यास्याम इत्यादिभिर्वंशग्रन्थे भृगूनामेव प्राधान्यं ख्यापयन्ति सूत्रकाराः। तदनुसृत्यैव भगवद्गीतासु श्रीभगवता "महर्षीणां भृगुरह"मिति। आधानमन्त्रेष्वपि भृगूनामेवादौ मन्त्रकथनात्तत्प्राधान्यं युक्तमिति सम्भावयामः। एतावताऽष्टौ गोत्रप्रवर्तका ऋषयो लब्धाः। यच्चा-ग्निपुराणे गोत्रकृतां चतुर्विंशतिर्धनञ्जयकृतधर्मप्रदीपे च अष्टात्रिंशनामान्युपलभ्यन्ते, लोके यद-गस्त्याष्टमसप्तर्ष्यन्यतमापत्यव्यतिरिक्तेष्वपि गोत्रत्वव्यवहारो दृश्यते, यच्च बोधायनेनैवोत्तरग्रन्थे गोत्राणाञ्च सहस्राणि प्रयुतान्यर्वुदानि च इत्याद्युक्तम्, अत्रोच्यते। गोत्रीयविभिन्नसंख्यावाचकपद-समव्याहृतानामेषामार्षप्रमाणत्वात् संख्यावाचकपदानामसति वाधके न्यूनाधिकसंख्याव्यवच्छेदकत्व-नियमस्य नात्रावसरः। तत् सिद्धं गोत्रं वंशपरम्पराप्रसिद्धमादिपुरुषरूपम्। विज्ञानेश्वर-माधव-मदनपारिजातकृतामप्यत्र सम्मतिः। अतएव यत्राभियुक्तानां गोत्रत्वप्रसिद्धिस्तद् गोत्रमित्येव गोत्रलक्षणमिति संस्काररत्नमालायां भट्टगोपीनाथः। अथ वंशपरम्पराप्रसिद्धादिपुरुषस्य गोत्रत्वे जमदग्निर्भरद्वाजो विश्वामित्रात्रिगौतमा इत्याद्यभिधाय एतेषां यान्यपत्यानि तानि गोत्राणि मन्वते, इत्यनेन सप्तानामृषीणामगस्त्याष्टमानां यदपत्यं तद्गोत्रमित्यनेन च विरोधः, तथाहि पूर्वं जमदग्निप्रभृतीनां गोत्रत्वं निर्णीतमधुना तु प्रदर्शितवचनाभ्यां तदपत्यानामिति। अत्र विरोधे स्मार्तपादैरुद्वाहतत्त्वे समाहितं यदेतेषामेव गोत्रत्वमपत्येषु गोत्रपदं लाक्षणिकम्। अतएव व्याख्यातं तैरेव गोत्राणि तत्तन्नामकगोत्रभागिनीति। मित्रमिश्रस्तावदत्र विरोधे अन्यथा समादधे।

यथा अनादौ हि संसारे जमदग्नेरपि पूर्वपूर्वजमदग्न्यपत्यत्वमिति। एवं समाधानमपि युक्त-मेव। अतएव वंशब्राह्मणे भृगोरपत्यं जमदग्निरित्युक्तम्। समुद्दिष्टोयमत्र गोत्रगणनाया विभिन्नक्रमः, "सर्वाः काश्यपः प्रजाः" इत्यत आरभ्य गोत्रानान्तु सहस्राणि इत्यन्तैः क्रमोपचीयमाना जाताः गोत्रसंख्यानां परिणतिः सुस्पष्टञ्च ईदृशपरिवृत्तिपरिवृद्धयोः कारणं भारतीये शान्तिपर्वणि, कर्मतोऽन्यानि गोत्राणि समुत्पन्नानि पार्थिव नामधेयानि तपसा तानि च ग्रहणं सतामित्यनेन कर्म-द्वारा विविधगोत्राणामुत्पत्तेः प्रतिपादनात् गोत्रेति नामधेयानाञ्च कर्मत एव जातत्वात्—"गोत्रकारिणः" इत्यस्य गोत्रेष्टिकारिणः इत्येवं व्याख्यातॄणां पूज्यपादाध्यापकानां व्याख्यानमपि प्रमाणगम्यमिति प्रशंसयामः। वंशप्रवर्तकत्वेनैव न केवलं गोत्रत्वम्, अपितु मन्त्रद्रष्टृत्वेनापि। अतएव गोत्रप्रवरमञ्जरी-कृता पुरुषोत्तमेन अगस्त्याष्टमसप्तर्षीनां मध्ये यस्यापत्यमृषित्वं प्राप्तं तत्तस्य गोत्रमुच्यते इत्युक्तम्।

गोत्रप्रवरदर्पणकृतः कमलाकरस्य च तेषां यत् पुत्रपौत्राद्यपत्यं ऋषिभूतं पूर्वभागिनामुत्तरभागिनाञ्च गोत्रमित्यभिधीयते इत्यभिधानञ्च समीचीनमिति प्रतिभाति।

सम्प्रति पुरुषोत्तमीयगोत्र प्रवरमञ्जरीनामधेयसंग्रहतः संगृह्य संक्षेपेण किञ्चिदुच्यते। यथा प्रवरोनाम प्रकर्षेण वरणं प्रार्थनमग्नेः—यजमानः पूर्वपुरुषान् ऋषीन् सङ्कीर्त्त्य दर्शपौर्णमासादिक्रतुषु प्रसिद्धं। ऋषिनामसंकीर्त्तनसम्बन्धाच्च ऋषयोऽपि गोत्रर्षिवंशएव पूर्वं जाताः प्रवराः प्रवरऋषयः. एवमुच्यन्ते। ईदृशगोत्रप्रवरसमानतामाश्रित्य च स्मृतिषु समानगोत्रायाः समानप्रवरायाश्चकन्याया विवाहो निषिध्यते।

तत्र विप्राणामष्टादशैव संख्याः परस्परं विवाहार्हा वेदितव्याः। तथाहि द्विजातयः किल सर्वे आदिवृक्षरूपस्य ब्रह्मणः शाखोपशाखारूपाः। यथा पुरा खलु ब्रह्मणश्चत्वारस्तनया प्रादुरभवन् भृगुः, अङ्गिराः, मरिचिरत्रिरिति, एतेषामेव चतुर्णां सन्ततयः भूताः भवन्तोभविष्यन्तश्च द्विजातयः तदनु भृगुकुले जमदग्निरजनि अङ्गिरसोगोतमभरद्वाजौ। मरिचेः कश्यपवशिष्ठागस्त्याः, अत्रेश्च विश्वामित्रास्तएते वक्ष्यमानेभ्यः केवल उपपदेभ्योऽन्येषां ब्राह्मणानां सन्ताननिदानभूताः जमदग्निगौतमभरद्वाजकश्यपवशिष्ठागस्त्यविश्वामित्राः अत्रयष्टमाः गोत्रकाराः।

# प्रवराध्यायः

ऋष्यार्षेयपदवाच्या मन्त्रद्रष्टारो हि प्रवरशब्देनाभिधीयन्ते। असमानार्षगोत्रजामिति याज्ञवल्क्यवचनव्याख्यानावसरे ऋषेरिदमार्षं प्रवर इत्याह विज्ञानेश्वरः। प्रवरो गोत्रप्रवर्तकस्य मुनेर्व्यावर्तको मुनिगण इति माधवाचार्यः। अत्र प्रवराणां गोत्रव्यावर्तकत्वकथनात् सत्याषाढसूत्रे "प्रवरान् व्याख्यास्याम" इत्युक्त्वा तैर्गोत्राणीति वचनाच्च सिद्धान्तितं कैश्चित् यद्गोत्रज्ञाने प्रवराणां हेतुत्वोक्त्या प्रवरत्वमेव गोत्रलक्षणं भवतीति वीरमित्रोदये। अतएव चोद्धृतं मतमेतत् भट्टोजिदीक्षितेन चतुर्विंशतिमतसंग्रहे "यमधिकृत्य प्रवराम्नानं तद् गोत्र"मिति।

अवान्तरभेदेन सहस्रशो भिन्नेष्वपि गोत्रेषु उक्तं श्रीधराचार्येन मुनिप्रणीतप्रवरैरूनपञ्चाशता-वयं अनन्तान्यपि गोत्राणि वर्गीकृत्याभिदध्महे इति। परिगणिताश्चेथ्थं ते गोत्रगणा वौधायनेन "सप्तोऽभृगवः, सप्तदशाङ्गिरस एवच। ततोऽत्रयश्च चत्वारो बोद्धव्याः कश्यपास्त्रयः। चत्वारोऽत्र वशिष्ठाः स्युः। विश्वामित्रात्ततो दश। अगस्त्यास्तु चत्वार इति संग्रहकृद्वचः।

गोत्रज्ञानमिव प्रवरज्ञानमप्यावश्यकम्। उक्तञ्च शातातपेन, ज्ञातव्याः प्रवराः ब्रह्मसायुज्यश्रुतितोऽन्यथा। गुरुतल्पमहादोषश्चाण्डालोत्पत्तिशङ्कया इति। तत्र सत्याषाढे सांख्यायनापस्तम्बभरद्वाजादयः सूत्रकाराः—आर्षेयान् ऋत्विजो वृणीत इति। ये तावत् स्वकुलोत्पन्नान् ऋषीन् मन्त्रदृशो जानन्ति स्मरन्ति ते एवार्षेयाः। एतेनैतदुक्तं भवति यद्विना प्रवरज्ञानं नास्ति कस्याप्यार्त्तिज्येऽधिकारः। इति। अज्ञातप्रवराणामनर्थापातञ्चाह आपस्तम्वः श्रौतसूत्रे, यो वा अन्यः अन्यस्यार्षेयान् वृणीते स वा अस्य तदृषिरिष्टं वृणुते इति विज्ञायते।

प्रथमतो यज्ञेषु यजमानस्य स्वकीयानामृषीणां नामान्युच्चारयितव्यानि। अत्रार्षेयकीर्तनकर्तव्यतायां श्रुतिश्च आपस्तम्बश्रौतसूत्रे आर्षेयमन्वाचष्ट ऋषिणा हि देवाः पुरुषमनुबुध्यन्त इति यस्मात् ऋषिणा मदीयपूर्वपुरुषेण मन्त्रद्रष्ट्रा कीर्तितेन सता तदपत्यं पुरुषं मां दैवाः अनुबुध्यन्ते भोज्यान्नोऽहं तदपत्यत्वादिति जानन्त्यतएवार्षेयोच्चारः कर्तव्यः।

अधुना प्रवरशब्दार्थो विशद्यते। प्रवरो नाम प्रकर्षेण वरणं प्रार्थनमग्नेः।

ऋषिणां नामभिरग्निरेव प्रवरीतव्यो न कश्चिदृत्विग् विशेषो न वा तत्वन्नामसंज्ञितामत्र दृशः। अथार्षेयं वृणीत ऋषिभ्यश्चैवैनमेतत् देवेभ्यश्च निवेदयत्ययं महावीर्यो यो यज्ञं प्रापदिति वाजसनेयिब्राह्मणम्। आर्षेयोच्चारणे ऋषीणामग्निविशेषणत्वमेव विशदीचकार। मञ्जरीकृता च व्याख्यातमेतदित्थं वीरमित्रोदये, आर्षमृषेरपत्यमाहवनीयमग्निं यजमानेनोत्पादितत्वाद् यजमानस्य ऋषिसन्तानत्वादग्नेरार्षेयत्वं तं वृणीते प्रार्थयते। कथमित्याशङ्क्य प्रयोजनमाह अयमग्नि ऋर्षिभ्योदेवेभ्यश्च निवेदयतीति। तथा दर्शपूर्णमासयोः प्रवरविधिपरं तैत्तिरीयब्राह्मणमपि "वृणीध्वं हव्यवाहनम्" इतिश्रुतेरेवमेवार्थमाह।

यज्ञेषु प्रवरणम्। कीदृशाश्च ऋषयस्ते वरणीयाः इत्यत्र श्रुतिराह "मन्त्रकृतोवृणीत" इति। अवगतमिदानीमेतद् यत् प्रवरोच्चारे केवलं मन्त्रदृशामेव नामान्युच्चारणीयानीति। इत्थञ्च प्राप्तमृषीणां प्रवरेत्यभिनवं नाम। प्रवरान् व्याख्यास्याम इत्यापस्तम्बसूत्रस्य व्याख्याने प्रव्रियन्ते अग्नेर्विशेषणत्वेनोत्कीर्त्यन्ते इति प्रवराः, निरुक्ता गोपीनाथेन। साम्प्रतमुपलब्धं गोत्रप्रवयोरन्तरं गोत्रप्रवर्तकास्तावदस्मत्पूर्वजाः श्रुतशीलसम्पन्नाः केचिन्महात्मानः प्रवराः पुनरीदृशाः केचिदस्मद्वंशीयाः शब्दब्रह्ममयो वेदो हि येषां परिपूतेषु अन्तः स्वयमाविरासीत्।

कात्यायनश्रौतसूत्रे च "यावन्तो वा मन्त्रकृतः स्यु स्तावतो वृणीत" इतिश्रुते र्यस्य कुले यावन्तः पुरासन् मन्त्रदृशः सः यज्ञेषु सर्वेषामेव तेषां नामान्युच्चारयति। आपस्तम्बेन च बहूनामनियमेन वरणप्राप्तौ एकं वृणीते द्वौ वृणीते त्रीण् वृणीते न चतुरो वृणीते इत्यनेन संख्यानियमविधयः प्रदर्शिताः। चतुर्भ्रः प्रभृति षडादीनामत्र वरणप्रतिषेधो लक्ष्यते त्रीण् वृणीते यर्थाषमन्त्रकृतो वृणीत, इत्यापस्तम्बोक्तं श्रुत्यन्तरमनुसृत्यैव प्रवृत्तं मीमांसकानामत्रार्षेयस्य हानं स्यादिति सूत्रव्याख्यानावसरे भट्टदीपिकायां सर्वमिदं स्फुटीकृतं खण्डदेवेन, त्रीण् वृणीते इत्येवविधिः एकमित्याद्यनुवादः, अन्यथा सर्वेषां वाक्यानां विधित्वे वाक्यभेदापत्तिः स्यादिति। अत्र प्रवराणां संख्यानियमे मूलमस्माभिर्निर्णेतुं यद्यप्यशक्यं तथापि किञ्चिदनुमीयते यत् यज्ञे प्राधान्येन दक्षिणावहनीयगार्हपत्यानां त्रयाणामेवाग्नीनामुपलम्भात्त्रयाणामेव ऋषीणां कीर्तनमत्र प्रवृत्तम्। यच्च पञ्चानामपि वरणं कुत्रापि सूत्रितमास्ते तत् पुनः सत्यावसत्यसंज्ञयोरग्निविशेषयोः संग्रहेनैव सुसमञ्जसमिति। यज्ञेषु अतिपञ्चानामृषीणामनुपयोगादेव न पञ्चातिवृणीतेति श्रुतौ निषेधः।

इतः प्रभृति नैकसन्तानसम्भूताः परस्परं विवाहमर्हन्ति। अधुना च एकसन्ततिजातयोरपि ययोरन्वयौ निर्वृत्तपरस्परविवाहौ दृष्टौ तयोरन्वयोस्तु परस्परविवाहो नैव दूष्यति इत्यनुशासनमेतदाविरास। यत्समानगोत्रप्रवरकस्यानिषेध इत्यभिधीयते।

तथाच दृश्यते आङ्गिरसः सूतयोरपि गौतमभरद्वाजयोरन्वयौ परस्परं विवाहार्हौ।

अत्रिविश्वामित्रयोरपि अन्वयौ अन्योन्यमुद्वाहृाविति। अथ खल्वेतेषामष्टानां गोत्रकाराणां सन्ततिवहिर्भूता अपि केचिद्ब्राह्मणा उपलभ्यन्ते। तेषाञ्च मूलपुरुषाः केचित् क्षत्रजन्मानो गुणप्रभावादिभि र्विश्वामित्रवदधिगतब्राह्मणभावाः, इयांस्तु विशेषो यत् क्षत्रजन्मापि विश्वामित्रः समधिगतब्राह्मण्यः प्रभावातिरेकेण पक्षमेकं प्रवर्तयन् गोत्रकाराभिधामापेदे। इतरेत्विमे क्षत्रजन्मानोऽधिगतब्राह्मण्या अपि भृगोरङ्गिरसो वा यथायथं पक्षमशिश्रयन् इति। तेषु ये भृगोः पक्षमाश्रितास्ते केवलभार्गवा इत्याख्यायन्ते। अङ्गिरसः पक्षमाश्रिताश्चाङ्गिरसा इति। अतश्च तेषां प्रवरेषु भृगुरङ्गिरा वा निविष्टो दृश्यते। तदेतेषां केवलोपपदानां भृगुप्रवरत्वं वा नोत्पत्तिकं इति इतरैर्भृगुप्रवरैरङ्गिरः प्रवरै श्चोद्वाहार्हता निरावाधा। स्वस्वगणे तु नैवान्योऽन्यं विवाहयोग्यत्वं स्वरसतः एकसन्तानान्तःपातित्वात्।

तत्र केवलभार्गवाश्चत्वारः

केवलाङ्गिरसश्च षट् इति। दशसु केवलोपपदेषु पार्थभिन्नानां नवानामपि भृग्वङ्गिरसोरण्यतरस्य पक्षपरिग्रहमितिहासै निदर्शयामः। पार्थे तु केवलभार्गवसमाख्याप्रमुखैर्लिङ्गैस्तं सम्भावयामः। तत्र वीतहव्यो वैदेहापरनाम्नो जनकस्य सन्ततिर्जातः। ब्रह्मर्षिरभवत् महाभारते आनुशासनिके पर्वणि त्रिंशदध्याये विज्ञायते "तमुवाच कृपाविष्टो भृगुर्धर्मभृतांवरः।

नेहास्ति क्षत्रियः कश्चित्सर्वेहोमे द्विजातयः॥

एतत्तु वचनं श्रुत्वा भृगोस्तथ्यं प्रदर्द्दनः। पादावुपःस्पृश्य शनैः प्रहृष्टो वाक्यमब्रवीत्॥ एवममप्यस्मि भगवन् कृतकृत्यो न संशयः। य एषराजा वीर्येण स्वजातिः त्याजितो मया॥ भृगोर्वचनमात्रेण स च ब्रह्मर्षितां गतः वीतहव्यो महाराज प्रत्यवादि त्वमेवच॥ इति।

तथा पुरूरवः सन्ततिजः शुनकः दुष्मन्तसन्ततिभवा मित्रयुः मुग्दहकन्वाश्च ब्रह्मर्षितामवापुरिति हरिवंशे एकोनत्रिंशद्द्वात्रिंशदध्याययोः प्रत्यपादि। तथैवच विष्णुवृद्ध हरित रथीतरा ब्रह्मर्षिभावमन्वभूवन्निति विष्णुपुराणादौ प्रतीयते, आष्टिषेणो यद्यपि केवलभार्गवेषु क्वचित् पठ्यते, तथाऽपि प्रवरनिर्णयादिनिबन्धेषु जामदग्नेय्ष्वेव स गण्यत इति तमेव पक्षं साधीयांसं रोचयामहे, कथमन्यथा जामदग्नौर्वत्सादिभिः येषामनुद्वाहः, तत् सिद्धं विप्रानामष्टादशैव संख्याः परस्परं विवाहार्हा इति।

कल्पसूत्रकारास्तु केवलोपपदानां इतरैर्भृगुभिराङ्गिरसैश्च विवाहकारणं भङ्ग्यन्तरेण कथयन्ति, तद्यथा—

एक एव ऋषिर्यावित् प्रवरेष्वनुवर्त्तते। तावत् समानगोत्रत्वमन्यत्र भृग्वङ्गिरसां गणात्॥ त्र्यार्षेयानां द्व्यार्षेयसाम्ये अविवाहः पञ्चार्षेयानां त्र्यार्षेयानां त्र्यार्षेयसाम्येऽविवाहः॥ इति।

वस्तुतस्तु क्वचिदेकर्षिसाम्येऽपि समानप्रवरा अन्यत्र द्व्यार्षेयादिसाम्ये सत्येवेति वैलक्षण्यकल्पनं सूत्रकृतां प्रागुपदर्शितविशेषानुसन्धानमूलकमेवेति सुधियो विदांकुर्वन्तु।

प्रवरान् व्याख्यास्यामः। सर्वेषां ब्राह्मणानां वक्ष्यमाणागस्त्याष्टममहर्षिवंशपरम्पराशाखोपशाखासहस्रप्रयुतार्वुदानेकगोत्राणां आहिताग्नीनां सतां प्रतिपुरुषमाहवनीयस्याग्नेर्हव्यवाहनाम्नः सप्तर्षीणामगस्त्याष्टमानामपत्यसम्बन्धेन तत्सादृश्यसम्बन्धेन वा प्रकर्षेण वरणानि प्रार्थनानि प्रवराः। तेच होतुरध्वर्य्योश्च विहिताः। होतुस्तावद्यथा वत्सानां भार्गवच्यवनाप्नवानौर्वजामदग्न्येति पञ्चार्षेयप्रवरे पञ्चभिर्म्मन्त्रदृगभिर्द्देवप्रसिद्धैः—आहवनीयोऽग्निः सम्बोध्यते। तथासम्बोधिताग्निर्द्देवेभ्यो हव्यं वक्ष्यति नान्यथा इति कृत्वा तमग्निं होता वृणीते प्रार्थयते। तथा तैरेव मन्त्रदृग्भिः पञ्चभिस्तद्विपर्य्ययक्रमेणागस्त्याष्टमसप्तर्ष्यपत्यक्रमेण सादृश्यसम्बन्धेन तमेवाहवनीयमग्निमध्वर्युर्वृणीते प्रार्थयते यथा जमदग्निवत् और्ववत् अप्नवानवत् च्यवनवत् भृगुवर्दिति। अस्यायमर्थः—यथा जमदग्न्यादयो योग्यतया भोज्यान्नतया च देवैर्ज्ञातत्वात् देवानुद्दिश्य त्वयि हविः प्रक्षेपयोग्यं स्तथायमपि यजमानः वत्सस्तदपत्यत्वात् तवोत्पादकत्वेन पितृस्थानीयत्वाच्च त्वयि हविः प्रक्षेपयोग्यः एवेत्याह। अध्वर्युप्रवरेपि स एवाहनीयोऽग्निः प्रव्रियते प्रार्थ्यते। इदमेव च प्रवरपदव्याख्यानं अग्निप्रकाशनार्थसामिधेनीमन्त्रलिङ्गानि प्रवरविधायकब्राह्मणानि च दर्शयन्ति।

तथाहि सामिधेनीमन्त्रेषु "अग्निं दूतं वृणीमहे" "वृणीध्वं हव्यवाहनं" इत्यादीनि मन्त्रलिङ्गान्याहवनीयस्याग्नेः प्रवरकर्मतां दर्शयन्ति द्वितीयानिर्द्देशात्। तथा वृणीध्वं हव्यावाहनम्। इत्यस्यैव मन्त्रस्य व्याख्यानपरं—तैत्तिरीयाणां दर्शपौर्णमासयोः प्रवरविधिपरं ब्राह्मणमेतमेवार्थं स्पष्टीकरोति— "त्रयोवा अग्नयो हव्यवाहनो देवानां, कव्यवाहनः पितृणां, सहरक्षा असुराणां तत्र एतयाहुआशंसन्ते मां वरिष्यते मामिति वृणीध्वं हव्यवाहनमित्याह य एव देवानां तं वृणीत आर्षेयं वृणीते बन्धोरेव नौत्यथोसन्तत्यै इति। अत्रापि हव्यवाहनं तं आर्षेयं इति च तत्र तत्र द्वितीयानिर्द्देशाद् अग्नेरिव वरितव्यतां प्रतीमः, तथा वाजसनेयिनां प्रवर-विधिपरं ब्राह्मणमेतमेवार्थं प्रतिभासयति। अथार्षेयं प्रवृणीत ऋषिभ्यश्चैवैनमेतद्देवेभ्यश्च निवेदयत्ययं महावीर्यो यो यज्ञं प्रापदिति, तस्मादार्षेयं प्रवृणीते' इत्यादि ऽध्वर्युप्रवरविधिपरमिदं ब्राह्मणम्। अस्यायमर्थः आर्षेयः ऋष्यपत्यमाहवनीयोऽग्निः यजमानेनोतपातिदत्वात् यजमानस्य ऋषिसन्तानत्वात् तं वृणीते। किमर्थमित्याशङ्क्य प्रयोजनमाह. ऋषिभ्यश्चैवैनं यजमानं देवेभ्यश्च निवेदयत्ययं महावीर्यो यो यज्ञं प्रापदिति। यस्मादेवं प्रयोजनवान् प्रवरः, तस्मादार्षेयं वृणीते इति। तस्मात् होतृप्रवरैरध्वर्युप्रवरैश्च तेषां—मन्त्रदृशामपत्यसम्बन्धेन सादृश्यसम्बन्धेन च अग्निरेवाहवनीयः प्रार्थयते। तस्य प्रकर्षेण प्रार्थनानि

तैस्तैर्मन्त्रदृग्भिः एकद्वित्रिपञ्चसंख्यकैः विशिष्टानि एकार्षेयाः द्व्यार्षेयाः त्र्यार्षेयाः पञ्च आर्षेयाः प्रवरा इत्युच्यन्ते। न पुनः ऋषीणामेव मन्त्रदृशां प्रवराणि प्रवरा इति। नन्वेतस्मिन् प्रवरपद-व्याख्याने सति वहूनि सूत्राणि विरुध्यन्ते। कथं ?—तथाहि सर्वे सूत्रकारा वक्ष्यन्ति "इत ऊर्द्धान् अध्वर्युर्वृणीते अमूतोर्वाचो होता वृणीते" इति। अतएव मन्त्रदृशामेवैकद्वित्रिपञ्चसंख्यकानां ऋषीणां वरणकर्मता प्रतीयते, तेषां द्वितीयान्तपदनिर्दिष्टत्वान्न अग्नेराहवनीयस्य। तथा-ऊर्द्धमासीनं होतारं वृणीते" "अग्निर्देवानां होता देवानयक्षदित्यत्रापि होतुरेव वरणकर्मता प्रतीयते नाग्नेः।—तत्र कथमविरोध इति।" अत्रोच्यते सर्वे हि सूत्रकाराः—"इतऊर्द्धान्" इत्यादि सूत्र-मुक्त्वा अनन्तरं होतुरध्वर्योश्च प्रवरान् आहुः—भार्गवच्यवनाप्नवानौर्वजामदग्न्येति होता वृणीते यमदग्निवत् और्ववत् आप्नवानवत् च्यवनवत् भृगुवत् इत्यध्वर्यु इति।

नह्यत्र ऋषीणां वरणकर्मताऽवगम्यते तेषां तद्धितेन निर्देशात्। अध्वर्युप्रवरे च तद्वदिति वतिप्रयोगाच्च। तस्मात्तत्राप्यग्नेरेव वरणकर्मता वक्तव्येति—सर्वविरोधभञ्जनाय एवं व्याचक्ष्महे, इत ऊर्द्धान् अध्वर्युर्वृणीते। इतो यजमानात् ऊर्द्धान् ऋषीन् संकीर्त्त्य तद्वत्तद्वदिति तत्सादृश्य सम्बन्धेनाहवनीयं वृणीते इत्यर्थः। तथा अयुतोर्वाचो होता इत्यत्रापि तान् एव संकीर्त्त्य तदपत्य-सम्बन्धेन होता आहवनीयमिति उभयत्राग्निरध्याहर्त्तव्यः। "ऊर्द्धमासीनं होतारं" इत्यत्रापि होतृ-शब्देनाहवनीयाग्निरभिप्रेतः। कथ मग्निर्द्देवो होता देवानयक्षत् इत्यादिवाक्यशेषात्। अग्निर्द्देवो होतेति य एव देवानां तमवृणीत ततोदेवा अभवन् इतिच ब्राह्मणमपि होतृशब्देन आहवनीय मेवोक्तं दर्शयति। तस्मादयथोक्तएव प्रवरपदार्थः। वौधायनीयप्रवराध्यायसूत्रं—

अथात ऊर्द्धान् अध्वर्यु र्वृणीते अमुतोऽर्व्वाचो होतेत्येष एव उभयोः सर्वत्रोद्देश :।

अथ प्रवरकर्त्तव्यतोपदेशानन्तरं अतः हेतो : यतो विज्ञाते क्रमविशेषे होतुरध्वर्योश्च वरणमग्नि-प्रार्थनं वहूनां मन्त्रदृशां वरणं कर्त्तुं शक्यते नाविज्ञाते अतः क्रमविशेष उच्यते—अतऊर्द्धमित्यादिना।

अयमर्थः, अतो यजमानादूर्द्धान् मन्त्रदृगभिरव्यवहितान् मूलभूतादृषेः क्रमेण सङ्कीर्त्त्य तद्वत्त-द्वदिति सादृश्यसम्बन्धेन आहवनीयं प्रवृणीते प्रार्थयते। यथा वत्सानां जमदग्निवत् और्ववत् आप्नवानवत् च्यवनवत् भृगुवत् इति। अमुतोर्वाचो होता, अमुतो मूलभूतादृषेरारभ्य अर्वाग्-भूतान् मन्त्रदृशः अध्वर्युप्रवरक्रमविपर्ययेन क्रमेण तदपत्यसम्बन्धेन वा प्रार्थयते तमेवाग्निं यथा। भार्गवच्यवनाप्नवान् और्वजामदग्न्येति। एवमुभाभ्यां प्रार्थितोऽग्निर्यजमानयोग्यतां ज्ञात्वा तदीयं हविर्द्देवेभ्यो दास्यति।

यथा—कर्माङ्गभूतानामृत्विजां वरणं तत्प्रार्थनं यजमानेन प्रार्थिताः सन्त कर्माङ्गानि-करिष्यन्ति इति, तथाहोतुरध्वर्योश्च वरणमग्निप्रार्थनं ताभ्यां प्रार्थितोऽग्निर्द्देवेभ्यो हव्यं वहतीति। एष एव प्रवरक्रमविशेषः।

अथेदानीं आपस्तम्बाद्युक्तप्रवराध्यायसूत्रकाण्डानामाद्यं परिभाषासूत्रकाण्डं उदाहरिष्यामः। प्रवरान् व्याख्यास्यामः। १। आर्षेयं वृणीते। बन्धोरेव नैत्यथोसन्तत्यै इति विज्ञायते। २। न देवै-र्नमनुष्यैरार्षेयं वृणीते ऋषिभिरेवार्षेयं वृणीत इति विज्ञायते। ३।

आर्षेयमन्वाचष्टे ऋषिण हि देवाः पुरुषमनुबुध्यन्ते इति विज्ञायते। ४। योवान्यः सन् अन्य-स्यार्षेयेण प्रवृणीते स वा अस्य तदृषिरिष्टं वीतं वृङ्क्ते इति विज्ञायते। ५।

त्रीन् वृणीते मन्त्रकृतो वृणीते यथर्षिमन्त्रकृतो वृणीते इति विज्ञायते। ६।

अथैकेषां एकं वृणीते द्वौ वृणीते त्रीन् वृणीते न चतुरो वृणीते न पञ्चातिवृणीते इति विज्ञायते । ८ । इत ऊर्द्धान् अध्वर्युर्वृणीते अमुतोऽर्वाचो होतेति विज्ञायते । ९ ।

अथेदानीं आपस्तम्बाद्युक्तसूत्रस्य भाष्यकारधूर्त्तस्वामिकपर्द्दिस्वामिगुरुदेवस्वामिप्रभृतीनां मतानुसारेण काण्डमिदं व्याख्यास्यामः ।

आर्षेयं ऋष्यपत्यसम्बन्धं आत्मनो वृणीते । अथवा आर्षेयं ऋषेरपत्यं, आहवनीयमग्निं यजमानेनोतपादितत्वात् यजमानस्य च्ऋषिसन्तानत्वात्, तं वृणीते प्रार्थयते तद्गोत्रतयेति एवं सति बन्धोरेवनैति । पूर्वर्षिसम्बन्धान्न च्यवते इत्यर्थः । अथ अपिच सन्तत्यै पूर्वेषामात्मनश्च सन्तानाय इति । २ । नदेवैः, प्राजापत्यादिभिरार्षेयं वृणीते । नवा मनुष्यैर्विद्वद्भिर्द्देवदत्तादिभि रार्षेयं वृणीते । ऋषिभिरेव वशिष्ठादिभि र्मन्त्रदृग्भि रार्षेयं वृणीत इति । ३ ।

आर्षेयमिति कस्मात् ऋषिणा पूर्वजनकीर्त्तितेन देवप्रसिद्धेन तदपत्यं पुरुषमनुबुध्यन्ते भोज्यान्नोयं तदपत्यत्वादिति जानन्ति हीति । ४ ।

यो वै यजमानोऽन्यगोत्रः सन् अथान्यगोत्रस्यार्षेयेण प्रवृणीते सः ऋषिरस्य यजमानस्य तदिष्टं यागफलं वीतं ब्राह्मणतर्पणादिफलं वृङ्क्ते गृह्णातीत्यर्थः । ९ ।

त्रीन् इति त्रीन् मन्त्रकृतो मन्त्रदृशो वृणीते मन्त्राणां करणाशक्तेः । यो यो यस्य यस्य मन्त्रस्यऋषिः यथर्षि मन्त्रदृशो वृणीते इति विज्ञायते श्रूयते शाखान्तरे । ६ ।

अथैकेषां शाखिनां श्रुतौ श्रूयन्ते एकमार्षेयं वृणीते एकमृषिं सङ्कीर्त्त्य तदपत्यमग्निं वृणीते । तथा द्वौ त्रीन् इत्यत्रापि । चतुरो न वृणीते । पञ्चातीत्य षडादीन् न वृणीते । अयमर्थः । आर्षेयवरणस्य मन्त्रदृक्त्वं विशेषणत्वेनोक्तं अधस्तात् । अतश्चात्मीयानां मन्त्रदृशां यथाष्टसंख्यकानामनियमेन वरणप्राप्तौ सत्यां न चतुर इत्यादिना चतुर्णामतिपञ्चानां च वरणप्रतिषेध इति वर्णयन्ति । तत्र आर्षेयं वृणीते इति विहिते वरणे एकमित्यादिसंख्या विदधाति वाक्यत्रयं अस्यां श्रुताविति कृत्वा कल्पसूत्रकाराः इमामेव श्रुतिमवलम्ब्य प्रवर्त्तन्ते ।

या तु पूर्वोदाहृता श्रुतिः—"त्रीन् वृणीते यथर्षिमन्त्रकृतो वृणीते इति" तत्र त्रीन् वृणीते इति एतावन्मात्रं विधिः । इतरेषां कश्चिदुपक्रमः कश्चिदवयुत्यानुवादः कश्चित् प्रतिषेध इति मत्वा एनामेवश्रुतिमवलम्ब्य न्यायविद्भिराचार्यैरधिकारलक्षणे षष्ठेऽध्याये त्र्यार्षेयस्यैवाधिकारो निरूपितः । त्र्यार्षेयस्य ह्रानं स्यादधिकारा"दित्यत्र । ७ ।

पुरोहितस्येति । पुर एनं क्षत्रियं अभिषिक्तं वैश्यं वा, नयतीति पुरोहितः । क्षत्रियवैश्ययोः दार्विहोमिकोऽभिजनविद्यावृत्तादिगुणसम्पन्नः । तस्य हि प्रवरेण राजाऽभिषिक्तः प्रवृणीते । दर्शपौर्णमासयोः अत्र च वचनाद् ब्राह्मणोपि राज्यं प्राप्तः पुरोहितप्रवरेण प्रवृणीत इति । ८ ।

---

This part under the name of Udvāhapariśiṣṭa is written by Śrī Kṛṣṇa Caraṇa whose Tattvabodhinī commentary is published here. It may be mentioned here that in a text named Vivāha-vādārthaḥ by Gadādhara Bhaṭṭāchārya, edited by me (in the Saṅskṛta Sāhitya Pariṣat Patrikā, Calcutta) most of the lines of this Pariśiṣṭa occur. It is therefore likely that Sri Kṛṣṇa Caraṇa had definitly before him the work of Gadhādhara.


# गणनाप्रकारः

महामहोपाध्याय-शूलपाणि-विरचित-सम्बन्ध-विवेके प्रतिभाषेयमिति कृत्वा वचनं यथा—


"अकारं पुरुषं कृत्वा तथोकारं स्त्रियं बुधः।
कृत्वा सव्यापसव्ये च गणयेद् वरकन्यके॥

सव्यापसव्ये गणयितुर्वामदक्षिणे।


(१) पितृसपिण्डः।





(२) मातृसपिण्डः।



(३) पितृबन्धुः।





(४) पितृबन्धुः।





*वन्धज्ञापकोयं सङ्केतः।

(५) पितृबन्धुः।




(६) मातृबन्धुः।




(७) मातृबन्धुः।

| | | | | |
|---|---|---|---|---|
| | अ | | | |
| | अ | | | अ |
| उ | अ | | अ | अ |
| उ | | | अ | अ |
| उ | अ | उ | अ | उ (अवि) |
| | उ | अ* | | उ (वि) |
| उ (त्रि. गो. वि) | | | उ (अवि) | |
| | अ (वरः) | अ | उ (वि) | |
| | | अ | | |
| | | अ | | |
| | | उ (अवि) | | |
| | | उ (वि) | | |

(८) मातृबन्धुः।

| | | | |
|---|---|---|---|
| | अ | | |
| | अ | | अ |
| उ | अ | | अ |
| उ | | | अ |
| | उ | अ | उ (अवि) |
| उ | उ | अ* | उ (वि) |
| उ (त्रि. गो. वि) | अ (वरः) | अ | |
| | | अ | |
| | | अ | |
| | | उ (अवि) | |
| | | उ (वि) | |

(९) पितृबन्धुसन्निपातः।





द्वित्वसंख्या ऊर्द्धे ज्ञेया अर्थात् ऊर्द्धतनजनज्ञापिका

*वन्ध्वभावे तद्योग्यताज्ञापकोयं सङ्केतः।

---

(१०) पितृबन्धुसन्निपातः।



(११) पितुर्मातुलपुत्ररूपपितृबन्धुसन्निपातः।

| | | | |
|---|---|---|---|
| | अ | | |
| | अ | | अ |
| अ | अ | | अ |
| अ | अ | | अ |
| अ | अ | | अ |
| अ | उ | २ अ | उ |
| उ | अ | ० उ | उ (अवि) |
| उ (अवि) | अ (वरः) | अ | उ (वि) |
| उ (वि) | | अ | |
| | | अ | |
| | | अ | |
| | | उ (अवि) | |
| | | उ (वि) | |

(१२) मातुर्मातृस्वसृसुतरूपमातृबन्धुसन्निपातः।

| | | | |
|---|---|---|---|
| | अ | | |
| | अ | | अ |
| अ | अ | | अ |
| अ | | | अ |
| अ | | | उ (अवि) |
| उ (अवि) | उ | २ उ | उ (वि) |
| उ (वि) | उ | ० उ | |
| | अ (वरः) | अ | उ |
| | | अ | उ |
| | | उ (अवि) | उ (त्रि.गो:वि) |
| | | उ (वि) | |

(१३) मातुः पितृस्वसृसुतरूपमातृबन्धुसन्निपातः ।

| | | | |
|---|---|---|---|
| | अ | | |
| | अ | | अ |
| अ | अ | | अ |
| अ | | | उ |
| अ | अ | २ उ | उ (अवि) |
| उ (अवि) | उ | ० उ | उ (वि) |
| उ (वि) | अ (वरः) | अ | |
| | | उ | |
| | | उ (अवि) | |
| | | उ (वि) | |

(१४) मातुर्मातुलपुत्ररूपमातृबन्धुसन्निपातः ।

| | | | |
|---|---|---|---|
| | अ | | |
| | अ | | अ |
| अ | अ | | अ |
| अ | उ | २ अ | अ |
| अ | उ | ० अ | उ (अवि) |
| उ (अवि) | अ (वर) | उ | उ (वि) |
| उ (वि) | | अ | |
| | | उ (अवि) | |
| | | उ (वि) | |

(१५) पितामहभगिनीपुत्ररूपपितृबन्धुसन्निपातः।

| | | | | |
|---|---|---|---|---|
| | | अ | | |
| अ | | अ | | अ |
| अ | | अ | | अ |
| उ | | अ | | अ |
| उ | | अ | | अ |
| उ | उ | अ | २ उ | अ |
| उ (त्रि. गो. वि) | अ | अ | ० उ | उ (अवि) |
| | अ | अ (वरः) | अ | उ (वि) |
| | अ | | अ | |
| | अ | | अ | |
| | उ (अवि) | | अ | |
| | | | उ (अवि) | |

(१६) त्रिगोत्रान्तरिता विवाह्या।

| | | |
|---|---|---|
| अ | | |
| अ | | उ |
| अ | | उ |
| अ | | उ |
| अ | | उ (त्रि. वि) |
| अ | | |
| अ | उ | |
| अ (वरः) | उ | |
| | उ | |
| | उ (त्रि. वि) | |

(१७) सर्व्वत्र पितृबन्धुषु।


| | |
|---|---|
| अ | |
| अ | |
| अ | |
| अ | |
| अ | |
| अ | उ |
| अ | अ× |
| अ (वरः) | उ |
| | उ |
| | उ |
| | उ (त्रि. गो. वि) |

---


(१८) सर्व्वत्र मातृबन्धुषु।

| | | |
|---|---|---|
| अ | | |
| अ | | उ |
| अ | | उ |
| उ | उ | उ |
| उ | अ× | उ (त्रि. गो. वि) |
| अ (वरः) | उ | |
| | उ | |
| | उ | |
| | उ (त्रि. गो. वि) | |

(१९) मातृसपत्नी भ्रातृकन्या एवं तस्याः कन्यापि अविवाह्या ।




(२०) दत्तकपितृसपिण्डा उभयतः सप्तमीनिषिद्धा



(२१) दत्तकमातृसपिण्डा उभयतः पञ्चमी निषिद्धा–

| | | | |
|---|---|---|---|
| | अ | | |
| अ | | | अ |
| अ | उ | | अ |
| अ | उ | | अ |
| उ(अवि) | उ | | |
| उ(वि) | उ(त्रि.वि) | | |
| | | अ | अ |
| | | अ | उ(ग्रहित्री) |
| | | अ | अ(दत्तकः) |
| | | उ(अवि) | |

| | | | | |
|---|---|---|---|---|
| | | अ | | |
| अ | | अ | | अ |
| अ | उ | अ | | अ |
| अ | उ | अ | | अ |
| उ(अवि) | उ | | | उ(अवि) |
| उ(वि) | उ(त्रि.गो.वि) | | | उ(वि) |
| | | अ | अ | |
| | | उ(जननी) | अ | |
| | | | उ | |
| | | | उ(अवि) | |

(२२) दत्तकपितृबन्धु उभयपक्षः।

| | | |
|---|---|---|
| | | अ |
| अ | | अ |
| अ | | अ |
| अ | | अ |
| अ | | अ |
| उ | उ | अ |
| उ(अवि) | अ× | अ(ग्रहीता) |
| | अ | अ(दत्तकः) |
| | अ | |
| | अ | |
| | अ | |
| | उ | |
| | उ(अवि) | |

| | | |
|---|---|---|
| अ | | |
| अ | | अ |
| अ | | अ |
| अ | | अ |
| अ | | अ |
| अ | उ | उ |
| अ(अनकः) | अ× | ऊ(वि) |
| | अ | |
| | अ | |
| | अ | |
| | अ | |
| | अ | |
| | उ(अवि) | |
| | उ(वि) | |

(२३) दत्तकपितृबन्धु उभयतः।

| | | | | | |
|---|---|---|---|---|---|
| | | अ | अ | | |
| अ | | अ | अ | | अ |
| अ | | अ | अ | | अ |
| अ | | अ | अ | | अ |
| अ | | अ | अ | | अ |
| उ | उ | उ | उ | उ | उ |
| उ (अवि) | अ × | अ | अ (जनकः) | अ × | उ (अवि) |
| | अ | अ (दत्तकः) | | अ | |
| | अ | | | अ | |
| | अ | | | अ | |
| | उ | | | अ | |
| | उ | | | उ | |
| | उ (अवि) | | | उ (अवि) | |

(२४) दत्तकपितृबन्धु उभयतः।

| | | | | | |
|---|---|---|---|---|---|
| | | अ | अ | | |
| अ | | अ | अ | | अ |
| अ | | अ | अ | | अ |
| अ | | अ | अ | | अ |
| अ | | अ | अ | | अ |
| उ | अ | उ | उ | अ | अ |
| उ (अवि) × | अ | अ | अ (जनकः) | अ × | उ (अवि) |
| उ (वि) | अ | अ (दत्तकः) | | अ | उ (वि) |
| | अ | | | अ | |
| | अ | | | अ | |
| | अ | | | अ | |
| | उ | | | उ | |
| | उ (अवि) | | | उ (अवि) | |

(२५) दत्तकमातृबन्धु उभयतः।

| | | | | | | |
|---|---|---|---|---|---|---|
| | | अ | | अ | | |
| अ | | अ | | अ | | अ |
| अ | | अ | उ | अ | | अ |
| अ | अ | उ | उ | उ | उ | उ |
| उ(अवि) | अ× | उ | उ | उ | अ× | उ(अवि) |
| उ(वि) | अ | अ(दत्तकः) | उ(जननीपक्षे) | | ज | |
| | अ | | (त्रि.गो.वि) | | अ | |
| | उ | | | | उ | |
| | उ(अवि) | | | | उ(अवि) | |

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 10366
Date 19.7.66

CALCUTTA

# SANSKRIT COLLEGE RESEARCH SERIES, TEXTS AND STUDIES

## ALREADY PUBLISHED

**Texts:**

| | Title | Price |
|---|---|---|
| 1. | **Chandogya Brahmana** | 15.00 |
| 2. | **Ravanavaha** | 40.00 |
| 3. | **Kavyaprakasa** (Part I, Ullasa I-IV.) | 12.00 |
| 4. | **Jnanalaksanavicara-rahasya** | 9.00 |
| 5. | **Muktivadavicara** | 10.00 |
| 6. | **Savasutakasaucapra-karana** | 5.00 |
| 7. | **Anumitermanasatva-vicara** | 8.00 |
| 8. | **Sangita-Damodara** | 15.00 |
| 9. | **Dhvamsa-janyabhavayoh karya-karanabhava-rahasyam** | 5.00 |
| 10. | **Kavyaprakasa** (Part-II, Ullasas V—X.) | 20.00 |
| 11. | **Atmabodhaprakarana** | 5.00 |
| 12. | **Mahavastu Avadana** (Vol. I.) | 25.00 |
| 13. | **Narada Smriti** | 3.50 |
| 14. | **Udvahatattva** | 5.00 |
| 15. | **Kundamala** | 22.50 |
| 16. | **Paippalada Samhita** (Book I) | 10.00 |
| 17. | **Mahavastu Avadana** (Vol. II) | 40.00 |
| 18. | **Pramanyavada** | 5.00 |

**Studies:**

| | Title | Price |
|---|---|---|
| 1. | **Studies in the Upapuranas** (Vol. I.) | 25.00 |
| 2. | **Philosophy of Word and Meaning** | 20.00 |
| 3. | **Studies in the Upanisads** | 15.00 |
| 4. | **Studies in Nyaya-Vaisesika Theism** | 15.00 |
| 5. | **Veda-Mimamsa** (Vol. I) | 10.00 |
| 6. | **Harappa Culture and the West** | 7.00 |
| 7. | **Sanskrita Colleger Itihas** (Part II.) | 2.00 |
| 8. | **Vedartha-vicara** | 15.00 |
| 9. | **Studies in the Upapuranas** (Vol. II.) | 30.00 |
| 10. | **Descriptive Catalogue of Manuscripts of Sanskrit College Library** (Vol. I & II.) | 7.50 each |
| 11. | **Epic Sources of Sanskrit Literature** | 15.00 |
| 12. | **Medhatithi Bhasya** (in four volumes) | 21.75 |
| 13. | **Sanskrita Colleger Itihas** (Part I.) | 2.00 |
| 14. | **Tantra O Agamsastrer Digdarsan** | 5.00 |
| 15. | **Sanskrita Sahitye Hasyarasa** | 15.00 |
| 16. | **Jottings on Sanskrit Metrics** | 5.00 |
| 17. | **Veda-Mimansa** (Vol. II) | 10.00 |
| 18. | **Bhāratīya Sādhanār Dhārā** | 10.00 |
| 19. | **The Guhilas of Kiṣkindhā** | 10.00 |

## SHORTLY TO BE PUBLISHED

1. **Studies in Kusana Genealogy and Chronology** by *Dr. Bratindranath Mukherjee*, M.A., Ph. D., F.S.A.
2. **Veda-Mimamsa (Vol. III.)** (in Bengali) by *Shri Anirvan.*
3. **Economics in Kautilya** by *Dr. B. C. Sen*, M.A., LL.B., Ph.D. (London), P.R.S., F.A.S.
4. **Magadhi and its Formation** by *Dr. Munishwar Jha*, M.A. D.Litt. (Paris)
5. **Kautilya Studies** by *Dr. R. C. Hazra*, M.A., Ph.D., D.Litt.
6. **Padacandrika** (a commentary on the Amarakoṣa by Rāyamukuṭa) edited by *Dr. Kali Kumar Dutta Sastri.*
7. **Pratyakalokarahasya** edited by *Dr. Gaurinath Sastri*, M.A., P.R.S., D.Litt.
8. **Mahavastu Avadana (Vol.-III)** edited by *Dr. R. G. Basak*, M.A., Ph.D.
9. **Advaitavedānta Pratyakṣapramāsvarūp Vicār** (in Bengali) by *Minati Mallick (Kar)*, M.A., Vedantatirtha
10. **Padma-Purana** (a critical study) by *Dr. Asoke Chatterjee*, M.A., Panchatirtha
11. **A Tri-lingual Dictionary** (Sanskrit-Bengali-English) edited by *Dr. Govinda Gopal Mukhopadhyaya* and *Dr. Gopikamohan Bhattacharyya.*
12. **Paippalada Samhita (Book II-X)** edited by *Professor Durga Mohan Bhattacharya*, M.A.